PRABODHA CHANDRODAYA

KRISHNA MISRA

PRABODHA CHANDRODAYA

KRISHNA MISRI

COMOEDIA.

EDIDIT SCHOLIISQUE INSTRUXIT

HERMANNUS BROCKHAUS.

LIPSIAE:
F. A. BROCKHAUS.
1845.

SCHOLIEN.

Prolog.

P. 1.

Natvâ parâtmânam açesha-dehinâm
âtmânam, asyaiva sukha-prabodhaṁ
kartuṁ, *Prabodhâ*khya-nibandhane mayâ
Prakâça-nâmnî kriyate hi ṭîkâ. 1.
Vinâyakasya tanayo Dîkshitasya 'akarod imâṁ
Râmadâso 'tisaralâṁ ṭîkâṁ, satâṁ manoramâṁ. 2.

Atha kam apy antevâsinaṁ bahuço 'dhyâyita-vedânta-siddhântam api tatra 'avabodha-parâṅmukhaṁ nâṭakâdi-rasikaṁ parama-kâruṇikâḥ çrî-Kṛishṇamiçrâḥ Prabodhacandrodayâkhya-nâṭaka-vyâjena taṁ bubodhayishavas, tad racayanti sma. tatra 'âdya-padya-dvaye *Nândî*-saṁjñake nirvighna-parisamâptaye kṛitaṁ maṅgalaṁ nibadhnâti:

Çl. 1. madhyâhna iti. vayaṁ *tad* aupanishadaṁ *mahas* tejaḥ *upâsmahe* sevayâmaḥ. kîdṛiçaṁ mahaḥ: *sândrânandaṁ*, *sândro* nivido nityo ya *ânandas*, tad-rûpaṁ. punaḥ kîdṛiçaṁ: *amalaṁ* avidyâ-tat-kâryâdi-dosha-çûnyaṁ. punaḥ kîdṛiçaṁ: *svâtmâvabodhaṁ*, *svâtmâ* 'eva sva-svarûpam eva *avabodhaḥ* prakâço yasya; sva-prakâçam, ity arthaḥ. tat kiṁ: *yad-ajñânato* yasya 'ajñânât *iti* idaṁ *trailokyam unmîlati* prâdur bhavati. idaṁ kiṁ, tatra 'âha: *kham* ity-âdi. ajñânât prapañcotpattiṁ lokaṁ dṛishṭântena 'âha: *madhyâhnârka-marîcikâsu payaḥ-pûra iva*; yathâ madhyâhne sikatâdi-pratiphaliteshv arka-kiraṇeshu tad-vishayâjñânât payaḥ-pûra-jñânaṁ jâyate, tathâ satyânandâdi-rûpa-brahmâjñânât prapañcotpattir, ity arthaḥ. evaṁ cet, katham anartha-nivṛitir? ity âçaṅkya, sa dṛishṭântam âha: *yat-tattvaṁ* yasya trailokyasya tâttvikaṁ svarûpaṁ *vidushâṁ* jñâninâṁ *punaḥ nimîlati* naçyati; âtma-svarûpâtiriktaṁ na bhavati, kiṁ tu brahma-svarûpeṇa tishṭhati, ity arthaḥ. tatra dṛishṭântaḥ: *srag-bhogi-bhogopamaṁ*, *sraji* mâlâyâm utpanno yo *bhogi-bhogaḥ* sarpa-dehaḥ, tena 'upameyam. tathâ ca 'ayam arthaḥ: mâlâ-tattva-

sâkshâtkârât tad-bhinnaḥ sarpa-deho na bhavati, kiñ tu tat-svarûpeṇa ʾvatishṭhate, evañ brahmâdvaita-sâkshâtkârât svarûpâtirikta-rûpeṇa prapañco na tishṭhati, iti, evañ ca sati, ajñâna-nivṛitti-prayojanañ, prayojana-kâmo ʾdhikârî pratipâdya-pratipâdaka-bhâvaḥ sambandhaḥ aikyam abhidheyam ity-âdi pradarçitañ. (K.

Mâtur udûkhala-bandhe bahu-nirbandhe sahelasya,
tribhuvana-bandha-sahishṇor, bâlaka-Vishṇoḥ smitañ jayati. 1.
Prabodhacandrodaya-nâma nâṭakañ,
jñânâgni-sançuddha-viçishṭa-hâṭakañ,
Bhaṭṭottarâcârya-*Maheçvaraḥ* kṛitî
ṭîkâmayâmlena karoti nirmalañ. 2.

"*Sûtradhâraḥ* paṭhen *nândîm* madhyamañ svaram âçritaḥ" iti nâṭake niyamât, *sûtradhâra*-padârthaḥ pradhâna-naṭo raṅga-sthalam âgatya *nândî*-pada-vâcyañ maṅgalañ karoti. —

Çl. 1. *madhyâhna* iti. etat prabandha-pratipâdyasya ʾadvitîyasya Brahmaṇa upâsanâ-kathanam idañ. "Brahmaṇaç ca ʾâditya-varṇañ tamasaḥ parastâd" ity-âdi Çrutyâ sûrya-tejaḥ-svarûpatvañ. "nityañ vijñânam ânandañ Brahma" iti Çrutyâ jñânânanda-svarûpatvañ ca, iti Vedânta-siddhântaḥ; tâdṛiça-Brahmaṇaç ca ʾavidya-daçâyâm asâkshâtkârât trailokya-dvaitañ bhâsate, avidyâ-nâçe tu tad-advaitam eva bhâsate, na tu vahiḥ-padârthântaram, iti siddhântaḥ, tad-anusareṇa ʾasya çlokasya ʾanvayo bodhyaḥ, tathâ hi: *svâtmâ* paramâtmâ Brahma, tad-âtmakam *avabodhañ* jñâna-svarûpañ *mahas* tejaḥ-svarûpañ, *sândrânandañ* nividânanda-svarûpañ, *tat* prasiddham *amalañ* ca nirlepañ vayam *upâsmahe* ârâdhayâmaḥ. *yad-ajñânato* yad-asâkshâtkârât *trailokyam unmîlati* Brahma-bhinnatayâ tattvena Brahma vishayî-bhavati. Brahmâkâram âha: *khañ vâyur* ity-âdi; *kham* âkâçañ, *jvalanañ* tejaḥ, *iti* ʾiti, ity-âdi ʾity arthaḥ. tâdṛiçonmîlane dṛishṭântam âha: *madhyâhna* ʾiti; *madhyâhnakâlînârkasya marîcikâsu* âkâçe dṛiçyamâna-galaj-jvalâyamâna-raçmi-samûheshu *payaḥ-pûra iva;* tâdṛiça-marîcikâsu payaḥ-pûro yathâ unmîlati bhrama-vishayî-bhavati, tathâ, ity arthaḥ. tathâ: *yat-tattvañ vidushâñ* jñânatâñ yat-tattva-sâkshâtkâravatâñ janânâñ sthâne, tad eva trailokyañ *punar nimîlati* kha-vayv-âdi-rûpa-tad-bhinnatvena bhramâvishayî-bhavati, ity arthaḥ. tâdṛiça-nimîlane dṛishṭântam âha: *srag-bhogi* ʾiti; bhrameṇa gṛihîtaḥ *sraji* mâlâyâñ *bhogi-bhogaḥ* sarpa-kâyaḥ yathâ ʾanupadañ viçesha-darçanât nimîlati bhramâvishayî-bhavati, ity arthaḥ. yady api marîcikâsu jala-bhrama-nimîlanam eva ʾupasthitatvâd dṛishṭântayitum ucitañ, tathâpi tan-nimîlanam anupadañ prâyaço na bhavati, ʾity ato dṛishṭântântarânusaraṇañ.)

Çl. 2. *api ca*, iti. prâktana-maṅgala-samuccayârthaḥ *api*-çabdaḥ. *antar* iti. *Candrârdhamauleḥ* Candraçekharasya *pratyak-jyotiḥ*, jaḍânṛitâhaṅkârâdi-bhyaḥ prâtikûlyena satya jñânânandâdi-rûpatvena ca ʾañcati prakâçate, tat *pratyak* tac *jyotiç* ca prakâça-rûpañ, *jayati;* jayaḥ sarvotkarshe ʾnya-

nirapekshità, 'ity arthaḥ. kìdṛiçaṁ pratyak-jyotiḥ: *antar nàḍyàṁ* sushumnàyàṁ *niyamitaḥ* sanniruddhaç ca 'asau *maruc* ca, tena *laṅghitam* ullaṅghitaṁ *brahmarandhraṁ* yena, tat. kasmin sati: *svânte* antaḥkaraṇe *çànti-praṇayini* upaçamaṁ gate sati. punaḥ kìdṛiçaṁ jyotiḥ: *samunmilan* prakaṭibhavan *ânandaḥ* sukhaṁ, tena *sândram* abhinnaṁ; sva-prakàça-sukhâbhinnam, ity arthaḥ. kìdṛiçasyà Candramauleḥ: *yaminaḥ*, yamo 'sya 'asti 'iti *yami*, tasya; yogâsaktasya 'iti arthaḥ. utprekshate, kìdṛiçam iva jyotiḥ: *spashṭaṁ* prakaṭaṁ, lalàṭa-sambandhi *lalàṭaṁ netraṁ* tṛitìyaṁ cakshuḥ, tad-*vyàjena* tan-misheṇa, avyaktaṁ *vyaktaṁ* sampannaṁ, tathà-bhùtaṁ *vyakti-kṛitaṁ* prakaṭì-kṛitam iva. punaḥ kìdṛiçaṁ: *jagad-vyâpi*, jagad vyàpnoti vishayìkaroti, tat. çrì-Bhagavac-cakshusha utprekshà 'ativa samìcìnà, 'iti hṛidayaṁ. anena padya-dvayena Vedàntasiddhànta-rahasyaṁ prakaṭayatà Miçreṇa 'abhidheyaṁ nirṇàyi. — (*K.* "ashṭa-padà bhaven *nàndi*" ity ato nàndyantaram àha: *antar* iti. parama-yoginà Maheçena dhyeya-svarùpasya Brahmaṇa upaçlokana-rùpaṁ maṅgalam idaṁ. *Candràrdhamauler* ity atra dhyeyatvasambandhe shashṭhì, tathà ca *yamino* yoginaç 'Candràrdhamauler dhyeyaṁ sva-çarìrâbhyantare *pratyag* adho-gàmi Brahma-svarùpaṁ *jyotir* dhyàna-vaçàj *jagad-vyàpi* sat *jayati* utkarshâçrayaḥ, tathà ca tat praṇamàmi, 'iti labhyate. jagad-vyàpane dhyàna-paripàṭìm àha: *antar* iti. jyotiḥ kiṁ-bhùtaṁ: dhyàna-daçàyàm *antar nàḍyàṁ niyamitena* niyantritena *marutà* karaṇa-bhùtena *laṅghitaṁ* pràptaṁ *brahmarandhraṁ* yena, tàdṛiçaṁ. punaḥ kìdṛiçaṁ: *çànti-praṇayini* çàntimati Maheçasyaiva *svânte* citte *samunmilatà* jàyamànena 'ânandena *sândraṁ* vyàptaṁ, dhyàna-vaçàj jàyamànânanda-sambandham, ity arthaḥ. utpàdyamànânanda-Maheça-dhyeyatvam ànandasya dhyàtavya-jyotishi sambandhaḥ; itthaṁ brahmarandhra-vyàptyà tad-dvàrà jagad-vyàpane bodhite, tatraiva 'utprekshate: *spashṭa* 'iti. brahmarandhreṇa na jagad vyàpanaṁ, kiṁ tu *spashṭaṁ* yathà syàt tathà *lalàṭa netra vyàjena vyakti kṛitam iva*; na 'idaṁ lalàṭa-netraṁ, kiṁ tv idam eva vyakti kṛitaṁ jyotir jagad vyàpnoti, ity arthaḥ.)

P. 2:

Z. 1. nàndy-abhinayena kathàṁ prastàvayati. *nàndy-ante sùtradhàra* iti, *nàndi* nàṭakâdau padyâdi-rùpà. *sùtradhàro* nàṭakâcàryaḥ, "vakti" iti çeshaḥ. — (*K.* etad-ashṭapada-nàndì-paṭhanânte *sùtradhàraḥ* punar àha, ity arthaḥ.)

Z. 2. *alam* iti, nàndì-pàṭhenaiva samayo na netavyaḥ, iti bhàvaḥ. *àdishṭo 'smi* àjñapto 'smi *Gopàlena*, ity anvayaḥ. kìdṛiçena Gopàlena: *çrìmatà* lakshmìvatà; lakshmìvata àjñà 'avaçyaṁ vidheyà, iti bhàvaḥ. punaḥ kìdṛiçena Gopàlena: *sakalâḥ* sarve ye *sàmantà* maṇḍaleçvaràs, teshàṁ *cakraṁ* samùhas, tasya *cûḍâ-maṇayo* mukuṭa-maṇayas, teshàṁ *marìci-mañjaryaḥ* kiraṇa-paramparâs, tàbhir *niràjite caraṇa kamale* yasya, tàdṛiçena. punaḥ kìdṛiçena Gopàlena: *balavanto* ye *ari puñjâḥ* çatru-samàjàs, teshàṁ *vakshas taṭam* eva *kapàṭaṁ*, tasya *pàṭane* vidàraṇe *prakaṭitaṁ Narasiṁha-rùpaṁ*, yena. punaḥ kìdṛiçena Gopàlena: *prabalatarâṇi* yàni *narapati-kulàni*, teshàṁ

pralayo vināçaḥ sa eva *mahārṇavas*, tasmin *magnā*· yā *medinī*, tasyāḥ *samuddharaṇe mahā-varāha* iva *Mahāvarāhas*, tena. punaḥ kīdṛiçena Gopālena: *nikhilāḥ* samastā *dig*-rūpā *vilāsinyo* varāṅganās, tāsām *karṇapūraḥ* sampannaḥ *karṇapūrī-kṛitaḥ* çravaṇālaṅkārī-kṛitaḥ *kīrti-latā-pallavo*, yena; etena diganta-viçrānta-kīrtitvaṁ dhvanitaṁ. punaḥ kīdṛiçena Gopālena: *samastā* ye *āçā-stamberamā* dig-gajās, teshāṁ *karṇa-tālāsphālanena bahulataro* bahutaro yaḥ *pavana-sampātas*, tena *nartitaḥ pratāpa*-rūpo *'nalo* yasya, tādṛiçena; anena diganta-viçrānta-pratāpa iti dhvanitaṁ. — "ājñapto 'smi" ity uktāṁ tām ājñāṁ darçayati: *khalu*, iti. *khalu* prasiddhau, *asya sahaja-suhṛidaḥ* svabhāva-komalasya *çrī-Kīrtivarmadeva*-nāmno *rājñaḥ*; *kīrtir* eva *varmā* kavacaṁ yasya, sa eva *devaḥ*, iti vā; tasya yo *dig-vijayaḥ*, tad-*vyāpāreṇa 'antarito* vilambitaḥ *Parabrahmānanda-raso*· yeshāṁ, tādṛiçair *asmābhiḥ samyag unmīlitāḥ* samyag anubhūtāḥ *vividhā* aneka-prakārāḥ *vishayāḥ* srag-ādayaḥ, teshāṁ *rasa-sparçena* ānandānubhāvena *dūshitā iva* vishaya-sukhasya heyatvāt *divasāḥ' ativāhitāḥ* atikrāntāḥ.. — (*K. çrīmatā Gopālena ādishṭo 'smi*, iti dūreṇa 'anvayaḥ; *Gopālaç* ca Kīrtivarma-nṛipater senāpatir brāhmaṇaḥ. kīdṛiçena tena: *sakalānāṁ sāmantānāṁ* rājñāṁ *cūḍāmaṇi-marīcibhir nīrājitam* ujjvalitaṁ *caraṇa-kamalaṁ* yasya, tādṛiçena; sakala-bhūpati-namaskṛitena, ity arthaḥ. tathā· *balavato 'ri-nivahasya vaksha* eva *taṭāṁ* kaṭhinatvāt, tad eva ca *kabāṭaṁ* sphāratvāt, tasya *pāṭane* vidāraṇe *prakaṭitaṁ* pradarçitaṁ svasmin *Narasiṁha-rūpaṁ* yena, tādṛiçena; Narasiṁhenāpi Hiraṇyakaçipor vakshaḥ-pāṭanāt. tathā *prabalatara-narapati-kulaṁ* eva *pralaya*-kāla-*mahārṇavas*, tatra *magnāyāḥ* Kīrtivarma-rāja-sambandhinyā *medinyāḥ samuddharaṇe Mahāvarāha*-rūpeṇa; Mahāvarāheṇāpi pralayārṇava-magna-medinī-samuddharaṇāt. tathā *nikhilā diça* eva *vilāsinyaḥ*, tāsāṁ *karṇapūrī-kṛita-kīrti*-rūpa-*pallavena*; *karṇapūraḥ* karṇa-bhūshā; samasta-diganta-paryanta-gāmi-kīrtinā, ity arthaḥ. tathā *samastā* ye *āçā-stamberamā* dig-dantinaḥ, teshāṁ, *karṇā* eva *tālāḥ* karatālāḥ, teshām *āsphālanena* yo *bahulatara* niviḍataraḥ *pavanaḥ*, tena *nartitaḥ pratāpānalo* yasya, tādṛiçena; samasta-diganta-gāmi-pratāpena, ity arthaḥ. — ādiçyamānam artham anuvaktuṁ tat-kāraṇam āha: *yathā*, iti, *vinodayitum icchāma*, ity antena Gopālasyaiva vākyena. *asmābhiḥ* Gopālaiḥ *khalu samunmīlitena* udbuddhena nānā-*vishaya-rasena dūshitā* iva *divasā ativāhitā* atikrāntāḥ. asmābhiḥ kīdṛiçaiḥ: *svabhāva-mitrasya Kīrtivarma-devasya rājño dig-vijaya-vyāpāreṇa 'antarito* vyavadhāpitaḥ *Paramabrahmānando* yaiḥ, tādṛiçaiḥ.)

Çl. 3. kṛitakṛityatāṁ darçayati: *nītāḥ*, iti. *nṛipateḥ vipakshāḥ* vairiṇaḥ *kshitibhujo* bhūmipālāḥ *kshayaṁ nītāḥ* prāpitāḥ. *prathitaiḥ* khyātair *amātyaiḥ* mantribhiḥ *kshitiḥ rakshavatī abhūt*. *asya* nṛipater *bhuvi sāmrājyaṁ vihitaṁ*. kīdṛiçaṁ sāmrājyaṁ: *kshitipālānāṁ mauli-mālāḥ* mukuṭa-çreṇayaḥ, tābhir *arcitaṁ* pūjitaṁ. kīdṛiçyāṁ bhuvi: *payonidhayaḥ* sāgarā eva *mekhalā* paṭikā yasyāṁ sā. · (*K. nṛipateḥ* Kīrtivarmaṇo *vipakshāḥ kshitibhujo* rājānaḥ *kshayaṁ nītāḥ* prāpitāḥ; tadīyā *kshitiç* ca *prathitaiḥ* khyātaiḥ arthān mad-atiriktaiḥ *amātyaiḥ rakshāvaty abhūt*. *payonidhi-mekhalāyām* samudra-

veshṭitâyàñ *bhuvi kshitipâlânâñ mauli-mâlayâ* mauli-çreṇyà *arcitañ sâmrâjyañ ca 'asya* Kìrtivarmaṇo *vihitam*, arthân mayâ, iti arthaḥ.
çàsti yaç ca 'âjñayà ràjñaḥ, sa "samràḍ" iti kìrtitaḥ.
tàdřiçasya sâmràjyasya 'arcitatvañ ca samràjo 'rcanàd eva bodhyañ.)

Z. 16. křitakřityatà-prayojanam àha: *tad* *vayam* ity-àdi. *çânta-rasa-prâyaḥ* çânta-rasa-pradhâno yaḥ *prayogâbhinayaḥ* nàṭyâṇukàraḥ, tena, ity arthaḥ. àtma-vinodopàyam àha: *tad yad* iti. *tatrabhavadbhiḥ* pùjyaiḥ, *atra-bhavat-tatrâbhavac*-chabdau pùjyârthau. — (*K. vayañ* Gopàlâḥ. àdiçyamànam artham àha: *tad yad* iti. *atrabhavadbhiḥ* pùjyaiḥ. *abhinirmâya* racayitvà. *bhavataḥ* sùtradhàrasya sthàne. *bhavatâ* iti-paryantam àdiçyamànârtha-kathanañ, *asti ca* ity-âdikañ Sùtradhàrasya 'uktiḥ.)

P. 3.

Z. 3. *nepathyañ* nàndyàḥ pâṭhàya paṭàbandhaḥ. *pravicya naṭi*, "vadati" iti çeshaḥ. — (*K. parikramya* iti, sva-gřihâbhimukhañ gatvâ, ity arthaḥ. *nepathyañ* veça-racana-sthànañ; apravishṭa-samàcàras tatra varṇyate, ato nepathyam eva sva-gřihañ bodhyañ, evam uttarottaram api nepathye ity ukte apravishṭa-samàcàro bodhyaḥ. *itas tâvad* iti, *ito* mat-samìpe àgamyatàñ *tâvad*, ity arthaḥ. *naṭi* vadati, ity arthaḥ; evam uttaratra bodhyañ. nàṭake strìṇàñ nìcànàñ ca 'uktiḥ Pràkřitañ, ata âha: *ajja*, iti. *niyogaḥ* âdeçaḥ. *anushṭhiyatàñ* kriyatàñ, arthàn mayà.)

Çl. 4. kathañ viditam ity àha: *asti*, iti. *Gopâlo 'sti*, iti yojanà. kidřiço Gopàlaḥ: *pratyarthino* ripavo ye *přithvipatayaḥ*, teshàñ *vipulañ* bahulañ *balâñ* sainyañ, tad eva' '*araṇyañ*, tasmin *mûrchan* vřiddhiñ pràpnuvan yaḥ *pratâpaḥ*, sa eva *jyotiḥ*, taj-*jvâlayâ 'avaliḍham* àkramitañ *tribhuvana-vivarañ* yena, saḥ. punaḥ kidřiço Gopàlaḥ: *viçvasmin vibhrântâ* vikhyàtà *kîrtir* yasya, saḥ. kaḥ: *yena Kirtivarmâ narapati-tilako bhûyaḥ sâmrâjye 'bhyasheci* abhishiktaḥ. kiñ kritvà: *asi latâ 'eva* khaḍga valyà 'eva *mitrañ* sahàyaṃ, tan-*mâtreṇa bhumipâlân prasabhañ* haṭhena *jitvâ*. khaḍga eva tasya sahàyo, na 'anyaḥ, ity arthaḥ. — (*K. viditañ* jñàtañ, sàmànyato napuṃsaka nirdeçaḥ. jñàtam arthañ darçayati: *asti* ity-àdi çloka-dvayena: *Gopâlo 'sti*, sa kidřiçah: *pratyarthinâñ* pratikùlànàñ *přithvipatinâñ vipulañ balañ* sainyam eva '*araṇyañ*, tatra *mûrchataḥ pratâpânalasya jyotir jvâlayâ 'avaliḍhañ tribhuvana*-rûpa-*vivarañ* garto yasya, tàdřiçaḥ., *viçvasmin vibhrântâ kîrtir* yasya, tàdřiçaḥ. *asi-latâ-mâtra-sahâyena* yena *prasabhañ* balàd *bhûmipâlân jitvâ*, arthàt tai ràjyàd utkhàtaḥ *Kirtivarmâ narapati-tilako bhûyaḥ sâmrâjye 'bhyasheci* abhishiktaḥ, ity arthaḥ.)

Çl. 5. tasya kirty-antaram àha: *api ca*, iti. *adya 'api*, iti. *raṇa-kshoṇayaḥ* saṅgràma-bhùmayaḥ *vitataiḥ* vistřitaiḥ *nâdaiḥ* çabdaiḥ *adyapi* idànim api *yasya yaçâṅsi* udgàyanti. kidřiçair nàdaiḥ: *pracaṇḍânilena* mahà-vàyunà *prakshubhyanto* ye *kariṇaḥ*, teshàñ *kumbhâḥ* gaṇḍasthalàni, teshàñ *kûṭañ* samûhaḥ, tasya *kuharâṇi* vilàni, teshu *vyaktaiḥ* prakaṭaiḥ; vàyu pùrṇàni hasti-kumbhasthalàni çushkàni dhvananti, iti bhàvaḥ. punaḥ

kidṛiçair nâdaiḥ: *unmadâḥ* utkṛishṭa-mada-yuktâ yâ *yâtudhâna-taruṇyaḥ* râkshasa-striyaḥ; tâsâṁ *cañcanto* dîptimanto ye *karâḥ*, teshâṁ *âsphâlanaṁ* parasparâghâtaḥ karatâlikâ-rûpaḥ, tena *vyâvalganti* capalâni yâni *nṛi-kapâlâni*, tâny eva *tâlâḥ* vâdya-viçeshâḥ, teshâṁ *raṇitâni* çabditâni yeshu. kidṛiçyo raṇa-kshoṇayaḥ: *nṛityantyaḥ Piçâcâṅganâḥ* yâsu, tâḥ. — (*K. raṇa-kshauṇayo* raṇa-bhûmayo *vitatair nâdair adyâpi yasya yaçâṅsi udgâyanti*. acetanânâṁ raṇa-kshauṇînâṁ nâdân upapâdayati: *pracaṇḍânila* iti. *pracaṇḍânilaiḥ prakshubhyatâṁ* sañcalatâṁ *kari-kumbha-kûṭânâṁ kuharesku* chidra-rûpa-gûhâsu *vyaktair* nâdair, ity arthaḥ; vâyu-phûtkâra eva raṇa-kshauṇînâṁ nâdaḥ, iti bhâvaḥ. raṇa-kshauṇayaḥ kidṛiçyaḥ: *unmadânaṁ yâtudhâna-taruṇînâṁ* râkshasâṅganânâṁ *cañcatâṁ* calatâṁ *karâṇâm âsphâlanena* câlanena. *vyâvalgatâṁ* calatâṁ *nṛi-kapâla*-rûpa-*tâlânâṁ* karatâlânâṁ *raṇitaiḥ* çabdair *nṛityantyaḥ Piçâcâṅganâ* yatra, tâdṛiçyaḥ. mâṅsa-çoṇita-bhakshaṇârthi-Râkshasâṅganâ-kṛita-nṛi kapâla-çabdair mâṅsa-çoṇita-bhakshaṇârthi-Piçâcâṅganâ-nṛityaṁ.)

Z. 16. etâvatâ kiṁ syât, tatra 'âha: *tena ca*, iti. *abhinetuṁ* abhinâyena prasâdayituṁ. abhinaya-pradarçane kim apekshate, tad âha: *tad âdiçyantâm* iti. *bharatâḥ* naṭâḥ. *varṇikâ-parigrahaṇâya* naṭâveça-parigrahâya. — (*K.* nanu tâdṛiça-Gopâlasya 'astitva-jñâne kim âyâtam, ity atra 'âha: *tena ca*, iti. *bharatâ* naṭâḥ. *varṇikâ* veçaḥ.)

P. 4.

Z. 1. *âryaputra, âçcaryaṁ! yena samara-vijaya-lakshmîr âsâditâ* prâptâ, iti prâkṛita-prânte prâkṛitânvayaḥ. kiṁ kṛitvâ: *Karṇa-sainya-sâgaraṁ nirmathya*. kena kim iva: *Madhumathanena* çrî-Kṛishṇena *kshîra-samudram iva*; yathâ kshîra-sâgaraṁ nirmathya çrî-Kṛishṇena Lakshmîr labdhâ, evaṁ tena râjñâ, ity arthaḥ. kiṁ-bhûtena yena Madhumathanena ca: *tathâ* tena ukta-prakâreṇa *nija-bhuja-bala-vikrameṇa nirbhartsitaṁ sakalaṁ râja-maṇḍalaṁ* yena. kidṛiçaṁ Karṇa-sainya-sâgaraṁ: *â-karṇâkṛishṭa-kaṭhino* yaḥ *kodaṇḍaḥ*, tasmât *pracura-varshan* yaḥ *çara-nikaro* bâṇa-samûhaḥ, tena *jarjharî-kṛitâs turaṅgâḥ*, ta eva *taraṅga-mâlâ* yasmin. punaḥ kidṛiçaṁ: *nirantaraṁ nipatanti tîkshṇâni vikshiptâni* itas tataḥ pâtitâni *çastrâṇâm sahasrâṇi* aparimitâni çastrâṇi, taiḥ pallasthâḥ *paryastâḥ uttuṅgâ* ye *mâtaṅgâḥ* kariṇaḥ, ta eva *mahâ-mahîdharâḥ* parvatâḥ, teshâṁ *sahasraṁ* yasmin. punaḥ kidṛiçaṁ: *bhraman* yo *bhujadaṇḍaḥ*, sa eva *caṇḍaḥ* pracaṇḍo *mandaraḥ*, tad-*abhighâtena ghûrṇantaḥ sakalâḥ* ye *pattayaḥ* padâtayaḥ, ta eva *salila-saṅghâto* jala-samûho yasmin. — (*K. yena* Gopâlena, *Karṇa*-saṅjñaka-râja-*sainya-sâgaraṁ Madhumathanena kshîra-samudram iva nirmathya*, *samâsâditâ samara-vijaya-lakshmîr*, ity anvayaḥ. Karṇa sainya sâgaraṁ kidṛiçaṁ: *â karṇâkṛishṭena kodaṇḍena* dhanushâ *bahala-vṛishyamâṇo* nivida-pâtyamâno yaḥ *santata-çara nikaraḥ*, tena *jarjaritâḥ* sarvâṅga-kshatâs *turagâ* eva *taraṅga-mâlâ* yatra, tâdṛiçaṁ; sagare taraṅga-sattvât. tathâ *nirantaram nipatadbhis tîkshṇa vikshiptair* atipreritaiḥ *sva hasta çastraiḥ paryâsitâḥ* patitâ ye *uttuṅga mâtaṅgâs*, ta eva *mahâ mahîdhara sahasraṁ* yatra, tâdṛiçaṁ; sâgare 'pi mainakâdi-

mahîdhara sattvàt. tathà *bhramad-bhujadaṇḍa* eva *mandaras*, tasya *abhighâtena ghûrṇamânâḥ sakala-pattaya* eva *salila-saṅghato* yatra, tàdṛiçaṁ; sàgarasyàpi mandaràbhighàta-ghûrṇamàna-salilatvàt. *sakala-munijana-çlàghanìya-caritasya*, ity aṅçaḥ praçna-vishayo boddhavyaḥ] çatru-ghàtinas tathà tv asya 'asiddhatvàt.)

Z. 10. *nisarga-saumyaṁ* svabhàva-saumyaṁ. *sakalâ* ye *bhûpâlâḥ*, teshàṁ *kulaṁ*, tatra *pralaya-kâlâgnivad rudraḥ* krûraḥ, tena *Cedi-deçâdhipatinâ* ràjñà *samunmûlitaḥ* samutpàtitaḥ, *somavaṅçyânâṁ râjñyâṁ* Kìrtivarma-prabhṛitìnâṁ rakshitṛiṇàṁ *pṛithivyâṁ* bhûmau *âdhipatyaṁ sthirîkartuṁ*, *ayam asya saṅrambhaḥ*, krodhaḥ naimittikaḥ, na svàbhàvikaḥ. — (*K. Cedi-bhûpatinâ* Karṇa-sañjñaka-bhûpàlena.)

P. 5.

Çl. 6. amum arthaṁ prakàràntareṇa 'àha: *kalpânta* iti. *kalpânte* yo *vâtas*, teṇa *sthairya-prasâda-maryâdâḥ*, *sthairyaṁ* niççalatà, *prasâdaḥ* svacchatà, *maryâdâ* velànanullaṅghanaṁ. (*K. tathâ* tàdṛiçaṁ prasiddhaṁ yathà syàt tathà, *kalpânte* yat *saṅkshobhaṁ* calanaṁ, tena *laṅghitâḥ* plàvitàḥ *açesha-bhûbhṛitaḥ* samasta-parvatà 'yena, tàdṛiçasya *mahodadheḥ*, *tâḥ* pûrvânubhûtà eva *dhairyâdayaḥ*; *maryâdâḥ* tìra-sìmàḥ.)

Z. 3. *tathâ-vidhâḥ* tàdṛiçàḥ *purushâḥ punaḥ çântim eva prapadyante* pràpnuvanti. kiṁ kṛitvà: *kshitiṁ* prati *avatîrya*. kim-arthaṁ: *bhûta hitâya* pràṇinàṁ hitàya. *paurusham* eva purushàrtha eva *bhûshaṇaṁ* yeshàṁ, te. (*K. tathâvidha-paurushaṁ* vairi-nàça-janya-paurushaṁ. *kṛityaṁ* kartavyaṁ.)

Çl. 7. 8. anena kṛita-kṛityatà darçità. sa kaḥ, *yena triḥ-sapta-vâram* iti. *triḥ-sapta-kṛitvaḥ* ekaviṅçati-vàraṁ *bhûri cyutaṁ* yad *rudhiraṁ*, tasya *sarit*, tasyà *vâri-pûre abhishekaḥ* snànaṁ tarpaṇaṁ ca *akâri* kṛitaṁ. kìdṛiçe vàri pûre: *nṛipâṇâṁ* ràjñàṁ *bahalo* bhûyàn *vasâ* suddha-màṅsa-snehaç ca, *mâṅsaṁ* ca, *mastishka-paṅkaḥ* lalàṭàntargato dhàtuç ca, etàni *prâgbhâre* tìre yasya, tàdṛiçe. punaḥ sa kaḥ: *yasya asau kuṭhâraḥ* paraçuḥ, *strî* ca *bâlâç* ca *vṛiddhâç* ca, tàny eva '*avadhis*, tad-avadhi *nidhanaṁ* màraṇaṁ, tad-*vidhau* tasmin kartavye *nirdayo* 'tikaṭhinaḥ *viçrutaḥ* khyàtaḥ. kìdṛiçaḥ kuṭhàraḥ: *râjanyânâm uccâ* ye *aṅsâḥ* skandhàs, teshàṁ *kûṭaṁ* samûhaḥ, tasya *krathane* vinàçe *paṭuḥ* kuçalà *raṭantî* çabdàyamànà *ghorâ* bhayànakà *dhârâ* yasya. — *so 'pi svavîryâd* ity anena yugmaṁ. *so 'pi çrìmân Jâmadagnyo muniḥ*, *tapobhiḥ praçânta-kopa-jvalanaḥ* san, *çâmyati* çàntiṁ gacchati. kiṁ kṛitvà: *nṛipâṇâṁ kulaṁ samutkhâya* samutpàṭya, *bhûmeḥ bhâraṁ svavîryât* sva-sàmarthyàt *avatârya ca*. — (*K. yena Jâmadagnyena*, arthàd vairiṇàṁ *bhûri cyuta-rudhira* rûpa-*sarito vâri-pûre triḥ-sapta kṛitvas* triḥ sapta-vàràn *abhishekaḥ* snànam *akâri* kṛitaḥ, *so 'pi çrìmân munir Jâmadagnyaḥ*, *praçânta-kopa-jvalanas tapobhir* viçishṭaḥ san, *çâmyati* çànta yuddha-raso bhavati,' iti çloka dvayena 'anvayaḥ. kiṁ kṛitvà: *sva-vîryât nṛipâṇâṁ kulaṁ samutkhâya*, *bhûmer bhâram avatârya*. vàri-pûre kìdṛiçe: *nṛipâṇâṁ bahalâni* yàni niviḍàni *vaçâ mâṅsa-mastiskâni*, tàny eva *paṅka-prâgbhâraḥ* paṅka-samûho

yatra, tàdṛiçe; *vaçâ* majjà, *mastiskañ* tailañ. tathà *yasya asau* prasiddhaḥ *kuṭhâraḥ strî-bâla-vṛiddha-paryantânâñ nidhana-vidhâne nirdayo viçrutaḥ* khyàtaḥ; *uṭad-ghora-dhâraḥ* çatru-màraṇàya calad-bhìshaṇa-dhàraḥ; *râjanyânâm uccâñça-kûṭasya* bhuja-mûla-samûhasya *krathane* chedane *paṭuḥ.)*

Z. 15. dàrshṭàntikam àha: *tathâ 'yam,* iti. viveka-mohayor jayaparàjayâbhinayena nàṭyañ racayituñ saṅgatim àcarayati:

Çl. 10. *vivekena,* iti. *yena ûrjitañ* balavantañ *Karṇañ nirjitya çrî-Kîrtivarma-nṛipater udayaḥ* utkarshaḥ *kṛitaḥ*. tatra dṛishṭàntaḥ: yathà *vivekena 'iva* àtma-yathàtmya-jñanena 'iva *mohañ* sañsàra-mûla-kàraṇam iva *nirjitya, bodhasya 'iva* àtma-sàkshàtkàrasya 'iva *udayaḥ kṛitaḥ.* — *(K. yena* Gopàlena *Karṇañ* ràjànañ *nirjitya çrî-Kîrtivarma-nṛipater udayaḥ* àdhipatyañ *kṛitaḥ*. tatra ekâneka eva-çabdàd upamàd vaividhyasya Daṇḍikàroktatvàd anekeva-çabdaiḥ prakṛitârtha-sûcikàm upamàm àha: *vivekena 'iva,* iti. *yena 'ity* atra *vivekena 'iva 'ity* upamà. *vivekaḥ* prakṛita-prabandhasya nàyakaḥ, sa ca vicàryopanishad-artha-nirṇaya-rûpaḥ. *Karṇam* ity atra 'upamà *moham iva,* iti. *ûrjitam* iti Karṇa-mohayor dvayor api viçeshaṇañ; *mohaç* ca tattva-jñàna-virodhi-jñànañ prakṛita-prabandha-pratinàyakaḥ. *çrî-Kîrtivarma-nṛipater* ity atra 'upamà *bodhasya 'iva,* iti; *bodhas* tattva-jñànañ prakṛita-prabandha-sàdhyaḥ. — "na 'asûcitasya nàṭake niveçaḥ" iti niyamàt anantarañ pravekshyato Vivekasya sûcanam idañ.)

Z. 18. *çailûshâdhama* naṭâdhama! *(K. âḥ pâpa!* 'iti Sûtradhàram àkshipataḥ Kàmasya 'uktiḥ. *çailûsho* naṭaḥ.*)*

P. 6.

Çl. 10. *ayañ Kâmaḥ eti* samàyàti. kìdṛiçaḥ Kàmaḥ: *pulakitena* romàñcitena *bhujena Ratyâḥ*. *uttuṅgam* atyuccañ *pivarañ* màñsalañ yat *kuca-dvayañ,* tena *piḍitam aṅgañ* yathà bhavati tathà *âliṅgitaḥ*. punaḥ kìdṛiçaḥ: *çrîmân* çubhavàu *jaganti* sacetanàni *madayan* mattàni kurvan, tathà *nayanayor âbhirâmaḥ,* tathà *madana ghûrṇite netra-kamale* yasya sa sambhrànta-netraḥ. — *(K.* pravekshyantañ Kàmañ sûcayati: *uttuṅga* iti. *Kâmo 'yam eti* àgacchati. kìdṛiçaḥ: *pulakitena bhujena* viçishṭayà *Ratyâ uttuṅga-pivara-kuca-dvaya-piḍitâṅgañ* yathà syàt tathà *âliṅgitaḥ; pivarañ* pìnañ. *çrîmân* ity-àdi spashṭañ.)

Z. 9. *prastâvanâ* kathâ-saṅgatiḥ. *(K.*

naṭì, vidûshako vâpi, pàripàrçvika eva và,
Sûtradhàreṇa sahitàḥ sañlàpañ yat tu kurvate,
àmukhañ tat tu vijñeyañ budhaiḥ, *prastâvanâ* hi sà;

iti *prastâvanâ*-lakshaṇañ.)

Erster Akt.

P. 7.

Z. 1. *Yathâ nirdishṭaḥ* iti, "pûrva-çloke" iti çeshaḥ.

Z. 2. *âḥ pâpa 'iti paṭhitvâ* iti, âḥ pâpa çailûshâdhama 'iti pûrva-phakkikâm, iti çeshaḥ. — *bharatâdhama* naṭâdhama! ity arthaḥ.

Çl. 1. vidushâñ paṇḍitânâñ; *çâstra-sambhavo Vivekaḥ tâvat*-paryantañ *prabhavati* samutpadyate; tâvat kathañ? *yâvat*-paryantam *indîvarâkshîṇâñ* kamala-locanânâñ *dṛishṭi-viçikhâḥ* kaṭâksha-rûpa-bâṇâ *na patanti;* tâsâñ kaṭâksha-prakshepair andhî-bhûtam iva sacetanañ bhavati, iti bhâvaḥ. — (*K. çâstra-sambhavo Viveko* vicâryârtha-nirṇayaḥ *vidushâm api manasi tâvat prabhavati, yâvad indîvarâkshîṇâñ* nâyikânâñ *dṛishṭi*-rûpâ *madîya-viçikhâ na nipatanti*, ity arthaḥ.)

Çl. 2. etâni me mama *amoghâni* saphalâni *çastrâṇi parito jayanti yadi* sarvotkṛishṭâni yadi vartante, *bhoḥ* çailûshâdhama! *tat* tadâ *asau* çailûshâ-dhama-varṇito *Vivekas*, tasya *vibhavaḥ* sâmarthyañ *kîdṛik?* atha *Prabodhodayaç* ca *kîdṛik?* dvayam api na sambhavati, iti bhâvaḥ; etâni kâni? tâny âha: *ramyam* iti. *ramyañ harmyasya* gṛihasya *talañ* bhûmiḥ; *navâ* nûtanâḥ *sunayanâḥ* sulocanâḥ; *guñjantaḥ* çabdañ kurvanto *dvirephâḥ* bhramarâ yâsu, tâdṛiçyo *latâḥ; pronmîlantyo* vikasanaçîlâḥ *navamallikâḥ* mâlatyaḥ; *surabhayo vâtâḥ* sugandha-vâyavaḥ; *sacandrâ niçâḥ:* etâni me çastrâṇi. — (*K. hanta* harshe, *mama amoghâni etâni astrâṇi yadi parito jayanti* utkarsheṇa vartante, *bhoḥ* çailûsha! *tat* tadâ *'asau* bhavad-ukto Mahâmoha-parâbhava-rûpo *Viveka-vibhavaḥ kîdṛik? Prabodha-candrodayaç* ca *kîdṛik?* sarvathâ 'alîka eva, ity arthaḥ; astrâṇy eva darçayati: *ramyam* ity-âdi; *harmyañ* dhaninâñ vilakshaṇa gṛihañ, tasya *talañ* bhittiḥ; *navâ* nava-yauvanâḥ; *pronmîlantyâ* vikasantyâ *navamallikayâ surabhayaḥ* sugandhayaḥ.)

Z. 9. (*K. âryaputra!* iti nâṭake pati-sambodhanañ.)

Z. 11. tvaṁ *strî-svabhâva-sulabhaṁ bhayaṁ* mà kuru, aham atisamartho 'smi, ity âha:

Çl. 13. *api yadi* 'iti. *api yadi* yady api *viçikhâḥ* çarâḥ *çarâsanaṁ* dhanuḥ, etad dvayaṁ *kusumamayaṁ* pushpamayaṁ vartate, *tathâpi sasurâsuraṁ* surâsurair deva-daityaiḥ saha vartate tat sasurâsuram *akhilaṁ sarvaṁ idaṁ jagat*, bho *varoru! mama 'âjñâṁ atilaṅghya* ullaṅghya, *dhṛitiṁ* dhairyaṁ *muhûrtaṁ* kshaṇam api *na eti* na prâpnoti. — (*K. kusumamayam* ity atra liṅga-vacana-vyatyâsena 'anvayaḥ, tathâ ca *api* sambhâvanâyâṁ; he *varoru! yadi kusumamayâ viçikhâḥ, kusumamayaṁ çarâsanaṁ vâ*, mama vartate iti çeshaḥ, *tathâpi sasurâsuram idam akhilaṁ jagat, mama 'âjñâm abhilaṅghya, dhṛitiṁ muhûrtam* api *na eti*, ity arthaḥ.) —

P. 8.

Çl. 14. uktam arthaṁ prakaṭayati: *tathâ hi* 'iti. *Ahalyâyâ* iti. *Surapatiḥ* Indraḥ *Ahalyâyâḥ* Gautama-patnyâḥ *jâraḥ* upapatir *abhût; Prajânâtho* Brahmâ Manuḥ *âtma-tanayâṁ* Çatarûpâṁ *ayâsit*, sva-putrîṁ prati gato mithuna-bhâvaṁ prâptaḥ, ity arthaḥ; *Induḥ* Çaçâṅkaḥ *Guroḥ* Vṛihaspateḥ *abalâṁ* striyam *abhajata* sisheve; *iti* evaṁ-prakâreṇa *prâyo* 'tiçayena *mayâ ko vâ* pumân purushârthî *apathe* amârge *padam* sthânaṁ *na akâryata*, kiṁ tu sarve 'pi kâritâ eva, ity arthaḥ; kim adhikaṁ vâcyaṁ? *bhuvanânâm unmâthaḥ* unmâdas, tad-*vidhishu* tat-kartavyatâsu *mâdîyâ* ye *bâṇâs*, teshâṁ *çramaḥ ka iva?* na ko 'pi, ity arthaḥ. — (*K.* jagatâm adhairyam eva darçayati: *tathâ hi* 'iti. *Ahalyâ* Gotamasya patnî, *jâra* upanâyakaḥ; *âtmatanayâṁ* Sandhyâ-nâmnîṁ *Prajânâtho* Brahmâ *ayâsîd* upagatavân; *Guror* Vṛihaspater *abalâṁ* kântâṁ Târâ-nâmnîṁ *Indur abhajata* upagatavân; *iti* anena prakâreṇa *prâyaḥ ko vâ* jano *mayâ apade* asthâne *padaṁ* vyavasâyaṁ *na akâryata*, api tv akâryata eva; ato *bhuvanonmâtha-vidhishu iha* jagati *mad-bâṇânâṁ kaḥ çramaḥ?* ity arthaḥ.

padaṁ vyavasiti-trâṇa-sthâna-çreshṭheshu kîrtitaṁ,

iti koshaḥ.) —

Z. 9. *abhiyukta-mâtrât* pratikûla-saṅgât *drâg eva* çîghram eva *vighaṭishyante* vivekâd bhedaṁ prâpsyante. (*K. amâtyân* iti, yama-niyama-âsana-prâṇâyâma-pratyâhâra-dhyâna-dhâraṇâ-samâdhi-rûpân ashṭâv *amâtyân drâk* çîghraṁ *vighaṭishyante* palâyishyante.)

Çl. 15. *kopasya ahiṁsâ kâ 'ova?* na kâpi, ity arthaḥ; *mama* Kâmasya *brahmacaryâdayaḥ ke?* na ke 'pi; *amî satya-asteya-aparigrahâḥ lobhasya purataḥ ke?* na ke 'pi, ity arthaḥ. etâvatâ ete sukhena jetuṁ çakyâḥ, iti bhâvaḥ. (*K.* yamâdînâṁ vighaṭanaṁ darçayituṁ yat satva eva yamâdisatvam âdau tad vighaṭanam eva darçayati: *tathâ hi, ahiṁsâ* 'iti; *kopasya purata* ity evaṁ sarvatraiva *purata* ity asya 'anvayaḥ, *brahmacaryâdaya* ity âdi-padât sannyâsa-tapasyâparigrahaḥ; *asteyo* acauryaṁ, *aparigrahaḥ* apratigrahaḥ.)

Z. 14. yamâdeḥ kiṁ kâryaṁ? ata âha: *yama* 'iti. *bhatkaraṁ* sukaraṁ

samunmûlanañ nâço yeshâñ te. eteshâñ vijaye upântaram âha; *striya* iti; *asmad-gocarâḥ* asmad-adhînâḥ. (*K.* citta vikâreṇaiva eshâñ vighaṭanañ citta-vikâra-sattve ca sutarâñ yamâdînâñ vighaṭanam, ity âha: *yama* 'iti. *yamo* nishiddha-tyâgaḥ; *niyamo* vratañ; *âsanañ* upaveçana-prakâra-viçeshaḥ; '*prâṇâyâmaḥ* vâyoḥ pûraka-kumbhaka-recaka-rûpaḥ; *pratyâhâraḥ* upavâsâ-nantarañ niyatâhâraḥ; *dhyânañ* bhâvanâ; *dhâraṇâ* çikshitârthâbhyâsaḥ; *samâdhir* niçcala-cittatâ. — *kṛityâ* abhicârotpanna-hiñsra devatâ, *striya eva* 'eshâñ tâdṛiçya, ity arthaḥ. *asmad-gocarâ eva* 'iti strîṇâm asmad-adhînatve 'smin nigrâhyâ eva, ity arthaḥ.)

P. 9.

Çl. 16. adhînatve hetum âha: *yata* iti. *santu* iti. *vilokanam* avaloka-nañ; *bhâshaṇañ* madhurâlâpaḥ; *vilâso* vibhramaḥ; *parihâsaḥ* narma-kathâ; *keliḥ* krîḍâ; *parirambhaḥ* âliṅganañ, imâni *santu* tishṭhantu; *kâminînâñ smaraṇam api manaso vikârâya* vikârañ kartum *alañ* samarthañ, kim bahunâ? (*K. vilokanâdi* sakalañ puñsaḥ *kâminî*-vishayakañ bodhyañ.)

Z. 3. te asmad-vañçe sthâsyañty eva, ity âha: *viçeshataç ca* 'iti. *abhiyujyamânâḥ* âjñapyamânâḥ *narapatir* mahâmohaḥ tan-*mantriṇam adharmam*, adharma-mûlâ mohâdayaḥ. (*K. ete* yamâdayaḥ *narapati-mantriṇañ asman*-narapati-mahâmoha-mantriṇañ *mada-mâna-mâtsaryâdi*-vaçât *adharma-patheṇaiva* purushâ yamâdîn *âcarishyanti*, ity arthaḥ.)

Z. 6. (*K. utpatti-sthânañ* vañçaḥ.)

Z. 7. âḥ ârye ekam api kartṛitvâd âçcaryañ, tad eva âha: *tathâ hi*, iti.

Çl. 17. *îçvarasya* paramâtmanaḥ *saṅgât* sambandhât *mâyâyâm* avi-dyâyâñ *mana iti tanûjaḥ* putraḥ *viçrutaḥ* loka-viçrutaḥ *prathamam* âdau *sambhûtaḥ* utpannaḥ, *tena* manasâ *idañ sakalañ trailokyañ visṛijya* viçesha-taḥ sṛishṭvâ, *atho* anantarañ *bhûyo bhûyo* vârañ vârañ *idañ prasiddhañ no* asmâkañ *kula drayañ janitañ*, *mahâmoha-pradhânañ*, *viveka-pradhânañ* ca, tad eva 'âha: *tayor* iti. (*K.* manasa utpattau mâyâ-sahita-manaḥ-prabhava eva sañsâra iti vedânta-siddhântâvashṭambhena 'idañ, *îçvarasya saṅgâd* ity atra îçvarasya sisṛikshâdhîna-mâyâ-preraṇa-rûpa eva mâyâyâ îçvara-saṅgo bodhyaḥ. *îçvaraç* ca paramâtmâ, *tena* 'iti manasâ, ity arthaḥ. ata eva

"tanoti viçveçitur îpsiteritâ jaganti mâyeçvarateyam îçituḥ"

iti shashṭhâṅke [p. 108] vivekena 'îçvara-sisṛikshâ-preritayâ mâyayâ jagat sṛishṭir uktâ, na tu îçvarasya çṛiṅgâra-rûpât saṅgâd, ity arthaḥ.

'puñsaḥ saṅga-samujjhitasya gṛihiṇî mâyâ 'iti; tena 'apy asâv

'aspṛishṭâpi manaḥ prasûya tanayañ lokân asûta kramât" [p. 11]

ity atra îçvarâspṛishṭa-mâyayâ jagat-sṛishṭi kathana-virodhâpatteḥ, parañ tu tenaiva mâyâ na spṛiçyate, avidyâ daçâyâñ tu mâyayâ sa spṛiçyate vimohyate ca, ata eva 'agre

"svam api yad ayañ mâyâ-saṅgât pumân iti vismṛitaḥ,'

iti vivekasya 'uktiḥ [p. 14].)

P. 10.

Çl. 18. sodarânâm api dṛishṭam asti vairam, ity âha: *ekâmisham* iti. *sahodarâṇâṁ* gotrajânâṁ *ekâmisha-prabhavam eva vairaṁ samujjṛimbhate* prâkaṭî-bhavati, *iti jagati prasiddhaṁ;* atra dṛishṭântam âha: *hi* niçcitaṁ *Kuru-Pâṇḍavânâṁ pṛithvî-nimittaṁ* yathâ syât tathâ *tîvro* dâruṇaḥ *tathâ* atiprasiddhaḥ *bhuvana-kshaya-kṛit* bhuvana-nâço *virodhaḥ abhavat.* (*K. âmishaṁ* lobhya-dravyaṁ *ujjṛimbhate* vardhate; spashṭam anyat.)

Z. 5. ekâmisha-prabhavatvaṁ darçayati: *sarvam* iti; sugamaṁ.

Z. 8. (*K. çântaṁ pâpaṁ* ity atra çântam açrâvyam, ity arthaḥ.)

Z. 11. *nigûḍhaṁ* guptaṁ *vîjaṁ* kâraṇaṁ.

Z. 12. (*K. na udghâṭyate* na prakâçyate.)

P. 11.

Z. 1. *hatâçânâm* nashṭâçânâm, *kiṁvadanti* jana-çrutiḥ, loka-prasiddhiḥ na tu niçcayaḥ. *vidyâ* âtma-tattva-sâkshâtkâraḥ krûra-karma-karaṇâd *râkshasî* ity eva 'uktiḥ.

Z. 6. *kiṁvadanti-mâtram etad* iti punar âçvâsanaṁ.

Çl. 19. *prâjâpatyâ* Hiraṇyagarbha-sambandhinî *sarasvatî* bâṇî. *puṁsa* iti. *puṁsaḥ* parameçvarasya *gṛihiṇî* strî *mano*-rûpaṁ *tanayaṁ* putraṁ *prasûya* utpâdya, *lokân* bhûr-bhuvâdîn *kramât* çrutîritât çruty-ukta-mârgeṇa *asûta* janayâmâsa, kîdṛiçasya puṁsaḥ: *saṅgena* sambandhena *samujjhitasya* rahitasya, "asaṅgo hy ayaṁ purushaḥ" iti Çruteḥ. kîdṛiçî mâyâ: *tena* puṁsâ *aspṛishṭâ 'api* asambaddhâpi "asambaddhâ janayati" ity uktaṁ, iti na 'âçaṅkanîyaṁ, cumbaka-pâshâṇena 'asambaddhâ loha-çalâkâ cumbakaṁ yântaṁ anuyâti 'iti dṛishṭaṁ loke, tadvad ity arthaḥ. aghaṭita-ghaṭanâyatî yasyâm idaṁ sarvam api sambhâvyate, ity âha: *mâyâ 'iti.* anena viçeshaṇena *punaḥ*-çabda ânantaryârthaḥ *punaḥ* anantaram *asau vidyâ 'iti* prasiddha-*kanyâ tasmâd eva* manasa eva sakâçâj *janishyate* utpatsyate; asau kâ? yayâ *tâtaḥ* pitâ, te *sahodarâ* bandhavaç ca, *jananî* mâtâ, *sarvaṁ kulaṁ* kulântaḥpâtitvâd âtmâpi bhakshaṇîyâḥ, iti sarvaṁ tayaiva *bhakshyaṁ.* (*K. prâjâpatyâ* brâhmî *sarasvatî* âkâça-bâṇî-rûpâ. *puṁsa* ity âdi, *puṁsaḥ* âdipurushasya *saṅga-samujjhitasya* svabhâvato mâyâ-saṅga samujjhitasya, ata eva *tena 'aspṛishṭâ 'api* iti. *lokân asûta* iti sva-sâhâyyân "manodvârâ" iti çeshaḥ. tena "sambhûtaḥ prathamam iha" ity âdinâ [p. 9] manasâ trailokya-sarjana-kathanaṁ na viruddhaṁ;

"tanoti viçveçitur îpsiteritâ jaganti mâyeçvarateyam îçituḥ"

iti shashṭhâṅkoktir [p. 108] apy upapannâ, anyathâ atra manasâ jagat-sarjanaṁ shashṭhâṅke mâyayâ jagat-sarjanam anupapannaṁ syât. *tasmâd eva* 'iti, tasmân manasaḥ, 'upanishad-devy-udare" iti çeshaḥ, manasâ tadutpâdanaṁ ca sva-putra-viveka-dvârâ 'iti boddhavyaṁ; atraiva 'aṅke "vivekena upanishad-devyâṁ prabodhacandreṇa bhrâtrâ saha janayitavyâ" iti [p. 12] vidyotpatter vakshyamâṇatvâd, vakshyati ca shashṭhâṅke [p. 115]

devatânâṁ saṅkalpa-yonitvât upanishad-devyâ saha 'âlâpena saṅkalpa-vaçâd eva tad-udare vidyâ-prabodhau vivekâd garbhasthî-bhavishyataḥ; saṅkarsha-vidyayâ ca nididhyâsanena vidyâ manasi saṅkrâmayishyate, prabodhaç ca âdipurushe iti evaṁ ca saṅkrânti-vaçât. mano 'pi vidyâyâs *tâtaḥ*, mahâmoha-vivekâdayaç ca *sahodarâḥ*, kâma-krodhâdayaç ca *kulam*, etat *sarvaṁ tayâ bhakshyam* ity âha: *yayâ tâtaç ca* 'ity-âdi. *jananî* upanishad-devî, mâyâ tu kulântargatatvenaiva 'uktâ.)

Z. 15. *svagataṁ* manasy eva. (*K. svagatam* iti nâṭake manaḥ-kathâ-yâṁ, svagataṁ âtmagataṁ iti prayujyate, tathâ ca manasâ kathayati, ity arthaḥ.)

Çl. 20. *adhîrâkshyâḥ* capalâkshyâḥ *parîrambhaḥ* âliṅganaṁ *modam* âmodaṁ *janayati* utpâdayati, *sammohayati* ca, sammoho vishayântara-vismaraṇaṁ karoti, ity arthaḥ. kîdṛiçaḥ parîrambhaḥ: *sphurad-romodbhedaḥ* româñcodgamo yena saḥ; punaḥ kîdṛiçaḥ: *bhayena 'utkaṭaḥ kampo* yayos, tau ca tâv *uttuṅgau* uccau *stanau* ca, tayor *yugaṁ* yugmaṁ, tasya *bharas*, tad-*âsaṅgena* sambandha-viçesheṇa *subhago* manoharaḥ; punaḥ kîdṛiçaḥ: *guñjat* çabdâyamânaṁ *maṇi-valayaṁ* yasyâṁ, tâdṛiçî *dor-latâ* bâhu-vallî, tayâ *racitaḥ* sampâditaḥ. kîdṛiçyâḥ adhîrâkshyâḥ: *taralatarâ târâ* akshṇaḥ kanînikâ, tayâ *âkulâ* vyâkulâ *dṛik* yasyâḥ. (*K. adhîrâkshyâç* cañcalâkshyâ Ratyâḥ *parîrambhaḥ* âliṅganaṁ mama *modaṁ janayati, sammohayati ca*; parîrambhaḥ kîdṛiçaḥ: *sphuran* arthâu mama *romodbhedo* româñco yasmât tâdṛiçaḥ. adhîrâkshyâḥ kîdṛiçyâḥ: *taralatarayâ târayâ* cakshuḥ-kanînikayâ *âkula-dṛiçaḥ*. parîrambhaḥ punaḥ kîdṛiçaḥ: *bhayena 'utkampo* yaḥ *uttuṅga-stana-yuga-bharaḥ* gurutara-stana-yugaṁ, tad-*âsaṅgana-subhagaḥ*.)

P. 12.

Z. 3. (*K. prakâçam* iti manaḥ-kathânantaraṁ prakâçaṁ bravîti, ity arthaḥ.)

Z. 7. *vâḍham* avaçyaṁ "sammatâ" iti çeshaḥ. *sâ* vidyâ, anâvṛita-brahmâkârântaḥkaraṇa-vṛitty-upahitaṁ caitanyaṁ *prabodhacandraḥ*. (*K. vâḍham* ity abhyupagame teshâṁ sammataiva, ity arthaḥ.)

Z. 13. (*K. sva-pratyavâyaḥ* svânishtaṁ.)

Çl. 21. *malinaṁ* dushṭam, ata eva *vakraṁ bhâvaṁ* cintâbhiprâyaṁ *bhajanti* sevante ye, teshâṁ *bhavaḥ* utpattiḥ *prabhavasya* utpatti-sthânasya *âtmanaç* ca *nâça-hetur bhavati*. ukte 'rthe 'rthântara-nyâsaḥ: *dhûmo jala-dhara-padavîm avâpya* megha-mârga-paryantaṁ gatvâ, svotpatti-sthânaṁ *vahnis*, tan-*nâçam anu nâçaṁ prayâti*; dhûmo 'pi malina-vakra-bhâvaç ca, iti bhâvaḥ. (*K.* dvandva-sthayor *malina-vakra*-pâdayor uttara-varti-*bhâva*-padasya 'ubhayatra sambandhaḥ; tatha ca *svabhâvato malinabhâva-vakra-bhâva bhâjâṁ* janânâṁ *bhava* utpattis tadîya-*prabhavasya* janakasya, *âtmanaç* ca *nâça-hetur bhavati*. tathâ ca vivekâdayo 'pi svabhâvato malina-bhâvâ vakra-bhâvâç ca sva-janakaṁ, svaṁ ca nâçayishyanta eva, iti bhâvaḥ.

tatra dṛishṭântaṁ âha: *jaladhara* 'iti. *jaladhara-padavîm* jaladharatvaṁ, tathâ ca Kâlidâsaḥ:

"dhûma-jyotiḥ-salila-marutâṁ sannipâtaḥ kva meghaḥ?"
[Meghadûta. çl. 5.]

jvalana-vinâçam anu jvalana-vinâçasya paçcâd, ity arthaḥ. *prayâti nâçam* iti vṛishṭy-anantaraṁ megha-nâçât. dhûmasyâpi malinabhâva-vakrabhâvau pratyaksha-siddhau bodhyau.)

P. 13.

Z. 1. *nepathye* javanikâyâṁ.

Çl. 22. *guror* iti; *avaliptasya* sagarvasya, *utpatha-pratipannasya* unmârga-gâminaḥ; çeshaṁ sugamaṁ. (*K.* tâtâdi-badha-kâriṇyâ vidyâyâ utpattir asmâbhir ishyate durvinîtatâ-nâçâya, ity ataḥ *katham asmân âkshipasi* ucitârtha-pravṛittatvâd, ity âha: *nanv are*, iti. *guror api nyayyo daṇḍo vidhîyate*, ity anvayaḥ. *avaliptasya* kalaṅkinaḥ, *utpathaṁ* dharma-virodhi-pathaṁ.)

Z. 5. *gâthâṁ* pada-sandarbha-rûpâṁ. *anena* 'iti. *janakena* manasâ *ahaṅkârânuvartinâ* ahaṅkârâdhyâsa-yuktena *jagat-patiḥ pitâ* '*eva* parameçvara eva. (*K.* tad eva 'aliptatvâdikaṁ manasi darçayati: *anena ca* 'ity-âdi. *anena* manasâ *ahaṅkârânuvartinâ* ahaṅkâra-rûpa-pâça-sahâyena *pitâ* paramâtmâ, ahaṁ gaura ity-âdi buddhir *ahaṅkâraḥ*, tena *baddhaḥ* sambaddhaḥ, ity arthaḥ. dvitîyâṅke dambhâçramaṁ pravekshyann ahaṅkâras tu svasya sarvâdhikya-buddhi-rûpo 'vadheyaḥ.)

Z. 8. (*K. kula-jyâyân* kula-çreshṭhaḥ. *devyâ matyâ* iti sammatâ 'ity arthaḥ.)

Çl. 23. *ya eshaḥ* pûrvokto vivekaḥ *matyâ* buddhyâ *vibhâti*. kathaṁbhûtayâ matyâ: *râgâdibhir nitântam* atiçayena *kalushî-kṛitayâ*. kîdṛiçai râgâdibhiḥ: *sva-rasa-câribhiḥ* avivicya svecchayâ pravṛittaiḥ; *âdi*-çabdât madamohâdayaḥ, tair *âttâ kântir* yasya. utprekshate: *nirbhartsyamâna iva* nishprabhî-kriyamâṇa iva, *mâna* eva *dhanaṁ* yasya, *kṛiçâny aṅgâni* yasyâ. kaḥ ka iva: *kântyâ çaçâṅka iva*. kîdṛiçaḥ çaçâṅkaḥ: *sândreṇa* niviḍena *tuhinena* himena *antaritaḥ* châditaḥ. (*K.* pravekshyato vivekasya 'avasthâṁ sûcayati: *râgâdibhir* iti. *ya esha matyâ saha vibhâti*, ity anvayaḥ. kîdṛicyâ matyâ: *nitânta kalushî-kṛitayâ*, mahâmoha-prabhâveṇa virala-pracâratvâu nitânta duḥkhitayâ, ity arthaḥ. yaḥ kîdṛiçaḥ: *sva-vaça-câribhir râgâdibhir âttakântiḥ*, çobhitaḥ, ity arthaḥ. *râgaç ca* 'atra mukty-anurâgaḥ vishaya-râgavyâvartanâya *sva-vaça* 'iti. *âdi*-padât yama-niyamâdi-parigrahaḥ. punaḥ kîdṛiçaḥ: *kṛiçâṅgaḥ* mahâmohâbhibhavâd iti bodhyaṁ. tatra dṛishṭântam âha: *nirbhartsyamâna* 'iti, kenacit tiraskriyamâṇo *mâna-dhano* mânî jana iva kṛiçâṅgaḥ, ity arthaḥ.)

Z. 11. *tan na yuktam* ity anena kâma-ratyoḥ niḥprabhavatvaṁ vivekodaya-mâtreṇa pradarçitaṁ.

Z. 15. *Vishkambha* iti; prâktana-naṭa-saṅkshepaḥ utkṛishṭa-pâtra-praveçaḥ. (*K. vishkambhaka* iti.

kuto 'pi svecchayâ prâptâḥ saṅlâpaṁ yat tu kurvate,
vishkambhakaḥ sa vijñeyaḥ kathâ-mâtrasya sûcakaḥ;
jana-dvaya-prayojyaç cet, sa eva syât praveçakaḥ.

iti tal-lakshaṇaṁ.)

Z. 17. (*K. râjâ* Vivekaḥ. — *visphûrjitaṁ* vyâpaka-kathâ.)

Z. 19. (*K. kim âtmano doshaṁ loko 'vijânâti?* na jânâty eva, ity arthaḥ.)

Çl. 24. *taiḥ* prasiddhaiḥ *madâdibhiḥ asau jagat-prabhuḥ* paramâtmâ *ciraṁ* cira-kâlaṁ, *dinâ* yâ *daçâ* ânanda-çûnyâ yâ daçâ, tâm *aniyata* prâpitaḥ. kîdṛiçair madâdibhiḥ: *ahaṅkâraḥ paraḥ* prathamo yeshâṁ, taiḥ; punaḥ: *durâtmabhiḥ* dushṭa-svabhâvaiḥ. kiṁ kṛitvâ: *pâça-çataiḥ*, pâçâḥ vâsanâ-saṅskârâḥ, tad-rûpair *nibadhya* niyamya. kîdṛiço jagat-prabhuḥ: *cid-ânandamayaḥ* jñâna-svarûpaḥ; punaḥ kîdṛiçaḥ: *nirañjanaḥ* nirgatam añjanaṁ mohâvaraṇaṁ yasmât. (*K. asau jagat-prabhur* âdipurushaç *cid ânandamayaḥ*, cit jñânaṁ tat-svarûpânandâtmako, *nirañjano* nirlepaḥ, pâpâdi-lepa-rahitaḥ, ity arthaḥ. *durâtmabhis taiḥ* prasiddhair *madâdibhiḥ pâça-çatair nibadhya*, *dina-daçâm aniyata* prâpitaḥ. madâdibhiḥ kîdṛiçaiḥ: *ahaṅkâra-paraiḥ*, ahaṅkâra-pradhâna-pâçair, ity arthaḥ. çarira-bandhâd ahaṅkâra-pâça-bandho duḥkhabhâgî-kṛitaḥ, ity arthaḥ.)

Z. 7. (*K. jitam* ity upahâsena 'utkarsha-kathanaṁ.)

Z. 8. (*K. sphuran sakala-tribhuvane prabhâvo* yasya, tâdṛiçaç ca 'nanu-*nitya-prakâçaç* ca, 'iti karmadhârayaḥ.)

Çl. 25. *pumân sahajaṁ* svâbhâvikam *api dhairyaṁ tyajati* aupâdhikaṁ tyajati 'ity atra kiṁ citraṁ? dhairya-tyâge hetum âha: *stribhir* iti. *stribhiḥ pratâritaṁ* vañcitaṁ *mânasaṁ* yasya, saḥ. *uccair* iti sarvatra sambandhanîyaṁ; kîdṛiço 'pi: *satataṁ* nirantaraṁ *dhṛitir* dhairyaṁ yasya, tâdṛiço 'pi; *çânto 'pi* jitendriyo 'pi; *avâpto mahodayaḥ* aiçvaryaṁ yena, tâdṛiço 'pi; *adhigataḥ* jñâtaḥ *nayo* nîtir yena, tâdṛiço 'pi; *antaḥ-svastho 'pi* avyagrântaḥkaraṇo 'pi; *udirità* samayocità *buddhir* yasya, tâdṛiço 'pi. svasminn eva 'idaṁ sarvam avalokyatâm, ity âha: *svam api* 'iti. *yat* yasmâd hetoḥ *mâyâ saṅgâd* avidyâ-sambandhât *pumân* paramâtmâ *svam* âtmânam api *iha* idânîṁ *vismitaḥ*. *api*-çabdaḥ tat-padârtha-vyatireka-samuccayârthaḥ. (*K. stribhiḥ pratârita-mânaso* janaḥ *satata dhṛity-âdi*-viçishṭo *'pi sahajaṁ dhairyaṁ tyajati*. *mahodayo* mahâdhipatyaṁ, içvarasya tu mâyâ-preraṇâj jagat kartritvam eva, tad vakshyati ca: 'tanoti" [etc. p. 108] iti, na' yoûbhiḥ; *antaḥ svacchaḥ* akuṭilaḥ, içvarasya tu nirlepatvam eva 'antaḥ-svacchatvaṁ; *udita dhitvaṁ* utkaṭa buddhitvaṁ, içvarasya tu sarvajñatvam eva tat. tasya içvarasya

kayâ striyà pratàraṇaṁ? ity atra 'àha: *svàm api* 'iti. "ahaṁ nirguṇo nirlepaḥ *pumân*" ity evaṁ *svaṁ yan mâyâ*-rùpa-strì-*saṅgàd vismṙitaḥ*, ity arthaḥ. màyà-saṅgaç ca 'avidyà-daçàyàṁ eva, ity uktaṁ pràk, tathà ca màyà-saṅgàd eva 'ahaṅkàràdi-baddho 'bhùt, ity arthaḥ; ahaṅkàraç ca "ahaṁ gaura" ity-adi jñànam, ity uktaṁ pràk.)

P. 15.

Z. 1. Matir ajànati màyà-kàryaṁ pṙcchati; màyà-kàryaṁ prakaṭayati: *avicâra* 'iti. *avicâra-siddhâ* anirvacanìyà, sattvena và vicàrayitum açakyà, *vâravilâsinî* veçyà '*iva asato bhâvân* avidyamànàn kartṙitva-bhoktṙitvàdìn *upadarçayanti vañcayati*. yadi na pratyayase tarhi paçya, 'ity àha:

Çl. 26. *paçya paçya* 'iti. kiṁ paçya? 'ity àha: *sphaṭika* 'iti. *anàyâ* màyayà *anâryayâ* açleshṭayà anartha-kàriṇyà *bhâsvân* svayaṁ-prakàço *devaḥ* paramàtmà *pragâḍham* atiçayena *kâm api* anirvacanìyàṁ *vikṙitiṁ* vikàraṁ *nîtaḥ* pràpitaḥ, tarhi sàkshàtkṙitàrthà 'iva jàtà, 'ity àha: *tad-upaçleshâd* iti, tat-saṁsargàt *asya* àtmano *manâg api* ìshad api *ruciḥ* sva-svarùpa-prakàçaḥ *na khalu apaiti* gacchati. tatra hetuḥ: *asaṅgata-vikrìyaḥ*, *asaṅgatâ* asambhàvità *vikriyâ* vikàro yatra. tatra dṙishṭàntaḥ: *sphaṭikamaṇivat*, yathà sphaṭikaḥ japà-kusuma-sannidhànàt rakto 'pi svàbhàvika-çvaityaṁ na jahàti, tathà 'upàdhi-sannidhànàt vikṙito 'pi sva-rùpàn na hìyate, ity arthaḥ. yady apy evaṁ, *tathâpi vâḍham* atiçayena *eshâ* màyà *adhìratâṁ vidhâtuṁ* sva-svarùpaṁ tat pracyàvayituṁ *prabhavati* vartate. — (*K. avicâra-siddhâ* vicàràgamyà parapurusha-pratàraṇe *veçavilâsinî*, 'iti dṙishṭàntaḥ, tatra *mâyâ*-pakshe *asato* alikàn *bhâvân* padàrthàn *parapurushaṁ* pradhàna-purushaṁ, *veçavilâsini*-pakshe ayuktàn helà-lìlàdi-*bhâvân para-purushaṁ* svàpariṇetṙi-purushaṁ. màyayà àdipurusha-vañcanaṁ darçayati: *paçya* 'iti: *asaṅgata-vikriyaḥ* svabhàvato apràpta-vikriyo *devaḥ sphaṭikamaṇivad bhâsvân* dìpyamàno *anàyâ anâryayâ* màyayà *pragâḍhaṁ vikṙitiṁ nîtaḥ*. tasya nirlepa-dìpyamànatà-rùpà *rucir* màyayà nàçayituṁ na çakyata eva, tathàpy avidyà-daçàyàṁ tayà 'abhibhùyate, ity àha: *na khalu*, iti. *manâg* alpam api *asya* tàdṙiçi *rucir na naçyati*, tathâpy avidyà-sàhàyyàd *eshâ* '*asya* '*adhìratâṁ vidhâtuṁ prabhavati*, ity arthaḥ.)

Z. 11. *prayojanaṁ* kàryaṁ.

Çl. 27. *vâma-nayanâḥ* kapaṭa-dṙishṭayaḥ. *sadayaṁ* yathà syàt tathà '*narâṇâṁ hṙidayaṁ praviçya*, *kiṁ nâma samâcaranti? viḍambayanti* anukurvanti, ity arthaḥ. çeshaṁ sugamaṁ. (*K.* saṁvartamàno yaḥ çubhàvaho vidhir yatra, tat *sadayaṁ*, tàdṙiçaṁ *narâṇâṁ hṙidayaṁ praviçya*, *etâḥ* strì-piçàcyaḥ *sammohayanti*, ity-àdi; tatra *sammohanaṁ* jñàna-hàniḥ; *madanaṁ* harsha-jananaṁ; *viḍambanaṁ* 'nànà-durgati-pràpaṇaṁ; *vikshobhaṇaṁ* cañcalìkaraṇaṁ; *ramaṇaṁ* krìḍà; *vishâdo* duḥkha-viçeshaḥ; strì-pràpty apràpti daçà-bhedena 'etàni bodhyàni.)

P. 16.

Z. 3. *sva-tanayaṁ* mano-rûpaṁ *pâramoçvare pade* âtma-vyavahâra-vishaye sthâne *niveçayâmi* sthâpayâmi, ity arthaḥ. *nitânta-pratyâsannatayâ* abheda-sambodhena. *nava-dvârâṇi purâṇi* çarîrâṇi.

Çl. 28. *teshu* çarîreshu *eko 'pi* eka eva paramâtmâ *vicchidya 'iva* pṛithak kṛitvâ 'iva *bahudhâ* aneka-prakâro *viniveçita* iva praveçita iva; bimba-pratibimba-nyâyena praveçaḥ, ity arthaḥ. *atho* anantaraṁ *tasmin sva-ceshṭitaṁ* kartṛitva-bhoktṛitva-sukhitva-duḥkhitva-dharmaṁ *vidadhâti* prakshipati. tatra dṛishṭântaḥ: *maṇâv iva;* yathâ japâdi-rûpâdhiḥ. sva-dharmaṁ raktatvâdi maṇau prakshipati, tadvat, ity arthaḥ. (*K. sva-tanayaṁ* manaḥ. *pârameçvara-padaṁ* jagad-âdhipatyaṁ. *nitânta-pratyâsannatvaṁ* paramâtmany atyanta-sânnidhyaṁ. *tad-rûpam iva* tad-abhinnam iva. *nava-dvârâṇi purâṇi* nava-chidra-viçishṭa-çarîra-rûpâṇi. *bahudhâ vichidya 'iva teshu niveçitaḥ*, ity arthaḥ. vichinna-prâyatâ ca tattac-chârîra-bhedena tasya bhinnatva-buddhy-utpâdaḥ. atho pureshu niveçanânantaraṁ tan manas *tasminn* âdipurushe *sva-ceshṭitaṁ vidadhâti* janayati, mano yad yat karoti, tat tad eva sa eva karoti, iti darçayati, ity arthaḥ. vastutas tu nishkriyatvât atra dṛishṭântam âha: *maṇâv iva*, 'iti. svaccha-maṇi-pravishṭa-pratibimba iva, ity arthaḥ. pratibimba-pratiyogî purusho yathâ maṇi-pravishṭe sva-pratibimbe sva kriyâṁ darçayati, tadvat, ity arthaḥ.)

Z. 12. avaçyântaram apy âha: *tato 'sau*, iti. *asau* paramâtmâ *ahaṅkâreṇa naptrâ cittasya jyeshṭha-putreṇa parishvaktaḥ:* "aham" iti vyavahâra vishayaḥ kṛitaḥ, iti yojanâ. *tataç ca âsâv îçvara* ity agrima-çlokopaskâraḥ; tataḥ kiṁ syâd? ata âha:

Çl. 29. *jâto 'ham* iti. *vidvân îçvaraḥ avidyâmayîṁ* avidyâ-pradhânâṁ *nidrâm etya* prâpya, *bahu-vidhân* anekâkârân *imân svapnân paçyati.* kîdṛiço vidvân: *vighûrṇitaḥ* vismṛita-sva-svarûpaḥ; punaḥ kîdṛiçaḥ: *cittasya* manasaḥ *spanditaṁ* ceshṭitaṁ, tasya *kalpanâṁ* racanâṁ *anugatan* anugacchan. imân kân? ity âha: *jâto 'ham* ity-âdi; *janako mama 'eshaḥ*, iti yojanâ; sugamam anyat. (*K. naptrâ* pautreṇa *parishvaktaḥ* san, *bahu-vidhân svapnân paçyati*, ity anvayaḥ. svapnâkâram âha: *jâto 'ham*, iti. *mama 'eshaḥ*, ity atra *esha* ity asya liṅgana-vacana-vyatyayena *janany*-âdau sarvatra 'anvayaḥ; *kshetraṁ* bhûmiḥ; *vasu* dhanaṁ; *balaṁ* sainyaṁ; *suhṛit* sva prîti vishayaḥ svasmin prîtimânç ca; *mitraṁ* tu sva-kârya-sahâyaḥ; *bândhavâḥ* kuṭumbâḥ. svapnân paçyati kîdṛiçaḥ san: *avidyâmayîṁ nidrâṁ etya vighûrṇitaḥ* san, mâyâm *anubhavan*- prâpnuvan, mâyâ-parishvakto bhavan, iti yâvat. mâyâṁ kîdṛiçîṁ: *cittena* manasâ *spanditâ* janitâ *kalpanâ* preraṇâ yasyâṁ, tâdṛiçîṁ; mano-'dhînayâ mâyâ-preraṇayâ viçishṭaḥ san, ity arthaḥ.)

P. 17.

Z. 6. (*K. sershyaṁ* sapatnyàm irshyà-yuktaṁ.)

Çl. 30. yadi *upanishad-devyâḥ mayâ* saha *saṅgamaḥ* syàt, tadà *prabodhodayaḥ prâptaḥ*, ity anvayaḥ. kìdṛiçyàḥ upanishad-devyàḥ: *mâninyâḥ*,

îrshyà-kṛitaḥ kopo *mâna* ity abhidhìyate,

ìrshyà-kṛita-kopavatyàḥ; *ciraṁ viprayogo* viyogaḥ, tena *janitâ* yà *asûyâ* ìrshyà, tayà *âkulâyâḥ* vyàkulàyàḥ. saṅgame hetur: *çânty-âder anukûlanât*, iti. hetv-antaram àha: *bhavati vishayân apâsya muhûrtaṁ tûshṇîṁ tishṭhet cet, tadà jâgrat-svapna-sushupti-dhâma-virahât*, iti; *dhâma*-çabdo 'trà sthànavacanaḥ. *dhâmâni* trìṇi bhavanti: sthànàni, janmàni, nàmàni, iti nairuktàt; tathà ca 'ayam abhipràyaḥ: jàgrad-àdy-abhimàna-sthànàbhàvàt, çànty-àdimato vicàra-pravṛittasya buddheḥ vyàsaṅgàbhàvàt prabodhotpattiḥ, iti. (*K. cet*, ity asya pùrvàrdhe 'pi anvayaḥ; tathà ca: *cira-viprayogeṇa janitayâ* mayy *asûyayâ âkulâyâḥ mâninyâḥ upanishad-devyâḥ çânty-âder anukûlanât mayâ saha saṅgamaç ced bhavet; vishayân apâsya, bhavati muhûrtaṁ tûshṇîṁ cet tishṭhet, jâgrad*-daçàyàm eva *svapnaḥ*, sa eva *sushupti-dhâma*, sushuptipadàçrayaḥ sushupti-pada-vàcyaḥ, iti yàvat; tad-*virahât prabodhodayaḥ prâptaḥ* pràpta-pràyaḥ, ity arthaḥ, "purusaena," iti çeshaḥ. *çânty-âdeḥ*, ity *âdi*-padàt çraddhàparigrahaḥ. *anukûlanât* anunayàt. paramàtma-svarùpapratipàdako vedasya bhàga-viçesha *upanishat*. *vishayâpâsena* mates *tûshṇîṁsthitir* dvaitàgràhitvaṁ. *prabodhodayas* tattva-jñànotpattiḥ.)

P. 18.

Z. 1. *dṛiḍha-granthir* 'ahaṅkàraḥ, tan-*nibaddhasya* tad-abhimànino 'pi *yadi bandha-mokshaḥ* saṁsàràn nivṛittiḥ, *tadâ tayâ* anàdi-màyayà *nityânubandha eva* ahaṅkàràbhimàny eva sarvadà *bhavatu*, iti pràkṛitànvayaḥ. ahaṅkàrasya paràmate nityatvàt tan nàçàbhàvàt, iti bhàvaḥ. (*K. kûlaprabhoḥ* paramàtmanaḥ. *etayâ* upanishad-devyà *saha bhavatu*, iti, "atrabhavàn," iti çeshaḥ. *sushṭhu* çobhanaṁ.)

Çl. 31. *mayâ asau* àtmà *brahmaikatâṁ* cid-ànanda-brahma-bhàvaṁ *nîyate*. kiṁ kṛitvà: *teshâṁ* pùrvoktànàṁ *brahma-bhidâṁ* brahma-bhedakànàṁ *vidyayâ* brahmàdvaita-sàkshàtkàreṇa *prâyântikaṁ* dehàntaṁ *prâyaçcittam idaṁ* prasiddhaṁ *vidhâya* kṛitvà. teshàṁ ity atra te ke? *yair jagatâm âdiḥ prabhuḥ* sva-tantraḥ *çâçvato* avinàçi, evaṁ-bhùto 'pi *purushaḥ* parameçvaraḥ *pureshu* nara-nàrakàdishu, *eka* eva *bahudhâ vibhajya*, *badhvâ*, *kshiptvâ* praveçya, *mrityoḥ padaṁ* janana-maraṇa-sthànaṁ *prâpitaḥ*. (*K. yair* ahaṅkàràdibhir *ekaḥ* paramaḥ, *çâçvato* nityaḥ, *jagatâm âdiḥ prabhur baddhvâ, pureshu* çarìra rùpeshu, *bahudhâ vibhajya*, *kshiptvâ*, *mrityor* Yamasya *padam* adhikàra-rùpaṁ vyavasitiṁ, *prâpitaḥ*, *brahma bhidâṁ* paramàtma-

svarûpa-brahma-bhedakânâm *teshâm prâṇântikam prâyaççittam vidyayâ* dvâra-bhûtayâ *vidhâya, punar asau mâyâ brahmaikatâm nîyate*, ity anvayaḥ. anyeshâm api brâhma-bhidâm brâhmaṇa-hantṛiṇâm smṛiti-vidyayâ upadeshṭryâ prâṇântikam prâyaççittam râjñâ vidhîyate, iti çleshâd, atra tathâ tv âropaḥ.)

Z. 9. *prastuta-vidhânâya* pûrvoktârtha-siddhaye, *prabodhotpattaye* advitîyâtma-sâkshâtkârotpattaye.

Zweiter Akt.

P. 19.

Prathame 'ṅke ajñàna-kṛito nikhilo 'pi bhedâvabhàsaḥ; "âtmà dvaitâvabhàsàn nirasyaḥ" iti pratipàdya, Vivekodyogam upaçrutya, idànîm dvitîye 'ṅke Mahàmoho 'pi tattad-dharmânushṭhàna-vaiphalyàya Dambhâdîn preshayati. tathà 'uktaṁ: dambhair vinà yaḥ kriyate, sa eva dharmaḥ, iti. — (*K.* aṅkâdau praveçaḥ kvacid asûcitasyâpi bhavati, ity asûcitasyâpi Dambhasya praveçaḥ. — "*pratijñâtam*" ity-àdiḥ "*prayatatàm*" ity-anto Mahàmohasya 'àdeçaḥ; nishpàdito tad-àdeçasya Vàràṇasyàṁ kṛitâçramasya 'upavishṭasya Dambhasya 'uktis: "*tad idànîm*" iti, "*vṛittàntam anutarishyâmi*" ity antà. para-pratàraṇârtham alika-svotkarsha-pradarçanaṁ *dambhaḥ.*)

Z. 5. *sâmâtyena*, amàtyàḥ mantriṇaḥ, tat-sahitena.

Z. 7. *avahitaiḥ* avadhàna-yuktaiḥ; sàvadhànaiḥ, ity arthaḥ. — *pratikartavyaḥ* dûrîkartavyaḥ. —

Z. 9. *niḥçreyasa-vighnârthaṁ* moksha-pratibandhârthaṁ. — *prayatatàm* iti, atiçayito yatnaḥ kriyatàṁ, alpa-yatnena na bhavati, iti bhàvaḥ. — (*K. vaçîkṛita bhûyishṭhâ* dàmbhikikṛitâneka-dhàrmika-janà.)

Z. 11. *yathà nirdishṭaḥ* yathà tvayà 'uktaḥ *àdeçaḥ* àjñà.

Çl. 1. *mayà* Dambhena *adhishṭhitaiḥ*, dàmbhikaiḥ, ity arthaḥ. *dhûrtair* vañcakaiḥ *divà* dina eva *jagat* nara-nàrì-samudayâtmakam *iti* anena prakàreṇa *sarvajñatvàdi*-vyapadeçena *vañcyate* pratàryate. kiṁ kṛitvà: *veçyàveçmasu* vàravilàsinî-mandireshu *kshapàḥ* ràtriḥ *nîtvà* parikalayya. kîdṛiçyaḥ kshapaḥ: *unnidraḥ* prakàça-yuktaḥ prakaṭaḥ *candro* yàsu, tàḥ. kîdṛiçair dhûrtaiḥ: *sîdhu* madyaṁ, tad *gandho* yatra tàdṛiçaṁ *lalanà vaktraṁ* kàminî-mukhaṁ, tatra *àsavo* màdaka-dravya viçeshaḥ, madirà và, tayà *àmoditaiḥ* santushṭaiḥ. punaḥ kîdṛiçaiḥ: *nirbharaḥ* atiçayitaḥ *manmathotsave* maithune *rasaḥ* prîtir yeshàṁ, taiḥ. sugamam anyat. — (*K. mad-adhishṭhitair dhûrtair* dhûrtatàṁ pràptaiḥ *veçyà veçmasu nirbhara-manmathotsava-rasair unnidra-candràḥ* jàjvalyamàna candràḥ *kshapàḥ* ràtrir *nîtvà*, *divà sarvajñà* vayam *ity-*

âdi-pradarçanât *jagad vañcyâte*. manmathotsava-rasaiḥ kiḍriçaiḥ: *sîdhu-gandhibhir* madhu-gandhibhiḥ veçyâ-rûpa-*lalanâ-vaktrâsavair* vaktra-madirâbhiḥ, *âmoditaiḥ* abhinanditaiḥ çlâghitaiḥ, iti yâvat. *dikshitâḥ* gṛihita-vratâḥ. *cirât* cira-kâlaṁ vyâpya; *cirâd*, ity asya 'avyayatvât.)

P. 20.

Çl. 2. pûrvârdhaṁ sugamaṁ. *vâg-jâlaiḥ bhartsayan* nirbhartsayan, *jagat-trayam* ity anushaṅgaḥ; *upahasan* upahâsaṁ kurvann *iva*, ity atrâpy anushaṅgo *jagat-trayam* iti.

Z. 6. *asya vṛittântaṁ* samâcâram *anusarishyâmi* jñâsyami.

Z. 8. (*K.* svasmin sarvâdhikya-jñânam *ahaṅkâraḥ*.)

Çl. 3. *nṛi-paçubhiḥ* manushya-rûpaiḥ paçubhiḥ *guroḥ* Prâbhâkarasya *mataṁ naiva 'açrâvi* naiva çrutaṁ. *Tautâtitaṁ darçanaṁ* Kaumârilaṁ çâstraṁ *na viditaṁ* naiva jñâtaṁ, ity *eva*-kârânushaṅgaḥ sarvatra. *aho* ity âçcarye, *Çâlika-girâṁ* Prâbhâkara-matâvalambi-vâcâṁ *tattvaṁ* anâropita-rûpaṁ svarûpaṁ *na 'eva jñâtaṁ*. *Vâcaspateḥ* Nyâya-bhâshya-vyâkhyâtuḥ Vedânta-bhâshya-vyâkhyâtuç ca *kâ kathâ?* na kâpi vârtâ, ity arthaḥ. *Mahodadheḥ* Çesha-praṇita-bhâshyasya *sûktaṁ* spashṭam *api na adhigataṁ*, duruktaṁ tu na sutarâṁ. *mahâvrataṁ* Pâçupata-vrataṁ, tat-sambandhinî *Mâhâvratî* Pâçupata-çâstra-saṁhatiḥ *na îkshitâ* naiva dṛishṭâ. *vastu-vicâraṇâ sûkshmâ*, *vastu* aupanishadaṁ Brahma, tad *vicâraṇâ sûkshmâ* durvijñeyâ, ity arthaḥ. evaṁ sati *svasthaiḥ* "paṇḍitânâm asmâkaṁ na kiñcid vivecanîyam asti" iti svastha-cittaiḥ *kathaṁ sthiyate?* ity arthaḥ. — (*K. nṛi-paçubhiḥ* samasta-nara-rûpaiḥ paçubhiḥ *kathaṁ susthaiḥ sthiyate*, yato *guroḥ* prasiddha-mîmâṅsakasya *mataṁ naiva 'açrâvi* naiva çrutaṁ; *Tautâtikaṁ* Tutâta-bhaṭṭa-kṛitaṁ *darçanaṁ na viditaṁ* na jñâtaṁ; *aho Sâlika* nâmno grantha-kârasya *girâṁ tattvaṁ na jñâtaṁ*; *Vâcaspater girâṁ* jñânasya *kâ kathâ?* sarvathaiva taj jñânaṁ na jñâtam, ity arthaḥ; *Mahodadher* Mahodadhi-nâma-darçanasya *sûktaṁ* çobhanam uktaṁ *na adhigataṁ* na jñâtaṁ; *Mâhâvratî* yajña-mîmâṅsâ *na îkshitâ*. nanv "etad-ajñâne kâ kshatiḥ?" ity âha: *sûkshmâ 'iti*; *vastu-vicâraṇâ* tattva-jñâna-nirûpaṇaṁ *sûkshmâ* çâstra-jñânaṁ vinâ 'açakyâ; ity arthaḥ.)

Z. 13. *vilokya* açuddha-vaidikân, iti ceshaḥ. — *arthâvadhâraṇa vidhurâḥ* ârtha-niçcaya-rahitâḥ.

Z. 14. *punar anyato gatvâ, vilokya 'iti* ceshaḥ. — *bhikshâ-mâtrârthaṁ gṛihitaṁ yati vrataṁ* yais, te; *bhikshâ-mâtraṁ* prayojanaṁ, na tu muktiḥ; *gṛihita-yati-vratâḥ*, na tu yatayaḥ, ity arthaḥ. *muṇḍitaṁ muṇḍaṁ* yais te, na tu muṇḍita-manasaḥ, ity arthaḥ. âtmânaṁ *paṇḍitaṁ manyante* te *paṇditammanyâḥ*, na tu paṇḍitâḥ, ity arthaḥ. — (*K. Vedânta çâstraṁ vyâkulayanti* arthânavabodhâd, iti bhâvaḥ.)

Çl. 4. *pratyakshâdi pramâṇa-siddho yo 'rthaḥ*, tad *viruddho yo 'rthaḥ* svargâdi-rûpaḥ, tam *abhidadhati 'ity* evaṁ çîlâ *Vedântâ 'yadi çâstrâṇi*, tarhi *Bauddhaiḥ kim aparâdhyate?* na kim api, ity arthaḥ. (*K.* asac chastra,

sya Vedàntasya jñânam̃-apy anapekshaṇîyam" ity abhipràyeṇa *vihasya*, âha: *pratyakshâdi*, iti. *pratyakshâdi-pramâ* pramàṇa-catushṭayâdhînam̃ jñànam̃, tat-*siddhasya* tad-gṛihîtasya *'arthasya viparîtârthâbhidhâyinaḥ* pratipàdikà *Vedântâ yadi çâstrâṇi*, tadà nàstika-çâstratvena ninditair *Bauddhaiḥ* bauddha-çàstraiḥ kim aparàdhyate, ity arthaḥ. tvam aham ity-àdi-pratîtyà gṛihîtànàm̃ vibhinnâtmanàm abhedo, ghaṭa-paṭâdi-padàrthâsatyatvam̃ ca, pratyakshâdi-pramà-vishaya-viruddho 'rtho Vedàntair abhidhîyate.)

Z. 19. *vàṅ-miçraṇam̃* vàcàm̃ miçraṇam̃ sambhâshaṇam, ity yàvat. *duritodayâya* pàpotpattaye.

P. 21.

Z. 1. *duḥkhena 'abhyastam Akshapâda-matam̃* Kaṇàda-çâstram̃ yais, te. (*K. Akshapâdaḥ* Çaivapâçupata-mûla-granthakṛit.)

Çl. 5. *aho* ity âçcarye. *dâmbhikâḥ* dambha-prâdhànyâḥ *dhaninâm̃ vittâni haranti*. kidṛiçâ dàmbhikàḥ: *Gaṅgâ-tîre taraṅgaiḥ çîtalâḥ* yàḥ *çilâḥ*, tàsu *vinyastâḥ* prakshiptàḥ yà *bhâsvad-vṛiçyo* ṛishiṇàm àsanàni, teshu *saṅvishṭâḥ*. punaḥ kidṛiçàḥ: *kuça-mushṭinâ maṇḍitaḥ* çobhito *mahâ-daṇḍo* vṛihad-bhuja-daṇḍo yeshâm̃, te. *karaṇḍaiḥ* dhauta-vastra-sthàpana-vaṅça-pàtrair *ujjvalâḥ* çobhamànàḥ. punaḥ kidṛiçàḥ: *paryâyeṇa* âvṛittyà *grathitam̃* yad *akshamâlâ-balayam̃* maṇi-rùpam̃, tasya *pratyekam̃ vîja-grahe* maṇi-grahaṇe *vyagrâḥ* cañcalàḥ *agrâṅgulayo* yeshàm̃, te tathà. — (*K.* akshamàlàm̃ japato dṛishṭvà, âha: *Gaṅgâ*-iti. *aho, ete dâmbhikâ dhaninâm̃ vittâni haranti*, divà pratigraheṇa ràtrau cauryeṇa, iti çeshaḥ. kidṛiçàḥ: *Gaṅgâ tîre* yàs *taraṅga-saṅgata-çilâḥ*, tatra *vinyastâsu bhâsvad-vṛishishu saṅvishṭâḥ*; yatînàm àsanam̃ *vṛishi*, iti. *kuça-mushṭi*, iti mahà-daṇḍa-baddha-kuça-mushṭayaḥ, ity arthaḥ. *karaṇḍaḥ* kamaṇḍaluḥ. *paryâya-grathitam̃* sarpâkàram̃ kramaço laghuṇḍaṭikàbhir grathitam̃ yad *aksha-balayam̃*, tadîya-*pratyeka-vîja-grahe vyagrâṅgulyagrâḥ*, ity arthaḥ; *agrâṅgulir* aṅguly-agram̃.)

Z. 8. *tridaṇḍi vyapadeçena* tridaṇḍi-chalena *jîvino dvaitâdvaita-mârga-paribhrashṭâḥ* Bhaṭṭabhàskara-matâvalambanàd ubhaya bhrashṭàḥ, iti bhàvaḥ.

Z. 9. Ahaṅkàro vicàrayati: *aye kasyedam*, iti. *aye* iti sambodhanam̃, aho ity arthe; *idam̃* paridṛiçyamànam *amara-sarito* deva nadyàḥ Gaṅgàyàḥ *nâtidûrato* nikaṭa eva *kasya âçramapadam̃ vibhâti* çobhate. kidṛiçam âçrama padam̃: *dvâropânte* dvàra-nikaṭa-bhûmau *nikhâtam* àropitam̃ *atiprâṅçu* atyuccam̃ yad *vaṅça-kâṇḍam̃* tasmin *tâṇḍavitam̃* nṛityat *dhautam̃* prakshàlitam̃ *sitam̃* çvetam̃ *sûkshmam̃* ca bahu-mûlyam *ambara-sahasram̃* vastra-sahasram̃ yasmin, tat. punaḥ kidṛiçam̃: *itas tato vinyastâni* sthàpitàni *kṛishṇâjinam* àrabhya *muçalântâni* yajña-pàtràṇi yasmin, tat. punaḥ kidṛiçam̃: *anavarataḥ* nirantaram̃ *hutasya 'âjyasya gandho* yasmin, etàdṛiço *dhûmaḥ*, tena *çyâmalîkṛitam̃* çyàmam̃ kṛitam̃ *gagaṇa maṇḍalam̃* yasmin, tat. — *adaḥ* idam̃; *gṛihamedhino* gṛihasthasya. — (*K. kasya 'idam amara-sarito nâtidûre vibhâty âçramapadam̃?* ity anvayaḥ. *amara-sarito* Gaṅgàyàḥ. *âçramapadam* âçrama-sthànam. kidṛiçam̃: *dvâropânte nikhâte* ropite *atiprâṅça-vaṅça kâṇḍe* ucca-

venu-khaṇḍe *tâṇḍavitaṁ* nartitaṁ *sitaṁ sûkshmâmbara-sahasraṁ* yatra, tâdṛiçaṁ., *itas tato vinyastaṁ kṛishṇâjinâdi* yatra, tâdṛiçaṁ. *dṛiçad-upalâdini* yajña-pâtrâṇi; *camashaṁ* yajña-pâtra-viçeshaḥ. *anavaratam hutam âjyaṁ* yatra, tâdṛiça-*'agni-dhûma-çyâmalitaṁ gagaṇa-maṇḍalaṁ* yatra, tâdṛiçaṁ. — *vilokya 'iti*, upavishṭaṁ Dambhaṁ vilokya, ity arthaḥ.)

Çl. 6. Dambham ajânann âha: *mṛid-iti. esho dambhaḥ mûrta iva* mûrtimân iva *sphurati* mama pratibhâti. kidṛiçaḥ: *mṛid-vindubhiḥ* mṛin-nirmita-vartula-tilakaiḥ *lâñchitâni* cihnitâni *lalâṭâdini jânv*-antâni yasya, saḥ. punaḥ kidṛiçaḥ: *cûḍâgre* çikhâgre *karṇa-kaṭi-pâṇishu virâjamânâḥ darbhâṅkurâḥ* yasya, saḥ. — *(K. mûrto dambha ity eva 'esha sphurati*. kidṛiçaḥ: *mṛid-vindunâ lâñchitaṁ* cihnitaṁ *lalâṭa-jânu*-paryantaṁ yasya, tâdṛiçaḥ; *uraḥ* vakshaḥsthalaṁ. tathâ *cuḍâgrâdishu virâjamâno darbhâṅkuro* navina-kuço yasya, tâdṛiçaḥ; cûḍâ-keçe karṇe ca tadiyac-chidre praveçita-kuçaḥ, kaṭau ca vastra-bandhana-kuçaḥ.)

P. 22.

Z. 1. "*bhavatu, upasarpâmy enaṁ*" ity ârabhya, "*yatra çrotriyân*" ity-antaṁ sugamaṁ. — *(K. upasarpaṇaṁ* samîpa-gamanaṁ.*)*

Z. 3. *vaṭuḥ* Dambha-çishyaḥ, vadati iti çeshaḥ. — *(K. vaṭur* Dambhasya paricârako brâhmaṇaḥ. *praviçya* iti, praveçaç ca Dambhâçramâ tmaka nṛitya-sthâne bodhyaḥ.*)*

Z. 5. *(K. Turushka-deço* Yavana-deçaḥ.*) atithin* anâgata-pûrvân tatrâpi *çrotriyân gṛihiṇaḥ* gṛihasthâḥ *na upatishṭhanti* na sammukham âyânti.

Z. 9. *(K. ârâdhya-pâdâ* asmat-svâminaḥ. *na viditam asti 'iti*, ataḥ kathaṁ pâdyâdikaṁ deyam? ity arthaḥ.*)*

Z. 11. *(K. idânîṁ parîkshitavyam* iti, suprasiddhasya 'asya *kadâpi* kenâpy aparîkshitatvâd, *idânîm* eva *kathaṁ parîkshitavyam?* ity arthaḥ.*)*

Çl. 7. *Gauḍaṁ râshṭraṁ deçânuttamaṁ*, na vidyate uttamaṁ yasmât, tad *anuttamaṁ; tatra 'api Râḍhâ purî nirupamâ; tatra* Râḍhâ-puryâṁ *Bhûriçreshṭhika* iti *nâma* yasya, tasya *paramaṁ dhâma* utkṛishṭaṁ gṛiham, asti iti çeshaḥ; *tatra* tasmin dhâmni *no* asmâkaṁ *pitâ uttamaḥ* utkṛishṭaḥ, *Uttama*-nâmako vâ, âsti iti çeshaḥ; *tat-putrâḥ mahâkulâç ca atra* jagati *kasya na viditâḥ?* api tu sarvasyaiva viditâḥ, ity arthaḥ; *teshâṁ* putrâṇâm *api* madhye *ahaṁ, prajñâ* buddhiḥ, *çîlaṁ* svabhâvaḥ, *vivekaḥ* pâṇḍityaṁ, *dhairyaṁ* dhiratâ, *vinayo* namratâ, *âcâraç* ca, etair guṇair *uttamaḥ*, sarvotkṛishṭaḥ, ity arthaḥ. — *(K. Gauḍa*-deçîyânâm ahaṅkṛitatvât, *tatrâpi Râḍhiyânâṁ, tatrâpi Bhûriçreshṭhaka*-grâmiyâṇâm ahaṅkritatvât. *mahâguṇâḥ*, iti çobhanaḥ pâṭhaḥ, *mahâkulâḥ*, iti kvacit pâṭho na ruciraḥ, pitur uttamatva-kathanena tat-putrâṇâṁ kula-mahattva-prâpteḥ. *viveko* 'tra kripâ, vicâryârtha nirṇaya-rûpasya vivekasya prajñayaiva gatârthatvât.)

Z. 10. *(K. evaṁ kriyate*, mayâ iti çeshaḥ.*)*

P. 23.

Z. 4. "*Dambha*" ity ârabhya, "*aho apûrvam*" ity-antaṁ sugamaṁ. *aho* ity upahâsoktiḥ, *apurvam idaṁ brâhmaṇyaṁ*, abrâhmaṇyam, ity arthaḥ. tad eva spashṭayati: *tathâ hi* ity-antaṁ nigaditaṁ vyâkhyânaṁ.

Çl. 5. *hi* niççitaṁ, *bhûpâlâḥ* râjânaḥ *asya* Dambhasya *pâda-pîṭhasya* *'ante* avasâne nikaṭaṁ *bhûtalaṁ cûḍâ-maṇi-marîcibhiḥ* mukuṭa-mâṇikya-raçmibhiḥ *nîrâjayanti* ârâtrika-kriyayâ upâcaranti; kîdṛçâ bhûpâlâḥ: *aspṛishṭa-caraṇâḥ* na spṛishṭau caraṇau yais te, caraṇa-sparça-rahitâḥ, ity arthaḥ. etena râja-pûjâ-nibandhanam eva brâhmaṇyaṁ, na vidyâ-tapo-vṛittair dâmbhikânâṁ, iti bhâvaḥ. — (*K.* arthâd etad-bhinnasya *kasya aspṛishṭa-caraṇâḥ* caraṇâv aspṛishṭavanto *bhûpâlâḥ pâda-pîṭhânta-bhûtalaṁ* arthât praṇâma-kâle *cûḍâ-maṇi-marîcibhir nîrâjayanti* ujjvalî-kurvanti? ity arthaḥ.)

Z. 8. (*K. svagataṁ* iti, manasâ kathayati, ity arthaḥ.) "*Ahaṅkâraḥ*" ity ârabhya, "*çṛiṇu re mûrkha*" ity-antaṁ sugamaṁ.

Z. 10. subodha-madhye pareshâm âsanopaveçane Ahaṅkâro 'tyanâcâri, iti: *naivaṁ* ity anena dhvanitaṁ.

Çl. 9. *asmâkaṁ jananî* mâtâ *tathâ ujjvala-kulâ* utkṛishṭa-kulâ *na*, *mâdṛ punaḥ samîcîna-çrotriyâṇâṁ kanyâ vyûḍhâ* pariṇîtâ, *tena* kâraṇena *â[illegible] tâtâdhikaḥ* pitr-adhikaḥ;

"uttamair uttamair nityaṁ sambandhân âcared budhaḥ"

iti smaraṇât sambandha-kṛitam uttamatvaṁ. âcârâtiçayaṁ darçayati: *asmac-chyâlakaḥ* asmâkaṁ çyâlakaḥ, tasya *mitraṁ*, tasya *mâtulaḥ* mâtur bhrâtâ, tasya *sutâ* kanyâ, sâ *yato* hetoḥ *mithyâ 'abhiçaptâ* mithyâbhiçâpa-yuktâ *tat-samparka-vaçât* paramparâ-sambandhât *mayâ preyasy api* premâspadam api *sva-gṛihiṇî projjhitâ* tyaktâ. — (*K. tathâ ujjvala-kulâ* 'iti, yathâ mat-patnî iti çeshaḥ. patnyâ âdhikyam âha: *sac-chrotriyâṇâm* iti. *vyûḍhâ* pariṇîtâ. *kâcana* anirvacanîya-suçîlâ.)

Z. 17. (*K. na 'asmâkaṁ* ity-âdi asmad-vṛittântânabhijñaḥ, ity arthaḥ.)

P. 24.

Çl. 10. *ahaṁ pûrvam Ambhojayoner* Hiraṇyagarbhasya *sadanaṁ* gṛihaṁ prati *upagataḥ; Brahmaṇâ* Hiraṇyagarbheṇa *gomayâmbhaḥ-parimṛijita nijorau* gomaya-yuktena *ambhasâ* jalena *pari* samantât *mṛijitaḥ* çodhito yo *nijaḥ* svakîyaḥ *ûruḥ* aṅkaḥ, tasmin *saçapathaṁ* yathâ syât tathâ *anunîya* mânayitvâ *upaveçitaḥ*. keshu satsu: *uccaiḥ* atiçayena *munibhiḥ sapadi* tatkshaṇa eva *âsaneshu ujjhiteshu* tyakteshu satsu. etena "Hiraṇyagarbhasyâpi vayaṁ mânyâḥ, kiṁ punar mânushâṇâṁ" iti vyajyate. — (*K. pûrvaṁ* pûrva kâle *Ambhojayoner* Brahmaṇaḥ *sadanaṁ* sabhâm *aham upagataḥ*, tatra *uccaiḥ sapadi* atiçîghraṁ *munibhir âsaneshu ujjhiteshu* satsu, *Brahmaṇâ saçapathaṁ* çapatha-dâna-pûrvakaṁ mâm *anunâthya* svorûpaniveçanaṁ yâcitvâ *gomayâmbhasâ parimṛijite nijorudeçe* âçu çîghraṁ *saṁveçita* upaveçito 'smi, ity arthaḥ.)

Çl. 11. mat-tapo-vijřimbhitam idam, ity âha Ahaṅkàraḥ: *are*, iti. *are* iti nîca-sambodhane, *Vâsavaḥ* Çatakratuḥ *ka iva?* na ko 'pi, ity arthaḥ, Ahalyà-gàmitvàd, iti dhvanitaṁ. *atra* asmin jagati. *Padmodbhavo* Brahmà *kaḥ?* iti *kathaya*, sva-kanyà-gàmitvàd, iti tàtparyaṁ. *jagati rishiṇâm api* mantra-drashṭřiṇàṁ api *prabhava-bhûmayaḥ* utpatti-bhùmayaḥ *kâḥ? vada* kathaya; dhìvara-kanyàto Vyàsaḥ, kumbhodbhavo Agastyaḥ, hariṇyàḥ Çřiṅgi; evam-àdìny utpatti-sthànàni, iti dhvanitaṁ. idřiçaṁ mama tapasaḥ sàmarthyam asti, ity ata àha: *avehi*, iti. *mama tapaso balam avehi* jànìhi; kiṁ tat? tad àha: *Purandarâṇâm* Indràṇàṁ, *Parameshṭhinâṁ* Brahmaṇàṁ, *muninâṁ* manana-çìlànàṁ, pratyekaṁ *çataṁ patatu;* mat-tapaḥ-sàmarthyàt sarvam ahaṅkàrikaṁ, iti bhàvaḥ. — *(K.* etad uktaṁ *bhavatu* tishṭhatu, *evaṁ tâvat* mayà vaktavyaṁ, ity arthaḥ. vaktavyam eva 'àha: *are*, iti. Indràdy-adhishṭhitatvenaiva tvayà Brahmaṇaḥ sabhàyà gauravaṁ darçyate, Indràdyà eva ke? ity àha: *ka iha*, iti. àsanojjhitàro munayas tàvat tishṭhantu, teshàṁ pitaro 'pi ke? ity àha: *vada*, iti; *prabhava-bhûmayaḥ* pitaraḥ, iti. te kathaṁ tvayà laghu křiyante? ity ata àha: *avehi*, iti. tapo-balena 'Indràdìnàṁ çatam api pàtayituṁ samartho 'smi, iti nishkřishṭàrthaḥ; *Parameshṭhinâṁ* Brahmaṇàṁ.)

Z. 12. *(K.* àtyuktyà paricintya Dambhasya *'ânandaḥ.)*

Z. 14. *cira-kâla-viprakarshât* bahu-kàla-vilambanàt. *na pratyabhijânâmi* na paricinomi. — *(K. Dvâparântâ*vadhy eva lokànàṁ dàmbhikatvaṁ, Kalau tv atiçayaḥ, iti bhàvaḥ. *vârdhaka-grastatayâ*, iti, idànìm ahaṅkàrasya 'atipravřiddhatvàt, iti bhàvaḥ.) "*atha*" ity-àdiḥ "*prasâdaḥ křitaḥ*" ity-ànto granthaḥ spashṭàrthaḥ.

Z. 17. *(K.* "*atha kiṁ* syàd anumatau," iti nàṭaka-paribhàshà-koshaḥ. *na hi tena vinâ*, iti dàmbhikànàṁ sarvadaiva mithyàvàditvàt.)

Z. 19. *(K. trishṇâ-lobhau* kukarmaṇìpi dhana jighřikshà rùpau, vàcaka-çabda-liṅga-bhedàt strì-puṁsau.)

P. 25.

Z. 1. *(K.* atràpy *atha kiṁ* ity anumatau. *ârya-miçrair* àrya-çreshṭhair, bhavadbhir iti çeshaḥ.)

Z. 3. *atyâhitaṁ* atyanishṭaṁ, *ati â* samantàd *ahitam* atyàhitam, ity arthaḥ. — *tad-vřittântaṁ* Mahàmoha-samàcàraṁ; *pratyetuṁ* jñàtum.

Z. 5. *svâgatam eva* sushṭhu eva àgataṁ. *râjadhânî*, ràjàno dhìyante vasanty asyàm, iti ràjadhànì ràja-vasatiḥ; "mamàpi saiva vasati-sthalam," iti. *nirûpitâ* vicàrità, tatraiva sthàtavyaṁ, iti bhàvaḥ. — *(K. svâgatam* iti, uddeçya-siddher acira-bhàvitayà kuçalàgamanaṁ, ity arthaḥ; uddeçya-siddher abhàvitàm eva darçayati: *yataḥ*, iti. *nirûpayitavyâ* kartavyà.

Z. 10. *Vivekasya uparodhaḥ* pravighàtaḥ; Vivekoparodhas tv àvaçyako, yataḥ tasyàṁ Vàràṇasyàṁ nirantaraṁ nivàsam icchati, ity àha: *tathâ hi;* Vàràṇasì-vàsa-yogyo Viveka eva, ity àha:

Çl. 12. *vidyâ-'iti*. *sa* Vivekaḥ *ato* hetoḥ *atra* Vârâṇasyâṁ *nityam eva* sarvadaiva *nivastuṁ*. nitarâṁ vâsaṁ kartum *icchati;* kîdṛiço Vivekaḥ: *kuloccheda-vidhiṁ* kuloccheda-kartavyatâṁ *vidhitsuḥ* cikîrshuḥ. 'ataḥ kutaḥ: yato *duratyayâ* avinâçâ *Brahma-purî* Çiva-nagarî, Brahma-çabdaḥ Çiva-vacanaḥ, uktaṁ ca:

"*brahma:* jñânaṁ, pradhânaṁ ca, kshetrajñoṁkâra-buddhayaḥ,
"moksho, Hiraṇyagarbhaç ca, mantro, vedaḥ, Çivas tathâ,"

'iti. *Vârâṇasî Vidyâ-Prabodhodaya-janma-bhûmiḥ*, Vidyâ ca Prabodhaç ca, tayor udayas, tasya janma-bhûmiḥ; *vidyâ* brahmâkârâ 'antaḥkaraṇa-vṛittiḥ, tadvaty upahitaṁ caitanyaṁ *prabodhaḥ*, tayor janma-bhûmiḥ, ity arthaḥ. (*K. Vivekâparodho* Viveka-kârya-vighâta-rûpaṁ pîḍanaṁ. *Brahma-purî* Brahma-nirmitâ purî *Vârâṇasî Vidyâ-Prabodhodayor niratyayâ* nirvighnâ *janma-bhûmiḥ, ataḥ* kâraṇât tasya Vidyâ-Prabodhodaya-janmana *uccheda-vidhiṁ* pratibandha-vidhânaṁ *vidhitsuḥ* cikîrshuḥ san, *atra* Vârâṇasyâṁ *nityam eva vastuṁ* sthâtuṁ Mahâmoha *icchati.)*

Z. 13. *yadi evaṁ* evaṁ-vidhâ, Vârâṇasî iti çeshaḥ, tarhi *ayam artho açakya-pratîkâraḥ*, iti yojanâ. açakya-pratikâratve kâraṇam âha: *yataḥ paramaṁ*, iti.

Çl. 13. *iha* Vârâṇasyâṁ *Puravijayî* çrî-Mahâdevaḥ *bhagavân* shaḍguṇaiçvarya-sampannaḥ *narâṇâṁ* jîvânâṁ *anta-kâle* prâṇotkramaṇa-samaye, *bhavaḥ* saṁsâras, tasmâd *bhayaṁ*, tena *kâtarâḥ* bhîtâḥ, tân târayati 'iti *târakaḥ*, taṁ *prabodhaṁ* brahmaikatva-lakshaṇaṁ *kathayati* prakâçayati. kathaṁ-bhûtânâṁ narâṇâṁ: *paramaṁ padaṁ* dhyeya-sthânaṁ avidushâṁ; yad vâ: *paramaṁ* brahma, *padyate* prâpyate tat *padaṁ*, brahma-prâptim *avidushâṁ* ajânatâṁ. kîdṛiço Mahâdevaḥ: *karuṇayâ vidheyaṁ* pravartanîyaṁ *ceto yasya*, saḥ. — (*K.* Vârâṇasyâ vidyâ-prabodhodaya-janmabhûmitvaṁ saṅgrâhayati: *yataḥ*, iti. *bhagavân Puravijayî* Maheçaḥ, *karuṇâyatta-cetâḥ* san, *iha* Vârâṇasyâṁ *avidushâm* atattvajñâninâṁ *narâṇâm* sthâne *anta-kâle* maraṇa-samaye *bhava-bhaya-kâtarâṇâṁ târakâṁ* bhava-bhaya-târaṇa-hetuṁ *prabodhaṁ kathayati*. prabodhaṁ kîdṛiçaṁ: *paramaṁ padaṁ* paramaṁ trâyakaṁ, ity arthaḥ;

"*padaṁ* vyavasiti-trâṇa-sthâna-çreshṭheshu kîrtitaṁ,"

iti koshe; trâṇa-padasya trâyate 'nena 'iti karaṇa-sâdhanatvât.)

Z. 18. yady api Çaṅkaraḥ saccidânanda-vâkyârtha-rûpaṁ brahma Vârâṇasyâṁ prakâçayati, iti *satyaṁ*, *tathâpi*, 'ity agratas tena yojanîyaṁ. — *tairthikâḥ* vaidikâḥ; kim *udâharanti?* tad âha: *yasya*, iti.

P. 26.

Çl. 14. *yasya hastau pâdau saṁyatau*, pârameçvaram eva kâryaṁ kurvâṇau, na tu brâhmaṇa-tâḍanâdi; *manaç ca susaṁyatam eva* kâmâdyâsaktiṁ; *vidyâ* tattat-tîrtha-mâhâtmya-jñânaṁ, *tapaç* çândrâyaṇâdi, *kîrtir* dânâdinâ evaṁ yaḥ karoti, *sa tîrtha-phalam açnute* prâpnoti. — (*K.* hastâdi çanca-

sattva eva tîrtha-gatasya tîrtha-phalaṁ, ity arthaḥ, iyaṁ ca vyâkhyâ dam-bhoktatvâd eva, smṛitau tu:

"..atîrthagato 'pi sa tîrtha-phalaṁ açnute,"

ity arthaḥ.)

Çl. 15. râjñâm âgamane yâny apekshitâni loke, tâny âha: *nishyandaiḥ*, iti. *candanânâṁ nishyandaiḥ* sekaiḥ, *sphaṭikâç* ca *maṇayaç* caiva *çilâḥ* yâsu, tâdṛiçyo *vedikâḥ* sphaṭika-ratna-nirmitâç catvarâḥ *saṅskriyantâṁ* parish-kriyantâṁ. *yantra-mârgâḥ* jalayantra-dvârâṇi krîḍârtham âpaṇeshu racitâni *mocyantâṁ* udghâṭyantâṁ; anena âpaṇa-çṛiṅgâro dhvanyate. *vâri-dhârâ* jala-dhârâ *gṛiheshu paritaḥ* itas tataḥ *prasaratu;* nagarâlaṅkâro 'nena sûcitaḥ. *sphuranto* dîptimanto *uravaḥ* sthûlâḥ *maṇayo* yâsu, tâdṛiçyas *toraṇânâṁ çreṇa-yaḥ* paṅktayaḥ *samantât* caturdikshu *ucchriyantâṁ* uccair badhyantâṁ; anena râjagṛihâṇâm alaṅkaraṇaṁ sûcitaṁ. *saudha-mûrdhasu* prâsâda-mastakeshu *amarâṇâṁ* devânâṁ *patir* Indraḥ, tasya *dhanuḥ*, tasya *dhâma* svarûpaṁ, tadvac *citrâḥ* nânâ-rûpâḥ *patâkâḥ dhûyantâṁ* vyâpyâyyantâṁ; anena gagana-dvâra-parishkâro dhvanitaḥ. idaṁ sarvaṁ mahâmoha-pravṛitti-janakaṁ iti saṅsûcitaṁ. — (*K. sphaṭika-maṇi-çilâ*-nirmitâ *vedikâḥ* râjopaveçana-sthânâni *candanânâṁ niḥsyandaiḥ* pâtaiḥ *saṅskriyantâṁ*. *yantra-mârgâḥ* jala-sravaṇa-pathâḥ *mucyantâṁ;* tat-phalam âha: *prasaratu*, iti. *toraṇânâṁ* maṅgala-mâlâ-dhâraka-nikhâta-stambhâṇâṁ *çreṇayaḥ samantâd ucchriyantâm* uttolyan-tâṁ; kîdṛiçyaḥ: *sphuranta uru-maṇayaḥ* pradhâna-maṇayo yatra, tâdṛiçyaḥ; maṇimâlaiva toraṇa-srak, ity arthaḥ. *saudha-mûrdhasu* yathâ *patâkâ dhû-yante* vâyunâ, tathâ kriyantâṁ, ity arthaḥ; patâkâs tatra 'âropyantâṁ, iti paryavasitârthaḥ; kîdṛiçyaḥ: *Amarapati-dhanusho* yad *dhâma* nânâ-varṇaṁ tejas, tadvac *citrâḥ*, citrâmbarâḥ patâkâḥ, ity arthaḥ.)

Z. 9. *pratyâsannaḥ* atisamîpam âgataḥ. yasmât kâraṇât atinikaṭa-varti, tat tasmât kâraṇât *pratyudgamanena* sammukha-gamanena, ity arthaḥ.

Z. 13. (*K. vishkambhaka*-lakshaṇam uktam eva prathamâṅke; vaṭu-sâhityena prayojyatvân na 'ayaṁ praveçakaḥ.)

P. 27.

Z. 1. *vibhavataḥ* iti, vibhavena sva-sâmarthyena *Mahâmohaḥ praviçati*, ity anvayaḥ; *ca*-kâro 'bhinna-kramaḥ; *parivâraç* ca sevaka-vargaç ca, pra-viçati ity asya 'anushaṅgaḥ.

Z. 2. *niraṅkuçâ jaḍadhiyaḥ* nirmaryâdâ mûḍhâḥ. niraṅkuçatvaṁ praka-ṭayati lokâyatika-matena: *âtmâ*, iti.

Çl. 16. *dehâd vyatirikta-mûrtir âtmâ 'asti, sa* âtmâ *lokântaritaḥ* svargâ-lokaṁ gataḥ *phalânâṁ* svargâdînâṁ *bhoktâ* iti yad, *iyam âkâça taroḥ pra-sûnât* âkâça-vṛiksha-pushpât *svâdu-phalasya* madhura phalasya *prasûtau* ut-pattau *prathiyasî* mahatî *âçâ*, ity arthaḥ. — (*K. dehâd vyatirikta mûrtir* deha bhinna *âtmâ asti, sa* ca *lokântaritaḥ* paraloke gataḥ san karmâ *pha-*

'lânâm̃ *bhoktâ*; iyam âçâ alikârtha-vishayâ,' âtmana eva deha-bhinnasya 'abhâvât, ity âha: *âçâ*, iti. *prathîyasaḥ* pṛithor *âkâça-taroḥ prasûnâd* anantaram̃ *svâdu-phala*-rûpa-*prasûtâv* eva '*iyam âçâ*, ity arthaḥ; 'âkâça-tarvâdy-alikatvât.)

Z. 7. ukte 'rthe upapattim âha: *idam̃ ca*, iti. *sva-kalpanayâ*, na tu paramârtha-vicâraṇayâ, ity arthaḥ. *avashṭambhena* aṅgîkâreṇa. *durvidagdhair* durbuddhibhiḥ. — (*K. idam̃ ca jagat sva-kalpanâ-nirmitaḥ padârthaḥ* çarîra-bhinna âtmâ tad-*avashṭambhais* tad-avalambanaiḥ, ity arthaḥ.)

Çl. 17. *bahubhir vâcâlaiḥ* kolâhala-rasikaiḥ *âstikaiḥ* vaidikaiḥ *nâstikâḥ* vedavâhyâ eva *satya-vacasaḥ*, ata eva *nindyâḥ kṛitâḥ*. kidṛiçair âstikaiḥ: *yad vastu* çarîrâd bhinnam âtma-svarûpam̃, tan na 'asty eva pratyaksheṇa 'anupalambhât, *tad vastu asti iti mṛishâ-jalpadbhiḥ* mithyaiva vadadbhiḥ; "ye vayam̃ satya-pramâṇa-vâdinaḥ, te nâstikâḥ kṛitâḥ, svayam apramâṇam̃ vadantaḥ, katham âstikâḥ? iti na vidmaḥ," iti tâtparyam̃. yuktim̃ sva-mate darçayati: *hanho* ity âçcarye 'vyayam̃, *chinnât* cheditât *âto* asmât *varshmaṇaḥ* çarîrât *pṛithak* bhinno *jîvaḥ kair api dṛishṭo yadi*, tarhi *punaḥ* vâram̃ vâram̃ *tattvataḥ* samyaktayâ *paçyata* vicârayata; ato jîvo na 'asty eva, iti bhâvaḥ. nanu tarhi acetana-kshoṇy-âdinâ 'ârabdhe katham̃ caitanyam̃? tatra 'âha: *pariṇâmena* rûpântarâyatyâ *rûpitâ* utpâditâ *citiḥ* caitanyam̃ yasya, saḥ; yathâ kramuka-phala-parṇa-cûrṇâdînâm̃ pratyekam̃ râga-janakatvâbhâvo 'pi, kramukâdînâm̃ mîlitânâm̃ tu râga-janakatvam̃, tathâ-bhûtânâm̃ mîlitânâm̃ caitanyotpâdakatvam̃, iti bhâvaḥ. — (*K.* âtmano 'likatvam̃ darçayati: *yan nâsti*, iti. *yad* âtma-rûpam̃ *vastu na 'asty* eva, '*tad asti*, *iti mṛishâ* '*eva jalpadbhir âstikair* veda-prâmâṇyâbhyupagantṛibhiḥ *nâstikâḥ* veda-prâmâṇyânabhyupagantâro vastutaḥ *satya-vacaso nindyâḥ kṛitâḥ*. âstikâḥ katham̃ mithyâ-vâdinaḥ? ity atra 'âha: *hanho*, iti. *hanho* ity âkâça-sambodhane, he madhyasthâḥ *paçyata* âstika-kathânâm̃ prâmâṇyam̃ *tattvataḥ paçyata*, *yadi* tu *itaç chinnâd varshmaṇaḥ* çarîrât *pṛithag jîvaḥ kair api dṛishṭaḥ*, nanv adarçane 'pi çarîra-madhya eva guptaḥ tishṭhati, ity ata âha: *pariṇâma*, iti. varshmaṇaḥ kidṛiçât: *pariṇâme* kâlâtikrame *rûshitâ* nashṭâ *citir* avayava-sañcayo yasya, tâdṛiçât; tathâ ca 'avayava-sañcaya-guptatvam api na sambhavati, ity arthaḥ.)

Z. 13. *eva*-çabdo api-arthaḥ. *amîbhir* âstikair *na kevalam̃ svâtmâ vañcyate*, api tu *jagad* api, ity arthaḥ. — (*K.* svachanda-vyavahârâdhîna-sukha-parityâgâd *âtma-vañcanam̃.*)

Çl. 18. *mukhâdy-avayavaiḥ* hasta-pâdâdy-avayavaiḥ *vapushâm̃ tulyatve* 'pi çarîrâṇâm̃ sâmye 'pi *varṇa-kramaḥ*, brâhmaṇa-kshatriya-vaiçya-çûdrâḥ *varṇâḥ*, teshâm̃ *kramaḥ* dharma-nirûpaṇa-rûpâḥ *kidṛiçaḥ?* na yukti-sahaḥ, ity arthaḥ. kim̃ ca: *iyam̃ strî vasu ca*, *iyam̃ parasya strî*, *parasya vâ dhanam̃*, *yat* yasmâd hetoḥ ayam̃ bhedaḥ, tam *amum̃ bhedam̃ vayam̃ na vidmaḥ* na jânîmaḥ. âstika-kalpita-bheda-vyavahâro 'narthakaḥ, ity âha: *hiṅsâyâm̃* vaidika hiṅsâyâm̃, *atha vâ strîṇâm̃ yatheshṭa gamane* yathecchaṁ svâ para strîṇâm̃ parva-kâle 'pi suratâbhyâse, *para va-grahe* para dhana grahaṇe

kâryâkârya-kathâḥ kartavyâkartavya-vicârâḥ, yady api vapushâṁ sâmyaṁ strî-puṁ-bhidâ na, *tathâpi niḥpaurushâḥ* purushârtha-hînâḥ *kurvate; artha*-kâmâv eva parama-purushârthau, na dharmo, nâpi mokshas, tatra pramâṇâbhâvât, iti bhâvaḥ. — (*K. varṇa-kramo* brahma-kshatrà-viṭ-çûdrâtmaka-varṇa-kramaḥ *kîdṛiçaḥ* kiṁ-pramâṇakaḥ? na hi çarîre saṁsthana-viçeshas tad-bhedako 'sti, ity âha: *tulyatve*, iti. *mukhâdy-avayavair vapushâṁ tulyatve* saty api, ity arthaḥ. *yoshâ* strî idaṁ *vasu* dhanaṁ *vâ parasya*, ity artha-*bhedaṁ vayaṁ na vidmaḥ*, yoshâ-vasunoḥ sambandhi-viçeshiyatva-paricâyaka-dharmâbhâvât, iti bhâvaḥ. *tathâpy amî* âstikâḥ *hiṅsâyâṁ, strîṇâṁ yatheshṭa-gamane, para-sva-grahe* ca *yat kârya-kathâḥ kurvate*, tad amî *nishpaurushâḥ* svachandya-rûpa-purusha-kṛitya-rahitâḥ.)

Z. 18. *saçlâghaṁ* sagarvaṁ. *lokâyatam eva çâstraṁ* çârvâkaṁ çâstram eva, ity arthaḥ. *tattvâni* satyâni paramârthâni. *bhûtâny eva* çarîrâkâra-pariṇatâni *cetayante* jñâna-janakâni. *paralokaḥ* svargâdiḥ. *apavargo* mokshaḥ. *asmad-abhiprâyânurodhinâ* asmadîya-tâtparyânusâreṇa. — (*K. lokâyataṁ* cârvâka-çâstraṁ. *vâyavaḥ*, iti, vayor api tan-mate tvâca-pratyakshatvât. *bhûtâni* pṛithivy-ap-tejo-vâyavaḥ *cetayanti* jñânaṁ janayanti, çarîre iti çeshaḥ. *mṛityur eva*, iti pâralaukikasya 'âtmano 'bhâvât, iti bhâvaḥ.)

P. 28.

Z. 5. (*K.* Cârvâkasya sûcitatvât tat-praveçam âha: *tata praviçati*, iti.)

Z. 6. *daṇḍanîtiḥ* râjanîtiḥ. *atraiva* râjanîtyâm eva *vârtâ 'antarbhavati* râja-sevâ-pratipâdikâ nîtir antarbhavati. *trayî* veda-trayî *dhûrtâlâpaḥ* vañcakânarthaka-vacanaṁ. veda-vacasâm aprâmâṇyena dhûrta-pralâpitatvaṁ samarthayati: *svarga* iti.

Çl. 19. *kartâraç* ca ṛitvijaḥ, *kriyâç* ca homâdi-rûpâḥ, *dravyaṁ* ca puroḍhâçâdi, etad-*vinâçe yajvanâṁ* yajamânânâṁ *yadi svargaḥ*, *tataḥ* tarhi *dâvâgni dagdhânâṁ bhûruhâṁ* vṛikshâṇâṁ *phalaṁ bhûri* bahu *syât;* akâraṇa-kâryotpatter ubhayatrâpi tulyatvâd, iti bhâvaḥ. — (*K. vârtâpi* 'iti, vârtâ trayî daṇḍanîti-bodhikâ, trayy api daṇḍanîtyâm antarbhavati, ity arthaḥ. — *dhûrta* 'iti, daṇḍanîti-bodhika-trayy-atiriktâ pâralaukika-phala-bodhikâ *trayî*, ity arthaḥ. pâralaukika-phalâsambhavâd ity âha: *tathâ hi*, 'iti. *kartâ* tâvat paraloke phala-bhoktâ, *kriyâ* ca phala-dâyikâ, *dravyaṁ* ca paraloke bhogârthaṁ dîyamâna-suvarṇâdikaṁ, eshâṁ *nâçe 'pi yadi svargaḥ* pâralaukiko bhoga, ity ato *dâvâgni* 'iti, *nashṭânâm* api *vṛikshâṇâṁ* bhûri phalaṁ *syâd*, ity arthaḥ; tadâ ity-arthe *tataḥ* iti.)

Çl. 21. tatraiva yukty-antaram âha: *mṛitânâm* iti. *nirvâṇasya* vinashṭasya. *snehaḥ* tailâdi. atirohitârtham anyat. — (*K.* yajñâdi-bodhikâyâḥ çruter aprâmâṇyaṁ sâdhayitvâ, çrâddha-bodhikâyâḥ çruter api tat sâdhayati: *api ca* iti. âtmano 'bhâvân nirâçrayâ yadi tṛiptiḥ çrâddhena janyate, tadâ nirvâṇatvena dîpâbhâvât nirâçrayaiva çikhâ snehena janyatâm, ity arthaḥ.)

Z. 14. *(K. çishyoktir* iha paiçâcî bhâshâ. — *parâko* vrata-viçeshaḥ, *shashṭhakâlaḥ* shashṭhakâla-bhojanaṁ, upavâsa-dvayânantarâ-nakta-bhojana-rûpaḥ.*)*

P. 29.

Z. 1. *vañcaka-praṇîta-çâstra-pratâritânâm âçâ-modakair* manasi, pari-dhṛita-modakair, ity arthaḥ.

Çl. 22. *âyatâkshyâḥ* visṛita-locanâyâḥ *âliṅganaṁ kva?* âliṅgana-janyaṁ sukhaṁ kva? *kudhiyâṁ* paraloka-sukhepsûnâm *eshaḥ* sakala-loka-prasiddhaḥ *dehopaçoshaṇa-vidhiḥ* çarîra-çoshaṇa-kartavyatâ *kva?* paraloke pramâṇâbhâvâd, iti bhâvaḥ. kidṛiçam âliṅganaṁ: *bhujâbhyâṁ nipîḍitaṁ* yad *bâhvor mûlaṁ,* tena *bhugnâ unnatir* yayos, tau ca tau *stanau* ca, tâbhyâṁ *manoharaṁ.* deha-çoshaṇa-vidhiḥ kaiḥ sâdhanaiḥ: *bhikshâ* ca, *upavâsa* ekâdaçy-âdiç ca, *niyamaç* cândrâyaṇâdiç ca, *arka-marîcibhiḥ* sûrya-kiraṇaiḥ, sûrya-sammukhâvalokanena tat-kiraṇair yo *dâhaḥ* santâpaḥ, etâny eva sâdhanâni, tair, ity arthaḥ. — *(K.* pratyaksha-siddha-sukha-parityâgena 'alîka-sukhârthaṁ duḥkhâcaraṇam *âçâ-modaka tṛiptir* eva, iti darçayati: *paçya* 'iti; *kva 'âliṅganam* iti. *âyatâkshyâ* dîrgha-nayanâyâ *âliṅganaṁ kva? kudhiyâṁ* dhûrta-pralâpa-veda-pratâritâstikânâṁ *bhikshâdibhir dehopaçoshaṇa-vidhir esha ca kva?* ity arthaḥ. âliṅganaṁ kidṛiçaṁ: *bhujâbhyâṁ nipîḍitau,* ata eva *bâhu-mûle* sva-vakshaḥ-pârçva-dvaye *bhugnau* namitau yau *stanau,* tâbhyâṁ *manoharaṁ.)*

Çl. 23. *duḥkhena upasṛishṭaṁ* sammiçritaṁ duḥkha-saṁvalitaṁ *vishaya-saṅgamât* vanitâdi-sambandhât *janma* yasya, tâdṛiçaṁ *sukhaṁ tyâjyaṁ, ity eshâ puṁsâṁ mûrkha-vicâraṇâ* mûrkha-vicâraṇam eva; dṛishṭântena prakaṭa-yati: *bhoḥ* çishya! *kaḥ* pumân *hitârthî, hitam* ishṭam *arthaḥ* prayojanam asya 'asti, 'iti *hitârthî, sitâḥ* çvetâḥ, ata eva *uttamâḥ taṇḍulâḥ,* tair *âḍhyân* pûrṇân *vrîhîn* çâlîn *tusha-kaṇopahitân* tusha-kaṇa-yuktân, *nâma* iti niçcayena, *jihâsati* hâtum icchati? na ko 'pi, ity arthaḥ; yadi tyajati, tadâ sa mûrkhaḥ, ity arthaḥ. — *(K. vishaya-saṅgama-jaṁ sukhaṁ duḥkhopasṛishṭam* iti kṛitvâ *tyâjyam, ity eshâ mûrkha-vicâraṇâ. bhoḥ ko hitârthî tusha kaṇopahitân sitottama-taṇḍula-yuktân vrîhîn jihâsati* tyaktum icchati? duḥkha-hetutvât tusha-kaṇâ duḥkha-sthânîyâḥ, sukha-hetutvât sitottama-taṇḍulâḥ sukha sthânîyâḥ.*)*

Z. 15. *upajanayanti* prâpayanti. *vilokya* 'ity-âdi, *praṇâma* ity-antam atirohitârthaṁ.

P. 30.

Z. 2. *(K. Kaler* iti, kali-kâlasya 'ity arthaḥ.*)*

Z. 3. *bhadraṁ* kuçalam *avyâhataṁ* na vyâhataṁ, na 'upadrutam, ity arthaḥ.

Z. 4. *nirvartitaḥ* kṛitaḥ *kartavyasya* kârya-jâtasya *yesho* yena, saḥ; kṛita kâryaḥ sevakas tv ativa prabhûṇâṁ priyaḥ, iti bhâvaḥ. sampâdita-kâryasya bhṛityasya prabhu-darçanaṁ mahate guṇâya, ity âha: *âjñâm* iti.

Çl. 24. "yaḥ" ity adhyâhâraḥ, "saḥ" ity api. yaḥ *prabhûṇâṁ pâdâmburuhaṁ* pâdâmbujaṁ *namasyati*, sa *dhanyaḥ*. kidṛiçaḥ saḥ: *uccair* atiçayena *pramodaṁ* prakṛishṭânandaṁ yathâ syât tathâ *anumoditaṁ* santoshâspadîkṛitaṁ *darçanaṁ* yasya, tâdṛiçaḥ *san*. kiṁ kṛitvâ: prabhûṇâṁ *mahatîṁ* sânandâṁ *âjñâm avâpya*, *dvishatâṁ* ripûṇâṁ *nipâte* vinâçe kṛite sati, *tâṁ* âjñâṁ *nirvartya* sampâdya, *sapadi* tasminn eva samaye *labdhaḥ sukha-prasâdo* yasya saḥ, tâdṛiçaḥ san, ity api yojyaṁ. — (*K.* bhavad-âdishṭa-*kâryasya* çeshaḥ kiyân asti, *nivartita-tac-cheshaḥ* san, sâdaiva *pâda-mûlaṁ drashṭum icchati*, atas tad-artham âpâtato na 'âyâtaḥ, ity arthaḥ. nivartita-prabhv-âdishṭa-samasta-kârya eva yaḥ *prabhûṇâṁ pâdâmburuhaṁ namasyati*, sa eva prabhuṇâ '*anumodita-darçanaḥ san dhanyaḥ*, ity âha: *âjñâṁ* iti; *mahatîṁ prabhûṇâm âjñâm avâpya*, *dvishatâṁ nipâtât tâm* âjñâṁ *nishpâdya*, *sapadi labdha*-svîya-*sukha-prasâdaḥ* san; sukha-prasâda-darçanât tasya nishpâdita-kâryatvam anumâya, prabhuṇâ 'anumodita-darçanaḥ sann eva, dhanyo bhṛityaḥ prabhûṇâṁ pâdâmburuhaṁ namasyati, ity arthaḥ.)

Çl. 25. "kiyat sampannaṁ?" iti praçne (*Z.* 10), uttaram âha: *vyatîta* 'iti. *mahâjano* dharma-paro lokaḥ brâhmaṇâdiḥ *yatheshṭa-ceshṭâm* avihita-ceshṭâṁ para-strî-gamana madya-pânâdi-rûpâṁ *gamitaḥ* prâpitaḥ. kidṛiço mahâjanaḥ: *vyatîta-vedârtha-panthâḥ* sandhyâgnihotrâdir yasmât, saḥ. kidṛiçîṁ ceshṭâṁ: *prathiyasîṁ* pracurâṁ. mahâmoha eva tatra hetur, ity âha: *tad* iti. *hi* niçcitaṁ *atra* dharma tyâge *ahaṁ* Cârvâkaḥ *Kalir vâ na hetuḥ yataḥ*, *tat* tasmât kâraṇât *prabhu-prasâdaḥ paurushaṁ* purushasya karma *tanoti* vistârayati, ity arthaḥ. — (*K. mahâjano vyatîta-vedârtha-pathas* tyakta-veda-bodhita-mârgaḥ san, *yatheshṭa-ceshṭâṁ gamitaḥ* bhakshaṇa-çiçnâdi-vyavahâre svacchandaḥ kṛitaḥ, ity arthaḥ. *tad* iti. *idaṁ purushaṁ prabhor* bhavataḥ *prabhâva eva tanoti*, *na Kalir na câpy aham atra hetur*, ity arthaḥ.)

Z. 16. *trayîm eva* 'iti, veda trayy-uktân dharmân, ity arthaḥ. *âcârya* Vrihaspatiḥ. (*K.* kutra kutra deçe kidṛiçaṁ kṛitam ity atra 'âha: *tatra* 'iti. çama damâdin anvetu iti veda-bodhitatvâd eva *çama-damâdinâṁ*, iti bhâvaḥ.)

Çl. 26. *tridaṇḍaṁ* trayo daṇḍâ yasmin karmaṇi, tat tridaṇḍaṁ sannyâsaḥ, ity arthaḥ. *bhasma-guṇḍanaṁ* sarvâṅge bhasmoddhûlanaṁ. *jîvikâ* jîvanahetuḥ. — (*K.* vedârtha-nirdhâraṇa-rûpayâ *buddhyâ* tapaḥ kleça mahatva rûpa *paurusheṇa ca hînânâm agnihotrâdikaṁ jîvikâ* para-pratâraṇena dhanotpâdikâ, *iti Vrihaspatir* âha, ity arthaḥ. trayo daṇḍâ yatra 'iti bahuvrîhiṇa *tridaṇḍaṁ* vratam, ity arthaḥ, anyathâ *tridaṇḍi* 'ity eva syât.)

P. 31.

Z. 1. *tena* kâraṇena *Kurukshetrâdishu âdi* pada saṅgrâhya Mâyâpurî Kedâra-Badarikâçrameshu *devena* mahârâjena Mahâmohena, ity arthaḥ. *vidyâ ca prabodhaç* ca, tayor *udayaḥ*. - (*K. Kurukshetrasya* pâçcâtya deçatvân mukti kshetratvâc ca.)

Z. 7. *tad-anugřihitânvayam* iti, *tayâ* Vishṇubhaktyâ *anugřihîtaḥ anvayo* vaiçus yasyâ, tam *âlokayitum na prabhavâmaḥ*, kimuta sâkshâd Vishṇubhaktiñ. *avadhâtavyam* sâvadhânena bhavitâvyaṁ.

Z. 10. *âtmagatam* sva-manasy eva vadati, na vahir, ity arthaḥ. *âḥ* pîḍâyâm. *pratipaksheshu* çatrushu. — (*K. âtmagatam* iti manaḥkathâyâm; *prakâçam* iti tad-anantaraṁ vyaktoktau.)

Z. 11. *anavahitena* asâvadhânena.

Çl. 29. *râjñâm alpo 'pi ripuḥ vipâka-dâruṇaḥ* duḥkha daḥ, *arum* marma-sthânaṁ *tudati* 'ity *aruntudaḥ*; uktam arthaṁ dřiḍhayati: *udvejayati* 'iti, udvegaṁ janayati. çeshaṁ sugamaṁ. — (*K. râjñâm alpo 'pi ripur vipâkena* kukârya-ghaṭanayâ *dâruṇaḥ* san, *aruntudo* mahâ-duḥkha-dâyako, 'bhavati" iti çeshaḥ. tatra dřishṭântam âha: *udvejayati* 'iti. atra pakshe vipâkaḥ kshatasya pakvatâ.)

P. 33.

Z. 1. *asatsañga* ity-âdi dauvârika-sambodhanaṁ.

Z. 6. *hagge* iti çabdo asmad-ekavacanaṁ. *nirdpyamâṇam* dhyamânam. — (*K.* pravishṭa-*purushasya* 'uktiḥ paiçâcî bhâshâ.

râjâ: *bhaṭṭârako*, devas; tat-sutâ bhartřidârikâ;

iti nâṭaka-bhâshâ-koshe. bhaṭṭâra eva bhaṭṭâraka ekadeçe mleccha-bhâshâ kerako 'dhîne deçî. *râjakulam* râjadhânî. *yâvat tâvat*, dvayam api vâkyâlaṅkâre.)

Z. 11. *paramaç ca 'asâv îçvaraç ca*, tâdřiço yo *Mahâmohaḥ*. *bhadram avyâhatam* kalyâṇaṁ nirvighnaṁ. *tad etad pramâṇam iti jñâtrâ devo*, "vadati" iti çeshaḥ. *atimugdhâḥ* atiçayena mûḍhâḥ. *çânteḥ* indriyopaçamât. *asyâḥ* çânteḥ. — (*K. upajapta iva* 'iti nigûḍhaṁ kathâ upajâpaḥ, nigûḍha kathita iva, ity arthaḥ; vairâgyam utpannam iti sambhâvanayaiva vairâgyâdibhir upajapta iva 'iti likhitaṁ, vastutas tu vairâgyotpattir agra eva bhavishyati, pañcamâṅke ca tad bodhyaṁ. *yataḥ kâmâd vicchidya* 'iti nishkrâmaṇâpi kemcit kenacid dharmâcaraṇât.)

Çl. 28. indriyopaçamâbhâvaṁ prakaṭayati: *dhâtâ* 'iti. *Dhâtâ* Brahmâ *viçvasya viçishṭâ* yâ *srishṭis* tan-*mâtre nirataḥ* tatparaḥ. *Dakshâdhvara dhvaṁsano* Daksha yajña-vinâçako *devo 'pi* Trinetro 'pi *Gaurî bhujâbhyâm âçleshaḥ* âliṅganaṁ, tena janito ya *ânandaḥ* sukhaṁ, tena *viçesheṇa ghûrṇamânâni nayanâni* yasya, saḥ; etena 'kâmâsakto Mahâdevaḥ" iti sumasdei. *Daityâriḥ* Vishṇuḥ *Kamalâyâḥ* Lakshmyâḥ *kapolam* gaṇḍasthalaṁ, tasmin *makari-lekhâ* matsyâkřitiḥ patralekhâ, tayâ *aṅkitam* cihnitam *uraḥ sthalam* yasya, saḥ; etena "ayam api kâmâsaktaḥ" ity abhâṇi; *abdhau* kshîra-samudre *çete* svapiti. etâdřiçeshu siddheshu çânty abhâve, *itareshu* prâṇishu *çânteḥ kâ nâma kathâ?* na kâpi, ity arthaḥ. — (*K.* çântis tâvat sâtvikânâm eva bhavati, sâtvikâ eva na santi, 'ity âha: *dhâtâ*, 'iti. *viçva vidhânam* râjasikakrityam eva, 'iti *Dhâtâ* na çântaḥ. rahasya *Gaurî bhuja* 'ity âdinâ kâmitvaṁ, *Daksha* 'ity-âdinâ tâmasikatvam api tasya darçitaṁ, iti na tatra

sutârâṇâṁ çântiḥ. *Daityâriç* ca tâmasikatvenaiva Daitya-hiṅsakaḥ, '*Kamalâ*'ity-âdinâ tasya kâmitvaṁ ca pratipâditaṁ; *cete* '*bdhâv* ity anena nidrâsaktvân na tatra çântiḥ, atas ta eva yadi na çântâs, tadâ kshudreshu *itare-shu* jantushu *nâma* sambhâvanâyâṁ *kâ kathâ* *çânter*, ity arthaḥ. *kapola-makari-patraṁ* nava-pallava-nirmita-makarî-rûpaṁ kapola-bhûshaṇaṁ, sva-vakshasi tat-kapolârpaṇât tad-*aṅkita-vakshaḥsthalatvaṁ* Daityâreḥ. —)

Z. 18. Kâma-dûtasya nâma *Jâlma* iti asamikshya-kâritvât; 'jâlmo 'samikshyakârî syât" ity Amaraḥ. *âdeçam* âjñâṁ *pratipâdaya* kathaya. *durâçayo* durhṛidayaḥ. — (*K. jâlma* 'iti, nikṛishṭa 'ity arthaḥ.)

P. 34.

Z. 5. *ko* '*bhyupâyaḥ* iti, "çânti-nirâkaraṇâya" iti çeshaḥ.

Z. 11. *mahârâjena pratipakshaṁ* çatrutvaṁ. *âtma-nirapekshitaṁ* svâtmâpekshâ-rahitaṁ sva-jîvana-rahitaṁ.

Çl. 29. *bhuvanaṁ* bhû-maṇḍalaṁ *andhi-karomi* anandham andhaṁ sampâdayâmi, tathâ karomi 'ity *andhi-karomi*, dṛishṭy-agocaraṁ karomi, 'ity arthaḥ; *badhiri-karomi* çrotra-hînaṁ karomi. *dhiraṁ* dhairya-yuktam, "adhîratâm" iti çeshaḥ, *sacetanaṁ* sahṛidayaṁ *acetanatâṁ* hṛidaya-çûnyatâṁ *nayâmi* prâpayâmi. andhikaraṇâdeḥ prayojanam âha: *yena kṛityaṁ* kartavyaṁ *na paçyati*, *yena hitaṁ na çṛiṇoti dhîmân* buddhimân *api*, api-çabdât tân na 'âkalayati 'ity arthaḥ, *yena adhîtaṁ* paṭhitaṁ dharmaçâstrâdi *na pratisandadhâti* na smarati, 'ity arthaḥ. — (*K. bhuvanam andhi-karomi*, *dhiraṁ badhiri-karomi*, *sacetanaṁ* janam *acetanatâṁ nayâmi*; *yena* 'andhikaraṇena *kṛityaṁ na paçyati*, arthâj janaḥ, *yena* badhirikaraṇena *hitaṁ na çṛiṇoti*, *yena* 'acetanatâ-nayanena '*adhîtam* arthaṁ *dhîmân na pratisandhatte*, iti yathâ-saṅkhyam andhikaraṇâdeḥ kâryâṇi kṛityâdarçanâdîni boddhyâni.)

P. 35.

Z. 1. *mad-upagṛihîtâḥ* lobhavantaḥ. *mano-*'*bhilâsha*-rûpâ yâ *nadî paramparâ*, tâm eva, ity arthaḥ. — (K. *mad-upagṛihîtâḥ* "janâḥ" iti çeshaḥ.)

Çl. 30. *ete mama dantino* gajâḥ *santi*; kîdṛiçâ dantinaḥ: *mada jalena* dânodakena *pramlânâni gaṇḍa-sthalâni* yeshâṁ, te. *ete ca mama turagâḥ santi*; kîdṛiçâs turagâḥ: *vâtavat* vâyuvad *vyâyataṁ* viçesheṇa vistritaṁ yathâ syât tathâ *patanti* gacchanti, tacchîlâḥ. *bhûyo* '*pi* punar api *parân* anyân *lapsye* prâpsyâmi. kiṁ ca: *etad labdhaṁ* prâptaṁ; *idaṁ punar labhe* prâpnomi; *idaṁ labdhâd adhikaṁ dhyâyatâṁ* cintayatâṁ *nṛiṇâṁ*, *cintayâ jarjharaṁ* çithilaṁ *ceto* yeshâṁ te, tâdṛiçânâṁ prâṇinâṁ, *nâma* iti niçcayena, *çânteḥ* çânti-mârgasya *kâ kathâ* kâ vârtâ? api tu na kâpi, 'ity arthaḥ. — (*K. labdhâdhikaṁ dhyâyatâṁ janânâṁ*, *nâma* sambhâvanâyâṁ, *kâ çânteḥ kathâ?* tatra labdhâdhika dhyânaṁ darçayati: *santy ete*, iti. *mada jalaiḥ pramlâna gaṇḍa-sthâlâ ete mada dantino mama santi*; *vâtavad vyâyata pâtino* dîrgha vegâs *turagâç ca mama santi*; *bhûyaḥ* punar *api aparân* danti turagân *lapsye*; *etad* danty âdikaṁ *labdhaṁ*, *idaṁ* buddhi-sthaṁ *punar labhe*; *idaṁ*-

çabda iti-çabdârthe, iti *labdhâdhikaṁ dhyâyatâṁ*, ity arthaḥ. nṛiṇâṁ kîdṛiçânâṁ: *cintâ-jarjara-cetasâṁ.)*

Z. 7. *mat-prabhâvaḥ* mama krodhasya sâmarthyaṁ.

Çl. 31. *Surapatir* Indraḥ *Trâshṭraṁ* Tvashṭur apatyaṁ *putraṁ* Vṛitrâsuraṃ *apâtayat* amârayat. *candrârdha-cûḍaḥ* candra-çekharo *Devaḥ Brahmaṇaḥ çiraḥ achinat* chedayâmâsa. *Kauçiko* Viçvâmitraḥ *Vaçishṭha-tanayân* putrân *â* samantât, sarvân ity arthaḥ, *aghâtayat* amârayat. krodhâkrântânâm etâni caritrâṇi, 'iti dhvanitaṁ. sâkshât paurushaṁ svîyam âha: *vidyâvanti* 'iti. *aham* îdṛiçâny *api kulâni kshaṇât* çîghram eva *uddhartum* utkarsheṇa hartuṁ nâçayitum *îçaḥ* samarthaḥ. kîdṛiçâni kulâni: *vidyâvanty api* jñânavanty api, *kîrtimanti* yaçasviny *api*, *sad-âcâreṇa* veda-vihitâcâreṇa, *avadâtâny api* nirmalâny api, *proccaiḥ paurusha-bhûshaṇâny api* atiçayena purushârtha bhûshaṇâni, evaṁguṇa-yuktâni nâçayituṁ samarthaḥ, kiṁ punar anyâdṛiçâni, 'iti bhâvaḥ. — (K. krodhaḥ svabhâvaṁ darçayati: *Trâshṭram* iti. hiṁsâyâḥ krodha-mûlakatvât Vṛitrâdi-hiṁsâṁ darçayati: *Tvashṭuḥ putraṁ* Vṛitra-nâmânaṁ *Surapatir* Indro *'ghâtayat* jaghâna, svârthe kâritaṁ! *candrârdha-cûḍo Mahâdevo Brahmaṇaḥ çiro 'chinat;* purâ hi Brahmaṇâpi pañcaçirâ âsît, tasya 'ekaṁ çiro Maheçena chinnam, iti paurâṇikî kathâ. *Kauçiko* Viçvâmitro *Vaçishṭhasya* çataṁ *tanayân* Râkshasa-dvârâ *âghâtayat*, iti paurâṇikî kathâ; *âghâtayad* iti âṅ-pûrvo hantiḥ. *'ahaṁ vidyâdimanty api kulâni kshaṇâd uddhartum* unmûlayituṁ *kshamaḥ; sad-âcâreṇa avadâtâni* nishpâpâni.)

Çl. 32. *kshetrâdi-maṇḍalântâni* yâni, teshâṁ yâ *pratyâçâ* prativastvadhika-prâptîcchâ, tad eva *ghanaṁ* dṛiḍhaṁ *sûtraṁ*, tena *baddhaṁ mano* yeshâṁ, *labdhât* prâptâd *adhikaṁ dhyâyatâṁ* cintayatâṁ *prâṇabhṛitâṁ* jîvinâṁ, *bhoḥ tṛishṇe! yadi prasîdasi* prasannâ bhavasi, *aṅgâni tuṅgâni cet tanoshi* pushṭâni cet karoshi, *tat* tadâ *brahmâṇḍa-lakshair api* prâptaiḥ *çama-kathâ* çama-vârtâ *kutaḥ?* na kuto 'pi, 'ity arthaḥ, adhikâçâ-vichedâbhâvâd, iti bhâvaḥ. — (K. he *tṛishṇe devi! yadi prasîdasi, aṅgâni cet tuṅgâni tanoshi, bhos tat tadâ brahmâṇḍa-lakshair api kutaḥ prâṇabhṛitâṁ* prâṇinâṁ *çama kathâ* çânti-prasaṅgaḥ? prâṇabhṛitâṁ kîdṛiçânâṁ: *kshetrâdi-kshamâmaṇḍalânteshu yâ pratyâçâ*, saiva *ghana-sûtreṇa baddha-manasâṁ*, ata eva tâdṛiça-*labdhâdhikaṁ dhyâyatâṁ; kshetraṁ* kedâraḥ, tato *'dhiko grâmaḥ*, tat sahitaṁ *vanaṁ* tato *'dhikaṁ*, tat-sahito *'driḥ* tato *'dhikaḥ*, tat-sahitam aprâptaṁ *pattanaṁ* nagaraṁ tato *'dhikaṁ*, tat-sahitâ 'aprâptâ *purî* tato *'dhikâ, dvîpo* Jambudvîpâdis tato *'dhikaḥ*, sapta-dvîpâtmakaṁ *kshamâ-maṇḍalam* tato *'dhikam*, ity evaṁ *labdhâdhikaṁ.)*

P. 36.

Z. 6. *saha dharmacâriṇyâ* mad-vacana kâriṇyâ. *tshatkara eva* sukara eva, ity arthaḥ.

Çl. 33. krodhasya svarûpaṁ darçayati: *kâ 'iyaṁ* iti. *kuṭilâḥ* vakrâç ca te *vijâḥ* jârâç ca, tadvat *suhṛic ceshṭitaṁ* sauhârdi ceshṭitaṁ yeshâṁ, tâdṛiçâ *amî jñâtayaḥ ke?* na ke 'pi, ity arthaḥ; pitṛ-âdînâṁ apy upâlambhe, an-

yeshâm upâlambhe kaiva kathâ, 'ity abhiprâyaḥ. *krodha-vahneḥ sphuliṅgâḥ aṅge* çarîre *viratiñ* virâmañ *na dadhati* na' urarî-kurvanti; kuta, ity âha: *yâvad eshâñ* bandhv-âdînâm *akhilañ* samastañ *kulañ âgarbhañ* garbhâva-dhinaiva *niḥçeshayâmi* niḥçeshañ karomi, *tâvat sphuliṅgâ na viratâ bhavanti*, ity 'arthaḥ. kîdṛiçâḥ sphuliṅgâḥ: *sphurjantaḥ* dedîpyamânâḥ. mâraṇâdinaiva krodhaḥ' çâmyati, 'iti. — *(K. kuṭila* 'iti *ami jñâtayaḥ*, ity arthaḥ. kîdṛiçâḥ *kuṭilâ viṭâ* dhûrtâḥ, evañ-bhûtâ eva *suhṛic-ceshṭitâḥ*: *eshâñ* mâtr-âdînâñ, dṛiçyamânânâm anyeshâñ vâ, *idam akhilañ kulañ yâvad âgarbhañ* garbha-stha-paryantañ *nishpeshayâmi*, *tâvan mama 'aṅge krodha-vahneḥ sphûrjanto* dîpyamânâḥ *sphuliṅgâ naiva viratiñ dadhati.)*

P. 37.

Z. 3. *upakshepeṇa* upakramena *hṛidayam ârûḍhañ* hṛidayañ praty âgatañ. *upâyântaram* âha: *paratantrâ çraddhâ* adhînâ. *vyâkrashṭuñ* tiraskartuñ. — *(K. upakshepeṇa* upanyâsena. *mṛidutayâ* kshîṇatayâ. *uparatâ* mṛitâ. *vinakshyati* palâyishyati. *mithyâdṛishṭir* nâstikatâ; veda-prâmâṇyânabhyupagantṛitayâ veda-viçeshopanishadaḥ çraddhâkarshaṇañ yuktam eva, nâstika-bâhulyât, tat-sambandhavattvât, mauna-vyavahâra-svâtantryâc ca tasya *vilasinitvañ*. vibhrama eva *vibhramavati*, svârthe matupâ sañjñâ kṛitâ; veça-vilâsinyâḥ sannidhau tasyâḥ preshaṇasyaiva 'aucityât.)

Z. 12. *(K.* yady api mithyâdrishṭir mahâmoha-sânnidhya-virater asambhavât *cireṇa dṛishṭasya* 'iti vaktum anucitañ, tathâpi sânnidhyecchâdhikyât sânnidhye 'pi asânniddhyâropaṇâdi muktañ.)

Z. 14. *(K. cetishyati* jñâsyati.)

P. 38.

Z. 8. *ata upari* tad-anantarañ. — *hṛidaya-nihitayâ* "mayâ' iti yojanâ.

P. 39.

Z. 5. *praticchanti* vâñchanti. *saubhâgyasya* mahatî ṛiddhiḥ *maharddhiḥ* mahâ-sampattiḥ, tayâ *vidhuritañ* rahitañ *hṛidayañ* yâsâñ, tâḥ. *visañshṭhulañ* sva-sthânâd bhrashṭañ *nûpurañ*, tasya *jhaṅkâraḥ* çabdaḥ, tena *mukharayâ* saçabdayâ. — *(K. âjñâñ* arthât sviya-patinâ tvad-ramaṇe *âjñâñ praticchanti* dadati.)

P. 40.

Çl. 31. *yâ eshâ* agaṇita-guṇa-grâmâ, *dolâyâ andolanañ* calanañ, tadval *lole* cañcale ye *kaṅkaṇe* kara-bhûshaṇe, tayor yo *raṇatkâraḥ* çabdaḥ, sa *uttaraḥ* agravartî yatra yasyâñ kriyâyâñ yathâ syât tathâ *sarpati* âgacchati. kîdṛiçî: *çroṇi-bhâraḥ* nitamba bhâraḥ, tasya *bharaḥ* atiçayaḥ, tena *alasâ*. punaḥ kîdṛiçî: *âdareṇa* prayatnena athâc chithila-dhammillât *galanti* ca tâni *mâlyâni* ca, teshâñ yâ *upariṭtiḥ* sañvaraṇañ, tac *chalañ* tan mishañ, tasmâd dhetoḥ *lîlayâ utkshiptau bhujau* yayâ sâ. punaḥ kîdṛiçî: *upadarçitau*

yau *kucau* stanau, tatrà *unmîlanti* prakàçanti *nakhâńkânâm* nakha-kshatànàm *âvalih* pańktir yasyàh sà. punah kidřiçî; *nilâni* yàni *indivarâṇi* nilotpalàni, teshàm *dâma* màlà, tadvad *dirghatarayâ dřishṭyâ manah dhayanti* priṇayanti. — *(K. yâ eshâ dor-ândolanena* hasta-càlanena yah *kańkaṇa-jhaṇatkâras,* tad-*uttaram* tat-pradhànam yathà syàt tathà *sarpati.* kidřiçi: *çroṇibhâro* gurutara-nitambas, tad-*bhareṇa* tad-gurutvena *alasâ* manda-gatih. *dara-galito* 'lpa-skhalito *mâlyasya* '*apavřittih* sva-sthàna-sthàpanam, tacchalât *lilayâ utkshipta* uttolito yo *bhujah*, tena *upadarçitayoh* kucayor *unmîlanti* dřiçyamànà *nakhâńkâvalir* yasyàs, tàdřiçi. *nilendivara-dâma*-tulyayà *dirghatarayâ dřishṭyâ mano dhayanti* pibanti. yady api '*indivaram* tu nilâbje ity etàvataiva *nila* 'ity asya gatârthatà, tathâpi *nila*-pada-samabhivyàhàre *indivara*-padasya utpala-màtre làkshaṇikatvam mayûra-kekâdivat.)

Çl. 35. he *pivaroru!* màńsale ùrù yasyàh sà, tat-sambodhane: bho *pivaroru priye! dalitâh* prakaṭitàh *kucayor nakhâńkâh* stanayor nakha-kshatàni yasyàm kriyàyàm yathà syàt tathà *ańkapâlim* àlińganam *racaya* dehi. kim křitvà: *mama ańkam upetya.* bho *hariṇâkshi! Çańkarâńke* Çańkarorau *sthitâ* ca '*asau Himaçaila-sutâ* ca Himaparvata-putrî, tasyàh *vilâsah*, tasya *lakshmim* çobhàm *anuhara* anukuru; etena "Umà-Maheçvaràv iva nirbàdham àvàbhyàm sthàtavyam" iti dhvanitam. — *(K.* he *pivaroru* pinoru! *mama* '*ańkam upetya, dalita-kuca-nakhâńkam* yathà syàt tathà *ańkapâṇim* àlińganam *racaya.* he *hariṇâkshi! Çańkarâńka-sthitâyâh Himaçaila-sutâyâh* Pàrvatyàh *vilâsa-lakshmim anuhara* sva-vilàsa-lakshmim sadřiçim kuru.)

Z. 15. *parishvańgât* àlińganàt. *parâvřittam* punar àgatam.

P. 41.

Çl. 36. *sa ko 'pi* acintya-sàmarthyah *mânmatho* Manmathàt Kandarpàj-jàtah *vikârah* pariṇàmah *me* mama *antarovřittih* mànasa-vřittih *tirayati* tiraskaroti. sah kah: *yah abhinavam* ca tad *vayaç* ca nùtanam vayah, tasya *vibhramah* vilàsah, tasmàd *avâptam janma* yena, tàdřiçah *prâg âsît* pùrvam babhùva. mànmatho vikàrah kidřiçah: *cittam* manah *unmathnâti* unmàda-yuktam karoti, tacchilah. punah kidřiçah: *vigato vishayopaplavo* vishaya-sambandho 'yasmin ànandena, etàdřiço ya *ânandas*, tena *sândro* ghanah. punah kidřiçah: *tava âçleshah* àlińganam, tasmàj *janma* yasya sah. punah kidřiçah: *prauḍham prema* utkřishṭà prîtih yasmin sah. *punar* iti vitarke; *nava iva* na jàto na janishyate tàdřiça iva, ity arthah. — *(K. abhinava-vayovibhramâvâpta-janmâ cittonmâthi mânmatho* yo *vikârah prâk* tava 'àçlesha-kàlatah pùrvam *vigata vishayopaplavânandena* vishaya-vyàpàra janmânanda-nigamena *sândro* vyàpta *âsît*, vàrdhakyàt kàmini sambhàshà rùpa-vishaya-vyàpàra janyânanda-rahita àsit, *sa ko 'pi* anirvacaniyo vikàrah *tava 'âçlesha-janmâ* san *ântarovittir* antar manasi vřittir vyavasàyàn *tirayati* pratibadhnàti, antar jaḍayati, ity arthah. *ântarovřittir* ity *âà* pùrvo *antah*-çabdo 'vyayah, na tv antah sambandhinya ity arthe, taddhitânte tadà àntarir ity eva syàt. punah kidřiçah: *prauḍha premâ* sampravardhita premà.)

Z. 6. *bhâvo* mano-'bhipràyah, tena *'anubaddhaṁ* sampâditam' iti.

Çl. 37. he *vâmoru* sundaroru! *hridayât* cittât *vahih yo bhavat* vartetu, *sah hi* niçcitaṁ *smaryate*. tava smaranam ayuktam; ity âha: *bhavati* iti. *mama* cittam eva *bhittis*, tasyâṁ *çâlabhañji 'iva* citta-nyasta-putralikâ *'iva râjate* çobhate; sarvadâ citte sattvân na smaranam, iti bhâvah. — (*K.* he *vâmoru* he manojñoru! *yo hridayâd vahih* sthitah, *sa* eva *smaryate*, *bhavati* tu *maç-citta*-rûpâyâṁ *bhittau* dehalyâṁ *çâlabhañji 'iva* likhita-kritrima-puttalikâ *'iva* nivida-sambandhâ *râjate*, ity arthah.)

Z. 13. *dâsyâh putri*, *kuttini* iti gâli-pradânaṁ. — (*K. dâsyâh putri* 'ity adhikshepoktih.)

Çl. 38. *tâṁ randâṁ* niyâmaka-çûnyâṁ çraddhâṁ *pâkhandeshu* sad-dharma-çûnyeshu, *koçeshv âkrishya*, *niyojaya* praveçaya. kidriçiṁ randâṁ: *pratikûlâṁ* asmad-ananukûla-kârya-kartrîṁ, *akulajâṁ* durbhagâ-prasûtâṁ, sammati-nivrittâv anurâgo nâsti, iti durbhagâ. kula-kshaye pravrittatvât *pâpâṁ*; *pâpâh* çamâdayah kula-kshaya-hetutvât, evam eteshâm api pâpatvaṁ, tad-*anuvartinîṁ* tad-anukûlâṁ. — (*K. tâṁ* çraddhâṁ *koçeshv âkrishya pâshandeshu niyojaya*. kidriçiṁ: asmat-*pratikûlâṁ*, *vipaksha-kula-jâtâṁ*, *pâpâṁ*, *randâm* ity adhikshepoktih, *pâpânuvartinîṁ* pâpânâṁ vivekâdinâm anukûlâṁ.)

P. 42.

Z. 5. (*K. bhanyamâni* 'ity atra "mayâ" iti çeshah.)

Z. 12. *vâsâgâraṁ* nivâsa-griham, ity arthah.

Dritter Akt.

P. 43.

Dvitîye 'ṅke tattad-dharmânushṭhâna-vaiphalyâya dambhâdîn preshayâmâsa Mahâmohaḥ, idânîm̃ tṙitîye 'ṅke Viveka-sainya-parâbhavâya pâkhaṇḍâḍambaraḥ samullasati.

Z. 4. *sâsram̃* açrubhiḥ sahitam̃. *priya-darçanam̃* priyam ishṭam̃ darçanam̃.

Çl. 1. sâ atrabhavatî pûjyâ *pâkhaṇḍa-hastam̃ gatâ* vedavâhya-karâkrântâ *katham̃ jîvati?* na katham api, ity arthaḥ. sà kà: *yasyâḥ amishu* vakshyamâṇeshu *prîtir* "asti" ity adhyâhâraḥ. amî ke, tân âha: *mukta 'iti. muktaḥ âtaṅko* bhayam̃ yais te, tâdṙiçâḥ ye *kuraṅgâḥ* mṙigâḥ te yâsu, tâdṙiçyaḥ *kânana bhûvo* vana-sthalyaḥ. *skhalanti vâriṇi* jalâni yebhyas te, tâdṙiçâḥ *çailâḥ*. tathà *puṇyâni* pavitrâṇi *âyatanâni* devatâgrihâṇi *santatam̃* anavaram̃ *tapo nishṭhâḥ* tapo-niratâḥ *vaikhânasâḥ* vânaprasthâḥ. 'katham̃ jîvati?" ity uktam̃, tatra dṙishṭântam âha: *çâṇḍâlasya veçma* mandiram̃, tasya *udaram̃* madhyam̃ *prâptâ kapilâ gaur iva;* yathà kapilà gaur gohantṙiṇâm̃ gṙihamadhyam̃ prâptà katham api na jîvati, tathà bhavatî pàkhaṇḍa-hastam̃ gatà katham api na jîvati, ity arthaḥ. *kapilâ* 'ity anena gavâm̃ kapilà gaur yathà uttamà, evam̃ çraddhà çânty-âdinâm̃ mádhye uttamà, iti bhâvaḥ. -- (*K.* itaḥ param̃ mithyâdṙishṭi-prayuktayà mahâbhairavi vidyayà âkṙishya nitâyâm̃ çraddhâyâm̃ karuṇayà saha tat-putryâḥ çântyâḥ saçokam̃ tad vicâraṇam̃: *mukta 'iti*. he *mâtaḥ* çraddhe! *yasyâ* bhavatyâḥ pûrvârdhoktesḥv *amishu prîtiḥ*, *sâ bhavatî adya pâshaṇḍa-hastam̃ gatâ katham̃ jîvati? câṇḍâla veçmodaram̃ prâptâ kapilâ gaur iva; câṇḍâlo* 'tra gohiṁsako yavanâdir bodhyaḥ. prîti vishayân âha: *mukta 'iti*, *muktâtaṅkâ* nirbhayâḥ *kuraṅgâ* yatra, tâdṙiçâ *kânana-bhavo* munînâm siddhaçramaḥ, ity arthaḥ. *skhalad-*

vârayaḥ patan-nirjhara-jalâḥ *çailâḥ*. *puṇyâny âyatanâni* puṇya-devagṛihâḥ. *santata tapo-nishṭhâ vaikhânasâç ca yasyâḥ prîtir amishu*, ity arthaḥ.

bhikshâm aṭitvâ prayato 'shṭa-mâsân,
sâgnir vane tishṭhati bhûri-kâlaṁ,
yo yatna-hîno nakha-loma-dhârî,
vaikhânasaṁ taṁ pravadanti dhîrâḥ;

iti *vaikhânasa*-lakshaṇaṁ.)

Çl. 2. *mâm anâlokya* adṛishṭvâ *snâna-bhojana-jalapânâni na kurute*, ata eva hetoḥ *mayâ rahitâ çraddhâ kshaṇam api na jîvati*. iti çânter upayuktiḥ, anena çraddhâ-çântyoḥ paraspara-vyâptir darçitâ. — (*K. mayâ rahitâ çraddhâ muhûrtam api na jîvati*, kâm api kriyâṁ mat-sânnidhyaṁ vinâ na karoti, 'ity âha: *mâm anâlokya*, iti.)

Z. 15. *vishamâḥ* atyugrâḥ *jvalanasya* agneḥ *jvâlâḥ*, tâsâṁ *kulaṁ* sâmûhaḥ, tadvât *karṇa-kaṭûni*, ata eva *duḥsahâni*, ity etad *akshara*-viçeshaṇaṁ.

P. 44.

Çl. 3. he *sakhi! mayâ kvacid api* kutrâpi, *aho* açcarye, *çraddhâyâḥ vârtâpi na 'âkarṇitâ khalu* niçcayena na çrutâ. "kva tvayâ 'anveshitâ?" ity apekshâyâm âha: *nivâra* 'iti. *nivâraiḥ* araṇyaçâlibhiḥ *aṅkitâni* cihnitâni *saikatâni* pulinâni yeshâṁ tâni; tathâ *vaikhânasair* vânaprasthaiḥ *âkrântâni* yâni *saritâṁ* nadînâṁ *kûlâni* tîrâṇi anveshitâni. punar *yajvanâṁ* yâjñikânâṁ *gṛihâḥ pratyekaṁ*, *samidhaḥ*, *cashâlo* yûpakaṭakaḥ, *camasaiḥ* pâtra-viçeshâiḥ, taiḥ *vyâptaṁ*, *nirûpitâḥ* dṛishṭâḥ, ity arthaḥ. *eva*-kâro api-arthe, *catvâro* 'py *âçramâḥ pratipadaṁ* pratisthânaṁ *nirûpitâḥ* vilokitâḥ. — (*K. kiyad anvishyata* iti, bahutarânveshaṇaṁ kṛitaṁ, ity arthaḥ. tad eva darçayati: *nivâra* 'iti. *nirûpitâ* iti liṅga-vyatyayena sarvatra 'anveti; tathâ ca *saritâṁ* nadînâṁ *kûlâni nirûpitâni*; kîdṛiçâni: *vaikhânasair âkrântâni*, ata eva *nivâra aṅkita-saikatâni* sikatotthita-pulinânâm uñchavṛitty-ânîta-patita-nivâra-cihnitatvât. tathâ *yajvanâṁ gṛihâ nirûpitâḥ*, *casâla-camase* yajña-pâtre, *pratyekam* iti brahmacârî, gṛihî, vânaprastho, bhikshuç ca, ity *âçramâç catvâraḥ*, eshâṁ nivâsa-sthânâni nirûpitâni, ity arthaḥ. astu tâvad darçanaṁ, *çraddhâyâ vârtâpi*, he *sakhi*, *kvacid api na karṇitâ*, ity arthaḥ; *aho* âçcarye.)

Z. 11. (*K. çraddhâ asti* çraddhâ bhavati, ity arthaḥ.)

Z. 14. adṛishṭam anukûlaṁ nâsti, ity âha: *kimu pratikûle vidhâtari*, sarvam api *sambhâvyate*, ity âha: *devi* iti.

P. 45.

Çl. 4. *hanta* iti duḥkhe, *vidher* daivasya *vṛittayaḥ* âcarita-rûpâḥ *vâmâḥ* vakrâḥ sakala-loka vilakshaṇâḥ, tad eva darçayati: *devi* devatâ rûpâ *Çrîḥ* sâkshât Lakshmîḥ *Janakasya âtmâ* sâkshâtkâravataḥ *kanyâpi Rakshaso Daçagrîvasya gṛihe âsît. bhagavati* sarvânushṭhâna-mûla bhûtâ *veda trayî eva Dânavaiḥ* Daityaiḥ *rasâtalaṁ* pâtâlaṁ *nîtâ* prâpitâ. *ca* ity aparaṁ, *Gandharvasya Madâlasaṁ tanayâṁ* kanyâṁ *Daityendraḥ Pâtâlaketu* saṁjñaḥ *cha*

lât mishât *upajahâra* sva-nikaṭaṁ nîtavân; *daityendraḥ upajahâra* ity atra sandhiç cityaḥ. evaṁ çraddhâyâḥ pâkhaṇḍa-hasta-gamane daivaṁ mûlaṁ, iti bhâvaḥ. — (*K. Çrîr* eva 'avatîrṇâ *Janakâtmajâ Daçamukhasya rakshaso gṛihe âsît. pûrvaṁ Dânavair bhagavati trâyî râsâtalaṁ nîtâ. Pâtâlaketur Daityendro 'pi Gandharvasya tanayâṁ Madâlasâṁ chalâj jahâra*, ato *hanta* khede *vidher vṛittayo* vyavasâyâ *vâmâḥ* pratikûlâ, *vishamâ* atyanta-duḥkha-dâyikâḥ; sarvatra paurâṇikî kathâ anusandheyâ.)

Z. 10. *gâlan mala-paṅkaḥ* sravan vishṭâ-kardamaḥ, tena *picchalâ* masriṇâ, ata eva *bîbhatsâ* bhayânakâ *duḥprekshyâ* drashṭum asakyâ *deha-chaviḥ* kântir yasya, *ulluñcitâḥ* utpâṭitâḥ *cikurâḥ* keçâḥ yena saḥ, *mukta-vasano* digambaraḥ. — (*K. ulluñcita-cikuro* vikîrṇa-keçaḥ, *mukta-vasano* digambaraḥ sa ca 'asau *durdarçanaç* ca °iti vigrahaḥ, *çikhi-çikhaṇḍakasya* mayûra-pakshasya *piñjikâ* vyajanaṁ tad-*dhastaḥ*.)

P. 46.

Z. 1. *prasphuranto* dedîpyamânâḥ ye *mayûkhâḥ*, teshâṁ *mâlâbhiḥ* kiraṇa-paramparâbhiḥ *udbhâsitaṁ* prakâçitaṁ yad *bhuvanântarâlaṁ* bhuvana-madhya-pradeçaḥ tasmin; *mârtaṇḍa-maṇḍale* sûrya-maṇḍale. — (*K. sphuradbhir mahâ-mayûkhair udbhâsitaṁ bhuvanântarâlaṁ* yena, tâdṛiçe *pracaṇḍa mârtaṇḍa-maṇḍale jvalati* sati, ity arthaḥ.)

Z. 3. *tarhy anantaram eva* idânîm eva, ity arthaḥ. *naraka-vivarât* naraka-kuṇḍât *uttîrṇo* nirgataḥ. *Mahâmoha-pravartitaḥ* Mahâmoha-preshitaḥ. — (*K. âṁ* smaraṇe.)

Z. 10. *yathâ nirdishṭaḥ* "ya eshaḥ" ity âdinâ pûrvam uktaḥ digambaraḥ; asya bhâshâ mâgadhî. bhikshu-kshapaṇaka-râkshasântaḥpuravâsî-ceṭakâdînâṁ mâgadhî 'ity uktâ. *âtmâ dîpa iva* 'ity uktaṁ, tatra 'ayam âtmâ parichinna-parimâṇaḥ, *gṛiha-madhye* ity uktatvât, yathâ dîpaḥ ghaṭa-gṛiha-prasâdodara-prakâçakaḥ parimita-prakâçatvâd, evam ayam âtmâ çarîrântaḥ-prakâçatvât, tato 'pi svalpa-parimâṇa iti; uktaṁ Jinaiḥ: svalpa âtmâ svalpa-parimâṇaḥ, iti. — *çrâvakâḥ* çishyâḥ. — *pudgalaṁ* çarîraṁ, "*pudgalo* vâpur âtmanaḥ" iti Dharaṇiḥ; tasya çleshma-sûtrâdri pûrṇatvât katham api na çuddhir, iti bhâvaḥ. *paricaraṇaiḥ* sevanaiḥ. — âkâṅkshâṁ svayam eva 'utthâpya 'âha. — (*K. kshapaṇakaḥ* parivrâjakaḥ. iyam api paiçâcî bhâshâ. etan mate *arhan*-nâmâ îçvaraḥ, sa eva ca Jina etac-châstra-praṇetâ, jyotisha jñânaṁ ca 'etac-châstrâd bhavati 'iti. etac-châstra-pratipâdyam âha: *navadvâra* 'iti. *nava-dvâraṁ gṛihaṁ* çarîraṁ, tan-*madhye jvalad-dîpa*kâraḥ *paramâtmâ*, *esha Jinavareṇa paramârtha-saukhya-mokshado bhâshitaḥ*, ity arthaḥ; vedânti nayokta saṁsâra-mithyâtva-nirâsâya 'uktaṁ paramârtha 'iti. *sâdhakaiḥ* snânâdi niyamena devatopâsâḥ. *puggalaṁ* çarîre 'tra bhâshâyâṁ; atha 'âtmanaḥ çuddhy arthaṁ snâna-çaucâdikaṁ ity atra 'âha: *âtmâ vimala* 'iti. nanu veda prâmâṇyânabhyupagamâd vedoktâ ṛishi paricaryâ bhavan-mate nâsty eva, tataç ca: *kîdṛiçî ṛishi paricaryâ?* iti sâdhakânâṁ praçnam âçaṅkyan anuvadati: *kim bhaṇadha?* iti. sâdhakasya praçnottaram âha: *dâle*

iti. *caraṇa-prâṇâmaḥ* "kartavyaḥ" iti çeshaḥ; *mishṭaṅ bhojanaṅ* "dâtavyam" iti çeshaḥ; bhavataṅ *dârân ramayatâṅ ṛishiṇâṅ* sthâne *irshyâ*-rûpaṁ *mataṅ na kartavyaṅ*, ity arthaḥ.)

P. 47.

Z. 3. *ubhe* Çânti-Karuṇe.

Z. 5. (*K. lâule* iti mânye 'syâṅ bhâshâyâṅ.)

Z. 7. *parihârishyati* "bhavati" iti çeshaḥ.

Z. 12. (*K.* ahiṅsâyâ. âstika-nâstikobhaya-dharmatvâd *ahiṅsâ-sakâçât* çravaṇaṅ.)

P. 48.

Çl. 5. kidṛiçî *eshâ: duḥkhadaḥ âcâro* yasyâḥ sâ. kidṛiçîṅ *ambâṅ: san âcâro* yasyâḥ sâ, tâṅ. punaḥ *duḥkhadaḥ darço* darçanaṅ yasyâḥ sâ. *priye âtmani darçanaṅ* yasyâs tâṅ. ity *ambâ*-viçeshaṇaṅ; ambâ 'iva mâtâ 'iva hita-kâriṇî, tâṅ. *eshâ durâçâ kathañcana* katham api *na anusarati*, ativilakshaṇa-veshatvâd, iti bhâvaḥ. — (*K. eshâ* tâmasî çraddhâ *kathañcanâpi* mama *ambâṅ* sâtvikîṅ çraddhâṅ *na anuharati* na sadṛiçî-karoti viruddha-dharmatvâd ity âha: *durâcârâ*, iti.)

Z. 6. *saugateshu* bauddha-viçesheshu.

Z. 8. *buddhâgamaḥ* Buddha-çâstrâbhimâni-devatâ-rûpaḥ.

Z. 9. *upâsakâḥ* nâstika-darçana-vicâra-ratâḥ.

Çl. 6. *saiva dhî-santatiḥ* vijñâna-santatiḥ *adhunâ* idânîṅ, *nirgataḥ vishayoparâgaḥ* vishaya-sambandho yasyâḥ sâ, nîla-pîtâdy-anekavidha-vishayâkâropaplava-çûnyâ, *sphurati* anupahatâ prakâçate; ata eva "ahaṅ sarvajño 'smi" iti mantavyaṁ. kasmât: *vigalitâkhila vâsanatvât*, *viçeshṇa galitâḥ* nashṭâḥ *akhilâḥ samastâḥ vâsanâḥ* saṅskârâḥ, teshâṅ bhâvaḥ tattvaṅ; tasmât saṅskâra-kâriṇîbhûta vâsanocchedâd îdṛiçî vijñâna-santatiḥ samullasati, ity arthaḥ. sâ kâ: *yatra* yasyâṅ dhî-santatau *arpitâḥ* sampâditâḥ *bhâvâḥ* ghaṭâdayo vishayâḥ buddhau kalpitatvâd antarvartino 'pi *vahir iva* vâhyâ iva *pratibhânti* abhijñâyante bhrântyâ; idaṅ viçeshaṇa-dvayaṅ bhâvânâm eva *sâkshân* niḥsandigdhaṅ *kshaṇa-kshayiṇaḥ* svarasa-nâçino, na kevalaṁ kshaṇikâḥ *nirâtmakâç ca*, nirastâ asthirâ âtma-sthitir yeshâṅ te. ayam eva prâmâṇiko mârgo bhavadbhir apy anusartavyaḥ, iti bhâva-tâtparyaṅ. — (*K.* atra mate vâsanâ-vaçâj jñâna-vilasita-mâtraḥ saṅsâraḥ, vâsanâ-vigame tu nirvishayâ jñânadhâraiva 'avaçishyate, iti tad âha: *sâkshâd* iti. *yatra* dhî-santatâv *arpitâḥ sâkshât kshaṇa-kshayiṇa eva bhâvâ nirâtmakâ* deha-bhinnâtma-rûpa-padârthântara-rahitâ *vahir iva* jñâna bhinnâ iva *pratibhânti*, *saiva dhî santatir adhunâ vigalitâkhila-vâsanatvân nirvishayoparâgâ* rahitâ *sphurati*. ajñâna-daçâyâṁ vishayopalambhâbhâvâd vishayâsattvângîkâreṇa bhâvânâṁ kshaṇakshayitvasya sâkshâttvaṁ.)

Z. 15. (*K. mokshaç ca* 'iti, dehâtma-vâdinâṁ eshaṅ deha-nâçasyaiva mokshatvât.)

Çl. 7. *yatra* yasmin saṅgata-dharme *manoharaṁ* atisundaraṁ *layanaṁ* gṛihaṁ; *âvâso* nivâsa-sthânam "asti" ity adhyâhâraḥ; na tu kleçâvahâ guhâḥ. *abhiprâyânurûpâḥ* abhilashita-vesha-bhûshânukûlâḥ *baṇig-bhâryâḥ* nâryaḥ vâravilâsinyaḥ santi; na tu savarṇâ vivâhitâḥ. *vâñchita-kâlaṁ* abhilashita-samayaṁ *ishṭam açanaṁ* bhojanaṁ asti; na tu âhnikânantara-kâle eva. *mṛidu-prastarâḥ* komalâstaraṇa-yuktâḥ *çayyâḥ* santi; na tu kuça-kaṇṭhâdikâḥ. *vilasanti* prakâçamânâ *jyotsnâ* candraprabhâ, tayâ *ujjvalâḥ* çobhamânâḥ *râtrayaḥ; klṛiptaḥ* kṛitaḥ *aṅga-râgaḥ* aṅge kuṅkuma-candanâdi-lepo yasmin, etâdṛiço ya *utsavaḥ* kâma-mahotsavaḥ suratâdi-rûpaḥ, saiva *krîḍâ*, tasyâm *ânando-bharâḥ* sukha-samûhâḥ, taiḥ *vrajanti* sukhena gacchanti, ity arthaḥ. kîdṛiçyo râtrayaḥ: *yuvatibhiḥ* taruṇîbhiḥ *çraddhâ-pûrvaṁ* âdara-pûrvaṁ *upâsitâḥ* sevitâḥ. anena asmâkaṁ sukha-mukti sukha-sâdhye, anyeshâm atikleça-sâdhye, iti bhâvaḥ. — *(K. saukhyaṁ* darçayati: *âvâsa,* iti. *âvâso* gṛihaṁ; *liyate* upaviçyate asminn iti *layanaṁ* âsanaṁ, dvayam api *manoharaṁ,* yan-matâviruddham iti çeshaḥ. tathâ *baṇijâṁ nâryaḥ* sundaryaḥ paṇya-striyo veçyâ vâ *svâbhiprâyânukûlâḥ*. tathâ *yatheshṭa-kâlam ishṭam* abhishṭaṁ *bhojanaṁ*. *mṛidu-srastarâ* komalâstaraṇâ *çayyâ* ca, yan-matâviruddhâ, iti çeshaḥ. tathâ *yuvatibhiḥ klṛiptâ* ye *'ṅgadânotsavâs* tad-rûpaiḥ *krîḍânanda-bharair vilasaj-jyotsnâ râtrayaḥ çraddhâ-pûrvam upâsitâ* yathâ-çraddham *upâsitâḥ* sevitâ *yânti*, yatra mata iti çeshaḥ; îdṛiça-sukhasya tan-matâviruddhatvât.)

P. 49.

Z. 3. *taruṇaḥ* pragalbhaç ca 'asau, *tâla-taruç* ca tâla-vṛikshaḥ, tadvat *pralambhaḥ* uccair lamban, *lambayamânaṁ kashâyaṁ* sugandhaṁ *piçaṅgaṁ* raktaṁ *civaraṁ* vastraṁ yasya. *muṇḍitaḥ sacûḍaḥ* saçikhaḥ *muṇḍa* rûpaḥ *piṇḍo* yasya.

Z. 9. *saṅskriyante* vishayî-kriyante *saṅskârâ* bhâvâḥ, ity arthaḥ. *sthâyî* paraloke bhoktâ. *na îrshitavyaṁ* iti sarvasya kshaṇikatvât dveshṭṛ-dveshyayoḥ parasparâsaṅsargâd, iti bhâvaḥ. — *(K. tasmâd bhikshushv* iti yata *âtmâ sthâyî nâsti, tasmât* paralokâbhavena, ity arthaḥ.)

P. 50.

Z. 3. *kshapaṇakaḥ* digambara-siddhântaḥ.

Z. 9. *kasya kṛite vrataṁ dhâryate?* pralaya-kâle tvadîya-sthiter asatvât mudhâ prayâsaḥ, iti bhâvaḥ.

Z. 11. *asmat-santatau* asmad-vijñâna-paramparâyâṁ *patitaḥ* pravishṭaḥ *kaçcid vijñâna-lakshaṇaḥ* pravṛitti-vijñâna-santânântaḥpâtî saṅsârî *mokshyate,* ity âkhaṇḍalârthaḥ. — *(K. vijñânaṁ* viçesha-jñânaṁ tadîya-mata-siddhaṁ muktyupayogi jñânaṁ, tal *lakshaṇas* tat siddhaḥ, *vâsanâ* mithyâjñânaṁ, *santatiç* caitradhârâ, tat *patitaḥ* kaçcic caitro *mokshyate*, ity arthaḥ. muktiç ca dehâtma-vâdinâṁ eshâṁ bhûta-catushṭaya-viçishṭa-dehadhârâ vigama-rûpaṁ maraṇam eva.)

P. 51.

Z. 10. *vihâra-dâsî-bhujañgô* veçyâ-bhartâ. *viçrabdhaṁ* saviçvâsaṁ.

P. 52.

Çl. 8: *ko nâma aninditaḥ* san, "lokair" iti çeshaḥ, *prâjyaṁ* prakṛishṭaṁ, dhâtu-mûla-jîva-cintâ-lâbha-buddhi-paramârtha-candra-sûrya-grahaṇa-saṁvâda-bhogâdinâ daça-vidhena sarvajñatvaṁ prakarshaḥ, *svârâjyaṁ* svântam *utsṛijya* tyaktvâ, *bhavân iva loke nindyâṁ* çâstra-viruddhâṁ *piçâcatâṁ* piçacatvaṁ *abhivâñchati* abhilashati? na ko 'pi, ity arthaḥ. — (*K. prâjyaṁ* prakṛishṭaṁ *svârâjyaṁ* svargâdhipatyam *utsṛijya, aninditaḥ ko nâma loka-nindyâṁ piçâcatâm abhivâñchati bhâvan iva*, ity arthaḥ.)

Z. 1. ârhata-mataṁ tv atyanupâdeyaṁ, ity âha: *ârhataṁ*, iti. *ârhatam api dharma-vedanaṁ* dharma-jñânaṁ *kaḥ çraddhatte* kaḥ svikaroti? na ko 'pi, ity arthaḥ.

Z. 8. *anâdi-pravṛittena* anâdi-siddhena *jyotishâ* jyotiḥ-çâstreṇa *atîndriyaṁ* indriyâgocaraṁ yat *jñânaṁ*, tat-*jñâna-pratâritena* vañcitena *bhavatâ atikashṭam* atiduḥkhâvahaṁ *vratam âçritaṁ* añgikṛitam, ity arthaḥ. — (*K. jyotiḥ-çâstrâdhînâtîndriya-jñâna-pratâritena*, ity arthaḥ.)

Çl. 9. deha-parimitatvam âtmano na sarvajñatvam, ity âha: *jñâtuṁ*, iti. *vapuḥ parimitaḥ vapushâ pari* samantân *mitaḥ* çarîra-mâtra-parimâṇo *jîvo* vijñâna-rûpaḥ *trilokîṁ jñâtuṁ kathaṁ kshamate*, iti *kathaya*, na katham api samartho bhavati, ity arthaḥ. trailokyâjñâne hetum âha: *sañgatim antareṇa*, iti, sambandhaṁ vinâ, ity arthaḥ. uktam arthaṁ dṛishṭântena dṛiḍhayati: *suçikho 'pi api* çabdât susneho 'pi *dîpaḥ kumbha-nihitaḥ* kumbhântaḥ prakshiptaḥ *gṛihasya udare* madhye vidyamânân *bhâvân* padârthân *prakâçayituṁ na çaknoti* yathâ, tathâ sva-prakâço 'py âtmâ çarîra-madhye vartamânaḥ parichinnaḥ bhuvanântara-vartino vahiḥsthân sûryâdîn naiva prakâçayed, ity arthaḥ, evaṁ viruddham upapâdayatâ bhavanto vañcitâḥ, iti bhâvaḥ. — (*K. vapushâ parimitaḥ* parichinno bhavad-ukta-dîpa-kalikâ-rûpo vapur-madhya-vartî *jîva* âtmâ *kathaṁ trilokîṁ jñâtuṁ sañgatiṁ* pratyâsattiṁ *vinâ kshamate*, tat *kathaya. kumbha-nihitaḥ suçikho 'pi dîpo gṛihasya 'udare* 'pi *bhâvân* padârthân *prakâçayituṁ na çaknoti* svîya-çikhâ-sañgaty-abhâvâd, ity arthaḥ. ataḥ çarîra-pihita âtmâ kathaṁ svâsannikṛishṭân bhâvân jñâsyati, ity arthaḥ. na ca 'evaṁ Buddhasyâpi kathaṁ sarvajñatvam iti vâcyaṁ, tasya 'îçvara-rûpatvena saṁsâri-parichinnatvânañgîkârât saṁsâri-çarîrâṇâm nirâtmakatvât, Buddha-çarîre tu sarvajñeçvarâdhishṭhâna mâtraṁ, na tu dîpa-kalikâ-kâratayâ çarîrântar-vartitvaṁ, iti bhâvaḥ. *varaṁ* çreshṭhaṁ.)

Z. 11. ârhata-mata-dûshaṇam upasaṁharati: *tasmât*; iti. *loka-dvaya-viruddhât* ihaloka paralokayor viruddhât duḥkhât; ihalokaḥ sukha rûpaḥ, shoḍaça varshâḥ striyaḥ, candanaṁ, sumanasâṁ mâlâḥ, ayam eva svargaḥ, ihaloka eva naraka rûpaḥ, âdhayo vyâdhayaç ca narakâṇi, tad bhinna loke

pramâṇâbhâvâd, iti bhâvaḥ. *sâkshât sukhâvahaṁ* dharma-nirapekshatayâ sukha-jânakaṁ.

P. 53.

Z. 3. (*K. Soma-siddhântaḥ*, iti; Umayâ saha vartamânaḥ *Somo* Maheçaḥ, tat *siddhântaḥ*, ity arthaḥ. idam apy upanishad-viruddhâyâḥ çarîra-sattve mukter bodhanâd, veda-viruddhâgama-rûpatvâc ca nâstika-çâstraṁ.)

Çl. 10. ahaṁ *jagat paçyâmi*. kîdṛiçaṁ jagat: *mitho 'nyonyaṁ bhinnaṁ*, punar *îçvarâd abhinnaṁ*, yathâ mudrikâkara-kaṅkaṇâdeḥ paraspara-bhede 'pi suvarṇâd abhinnaṁ, tathâ, ity arthaḥ. kîdṛiço 'haṁ: *narâsthi-mâlayâ* mahâ-çaṅkhâkshamâlayâ *kṛitaṁ* sampâditaṁ *bhûri bhûshaṇaṁ* yena, saḥ. *çmaçâne* Kâçyâṁ *vasati*, tacchilaḥ. *nṛi-kapâle bhojanaṁ* yasya, saḥ. *yoga* eva *añjanaṁ*, tena *çuddhaṁ* abhrântaṁ *darçanaṁ* jñânaṁ yasya, saḥ. etena svîyaṁ vratadhâraṇaṁ darçitaṁ. — (*K. mithaḥ* parasparaṁ *bhinnam* api *jagad îçvarân* Maheçâd *abhinnam paçyâmi*, yato 'haṁ *yogâñjanena çuddha-darçanaḥ*, *darçanaṁ* atra cakshuḥ; jagata îçvarâbhinnatvena darçanâd âtmano 'pi îçvarâbhinnatva-darçanena îçvara-veçatvam âha: *narâsti* iti, Maheçasya 'evam-rupatvât.)

Z. 12. *upasṛitya* samîpaṁ gatvâ.

Çl. 11. *are re kâpâlika!* ity âkshepeṇa. — (*K. saukhyaṁ* sukhaṁ.)

Z. 17. moksha-praçnasya 'ayuktatvâd *dharmaṁ tâvad* âdâv eva *avadhâraya* niçcinuhi, ity arthaḥ.

P. 54.

Çl. 12. *naḥ* asmâkaṁ *brahma-kapâle kalpitâ surâ* madyaṁ, tasya *pânaṁ*, tena *pâraṇâ* pushṭiḥ, "bhavati" ity adhyâhâraḥ. kîdṛiçânâṁ naḥ: *vahnau* agnau *mastishkeṇa* kapâlântarvṛitti-rasena *âktâ* militâ yâ *vasâ*, tayâ *abhidhâritâni mahâmâṁsâni* manushya-mâṁsâni, teshâm *âhutir juhvatâṁ* homaṁ kurvatâṁ. kiṁ ca 'nyad api: *naḥ* asmâkaṁ *Bhairavo devaḥ arcyaḥ* pûjyaḥ. kaiḥ sâdhanais, tâny âha: *purushâ* eva *upahârâ* upakḷiptâ *balayo* balidâna-rûpâs, taiḥ. kathaṁ-bhûtaiḥ purushopahâra-balibhiḥ: *sadyaḥ* tatkshaṇam eva *kṛittaḥ* chinnaḥ *kaṭhoraḥ* nishṭhuraḥ *kaṇṭhas*, tasmâd *viçesheṇa galat kîlâlaṁ* raktaṁ, tasya *dhârâbhir* ujjvalâḥ çobhamânâs, taiḥ. *no* 'smâkaṁ *Bhairavaḥ* Umâkântaḥ *arcyaḥ*, *devaḥ* sva-prakâçaḥ. kaiḥ: *puri* çarîre çete *purushaḥ* antarâtmâ, tad-artham *upaharaṇâni* samarpaṇâni ity *upahârâḥ*, ta eva *balayaḥ*, taiḥ. kîdṛiçaiḥ: *sadyaḥ* tatkshaṇam eva *kṛitta-kaṭhora kaṇṭhâd* iva unmanita-kaṇṭhâd iva *vigalad-amṛita-dhârâbhiḥ çobhamânaiḥ*. *mastake* bhavaṁ *mastishkaṁ* payaḥ, tena *âktâ* kântimatî yâ *vasâ* snehaḥ, tena *abhidhâritâḥ* siktâḥ *mahântyo* vishayeshu pravṛittâ buddhi-vṛittayaḥ tâ eva *mâṁsâni*, teshâm *âhutayaḥ agnau* Çiva-mûrtau *juhvatâṁ* Çivârpaṇaṁ kurvatâṁ, ity arthaḥ. kiṁ ca: *no* 'smâkaṁ brahmarandhropalakshitaḥ kapâlo *brahma kapâlaḥ*, tatra *kalpitâ* vidyamânâ *surâ* cândrikalâ, tasyâḥ *pânena pâraṇâ*-vrata samâptiḥ; ata eva ayam Umayâ sahitaḥ *Somas*, tasya *siddhântaḥ*. —

(*K. brahma-kapâle* brâhmaṇa-muṇḍâsthi-khaṇḍe *kalpitâyâḥ surâyâḥ pânena no* 'smâkaṁ *pâraṇâ* ûpavâsânantara-bhojanaṁ. naḥ kidṛiçânâṁ: *mastishkaṁ* çârîraṁ tailaṁ, tena *âktayâ vasayâ* majjayâ *abhighâritânâṁ* siktânâṁ *mahâmâṅsânâṁ* nara-mâṅsânâm *âhutir vahnau juhvatâṁ*, tathâ *Mahâbhairavo devo* Maheço *no* 'smâkam *arcyaḥ*. arcanopâyam âha: *purusha*, iti; upahṛita-valibhir, ity arthaḥ. kidṛiçaiḥ: *sadyaḥ kṛitto* yaḥ *kaṭhoro* dṛiḍhaḥ *kaṇṭhas*, tato *vigalantyâ kilâla-dhârayâ* çoṇita-pravâheṇa *ulvaṇair* bhûshaṇair, ity arthaḥ.)

Z. 5. (*K. dâruṇa*, iti, ahiṅsakatvâd Bauddhânâṁ.)

Z. 7. *vipralabdhaḥ* dharmâd vyâyitaḥ. — (*K. varâko* nikṛishṭaḥ.)

Z. 8. *pâkhaṇḍâpasada* pâkhaṇḍâdhama. *cûḍâla-veça* câṇḍâla-veça. — (*K. apasado* 'dhamaḥ. *vedânta* iti; vedantaikadeçi-çâstra-*prasiddhaḥ*, ity arthaḥ.)

Çl. 13. *ahaṁ*, *Harir* Vishṇuḥ, *Haro* Mahâdevaḥ, *Surâḥ* Indrâdayaḥ, *jyeshṭhâḥ* vayasâ, *çreshṭhâḥ* sâmarthyena, tân *surân* devân *âhare* ânaye. *viyati* âkâçe *vahatâṁ* gacchatâṁ *nakshatrâṇâṁ gatir api ruṇadhmi*. kiṁ ca: *nagâḥ* parvatâḥ, *nagarâṇi* pattanâni, taiḥ *sahitâm imâṁ mahiṁ* pṛithivim *ambhaḥ-pûrṇâṁ vidhâya* udaka-pûrṇâṁ kṛitvâ, *tat toyaṁ* jalaṁ *kalaça-çakalaiḥ kshaṇena* çîghram eva *pibâmi*. Bhairavopâsakânâm asmâkam Soma siddhântinâm îdṛiçaḥ prabhâvaḥ, iti bhâvaḥ. — (*K. Harir* Vishṇuḥ, *Haro* Maheçaḥ, *Surajyeshṭho* Brahmâ, etân *surân aham iha âhare* ânayâmi. *viyati* âkâçe *vahatâṁ* calatâṁ *nakshatrâṇâṁ gatir api ruṇadhmi* pratibadhnâmi. *naga-nagara-sahitâm imâṁ mahîm âmbhaḥ-pûrṇâṁ vidhâya, sakalaṁ tat toyaṁ pibâmi*, etat sarvaṁ *kalaya* paçya, ity arthaḥ.)

P. 55.

Z. 2. *khaḍgam âkṛishya* koshân niḥsârya. — (*K. tan na marshaṇiyaṁ* na kshamaṇîyaṁ.)

Çl. 14. *Bhargasya gṛihiṇîṁ* Mahâbhairavîṁ, *ḍaman* çabdaṁ kurvan yo *ḍamaruḥ* vâdya-viçeshaḥ, tasya *ḍâṅkṛitiḥ* ḍâṅ-karaṇaṁ çabdaḥ, tena *hûtaḥ* âhûto yo *bhûta-vargaḥ* Piçâca-samûhaḥ, tena *sârdhaṁ* saha *rudhiraiḥ dhinomi* prîṇayâmi. kidṛiçai rudhiraiḥ: *esha* yaḥ *karâlo* bhayâvahaḥ *karavâlaḥ* khaḍgas, tena *nikṛittaṁ* chinnaṁ yat *kaṇṭha-nâlaṁ*, tasmâd *ucchalanto* udgacchanto *bahulâḥ phenilâḥ* saphenâ *budbudaughâḥ* yeshu, taiḥ. — (*K.* so 'haṁ, *ḍamad* ity avyakta-çabda-kâriṇo *ḍamaror ḍâṁ* ity avyakta-çabda karaṇena *hûta* âhûto *bhûta-vargo* yayâ, tâdṛiçîṁ *Bharga-gṛihiṇîṁ* Maheça patnîṁ Durgâṁ *rudhirair dhinomi* prîṇayâmi, ity arthaḥ, "dattvâ" ity arthâd rudhirâṇy eva dattvâ. rudhiraiḥ kidṛiçaiḥ: *karâleṇa* bhîshaṇena *karavâlena* khaḍgena *nikṛittâc* chinnât *kaṇṭha-nâlâd uccaladbhir* udgacchadbhir *bahula-budbudaiḥ*, *phenilaḥ* phena-yukta *oghaḥ* payaḥ-pravâho yeshâṁ, tâdṛiçaiḥ.)

Z. 8. *udyacchati* sakampaṁ darçayati.

Z. 13. *pratisaṅharati* punaḥ koçe pratikshipati.

P. 56.

Z. 1. *paramo dharmah*, ity upahasati: *atha*, iti. dharmaṁ pṛishṭvâ mokshaṁ pṛicchati: *atha*, iti.

Çl. 15. Mṛiḍasya patnî *Mṛiḍânî*, tasyâḥ *patiḥ* Umâ-patiḥ Somaḥ *ity îçe* iti vadati sma. *iti* 'iti kiṁ: *candra-cûḍaṁ* candra-çekharaṁ *vapur* yasya, tâdṛiçaḥ san *sânandaṁ* yathâ syât tathâ *Pârvatyâḥ pratirûpayâ* sadṛiçayâ *kântayâ âliṅgito* yaḥ, sa *muktaḥ krîḍati* 'iti; Someçvaropâsakânâṁ sarûpâ muktir, ity anvayaḥ; Somasiddhânta-çabdaḥ, iti bhâvaḥ. kathaṁ îdṛiçaṁ sukhaṁ mokshaḥ? ity ata âha: *vishayaiḥ* stry-âdibhir *vinâ sukhaṁ kvâpi na dṛishṭaṁ;* âtma-rûpe sukhe mânâbhâvâd, iti bhâvaḥ. nanu tarhi duḥkha-nivṛittir eva vaiçeshikâdi-sammatâ muktir astu, ity âha: *ânandaḥ* sukhaṁ, tasya *bodhaḥ* anubhavaḥ, tena *ujjhitâ* rahitâ *jîvasya sthitir eva muktiḥ*, *upalâvasthâ kathaṁ prârthyate* katham abhilashyate? upalâvasthâvad acetanatvena purushârthatvâd, iti bhâvaḥ. jñânitvaṁ parityajya pâshâṇa-padavî-prârthanam atyâçcaryaṁ vaidikatvâbhimâninâṁ. — (*K. mukto* janaḥ *candra-cûḍa-vapuç* candra-viçishṭa-mauliḥ san, *Pârvatyâḥ pratirûpayâ dayitayâ sânandaṁ* yathâ syât tathâ *âliṅgitaḥ* san *krîḍati, Bhavânî-patir* Maheçaḥ *ity âce.* nanu dayitâdikaṁ vinâ tad-âliṅganâdi-janya-sukha-tulyaṁ sukhaṁ eva muktir, iti kiṁ na 'ucyate? ity atra 'âha: *dṛishṭam* ity-âdi, *na vishayair*-ity-antaṁ. *vishayair* dayitâdibhir *vinâ* nirvishayaṁ *sukhaṁ kvâpi na dṛishṭaṁ*, atas tâdṛiçî na muktir, iti bhâvaḥ. sukhâdy-açesha-viçesha-guṇerhâ muktiḥ kiṁ na 'ucyate? ity atra 'âha: *ânanda* 'iti; *ânandena* sukhena *bodhena* jñânena ca *ujjhitâ jîvasya* âtmanaḥ *sthitir eva muktir*, "ity api na 'ucyate" iti çeshaḥ. tad-amuktau hetum âha: *upala* 'iti; tâdṛiçî muktiḥ *çilâvasthayâ* sthiti-rûpaiva sâ *kathaṁ prârthyate?* ity arthaḥ.)

Z. 8. *âçraddheyam* anâdaraṇîyaṁ.

Z. 11. *açraddhayâ âkshiptaṁ* vyâptaṁ, ity arthaḥ.

Çl. 16. bhikshu-kshapaṇakayor âtmâ parichinnaḥ, âvaraṇâ-svabhâvâ ca *çraddhâ* atas *tâmasî*, Somasiddhântasya 'abhilâsha pradhânatvâd *râjasî* tatra *çraddhâ*. (*K. bhâra* 'ity ubhayatra sambandhân *nitambabhâra pînastana-bhârâbhyâṁ manthara* mandagatiḥ.)

P. 57.

Z. 6. *janântikaṁ* loka-samakshaṁ.

Çl. 17. *mayâ caṇḍânurâgât* utkṛishṭa-prîti-vaçât *gâḍhaṁ* atiçayena *bhujayor dvandvena pîḍito* mardito yaḥ, *pîvarayor* mâṁsalayor *stanayor bharo* bhâraḥ sa yasyâṁ kriyâyâṁ yathâ syât tathâ, *pîna payodharâḥ pînau* mâṁsalau *payodharau* yâsâṁ, tâ *raṇḍâḥ* bhartṛi-hînâḥ nirantara-surata-hînâḥ, etena sukha viçesho dhvanitaḥ, raṇḍâḥ *kati* kiyat-saṅkhyakaḥ *na âliṅgitâḥ?* kiṁ tu bahvya âliṅgitâ eva. etâvatâ kiṁ? tatra 'âha: *çataçaḥ* çatavâraṁ *guru çapathaṁ karomi, kutrâpi* kvacid api *kapâlinyâḥ pînau* mâṁsalau *attuṅgau* uccau *kucau* stanau, tayor *avagûhanaṁ* âliṅganaṁ, tasya *yadi punar bhavaḥ*

utpattiḥ, tadà *pramodọdayaḥ* pràkṛishṭânandâvirbhàvaḥ *prâptaḥ*, ity arthaḥ. — (*K. mayâ candânurâgât pina-payodharâḥ kati randâ* vidhavà *udgâḍhaṁ dṛiḍhaṁ na âlingitâḥ*, tatra tathâpi 'iti tadà 'ity api 'iti çeshaḥ, tathâpi tadâ *Buddhebhyaḥ çataçaḥ çape* Buddha-çapathaṁ çataçaḥ karomi, ity arthaḥ; *yadi punaḥ kutrâpi kâpâlinyâḥ pinottunga-kucayor avagâhana-bhavaḥ, pramodọdayaḥ prâptaḥ*, ity arthaḥ. *çape* iti svànga-sparça-parvako 'yaṁ çapathaḥ, tena çapathe *çape* ity âtmanepadaṁ, tat-pùrvakatvâbhàve tu: "sakhyaḥ, *çapâmi*, yadi kiñcid api smarâmi," ity àdau parasmaipadam eva.)

Z. 15. *praveçaya* dehi. *pârameçvarîṁ* Parameçvara-sambandhinîṁ.

P. 58.

Z. 3. *parirambhaḥ* âlinganaṁ, sa eva *mahân mahotsavaḥ*, tena. — (*K.* âṁ iti, jânâmi, ity arthaḥ.)

Z. 7. *ankapâli* âlinganaṁ. *picchikâ* màyùra-piccha-nirmitaḥ picchâluñchaḥ. — (*K. indriya-vikâraḥ* çiçnodgamaḥ, digambaratvàd upàyaṁ cintayati.)

Çl. 18. *kurango* mṛigaḥ. *bhâvaki* çraddhâvatî. *çrâvaki* kshapaṇaka-goshṭhi. asya 'arthaḥ: he *kapâlini!* tvaṁ *bhâvaki* çraddhâvatî 'satî '*yadi ramase, tarhi çrâvaki* kshapaṇaka-samudàyaḥ *kiṁ karishyati?* iti pada-samudâyârthaḥ. — (*K. bhâvaki* bhâva-viçishṭâ sambandhe 'kaṇa. *çâvaki* çiçuḥ kshudrà 'asmadiyà "çraddhà" iti çeshaḥ; asmadîyâ çraddhà kshudrâ etat-pratikûlaṁ kim âcarishyati, ity arthaḥ.)

P. 59.

Z. 3. *bhâjanaṁ* surà-pàna-pàtraṁ.

Çl. 19. *arpaṇa*-mantraṁ paṭhati: *idam*, iti. *bhavasya* saṅsàra-nivṛittau *bheshajaṁ*. itarat sugamaṁ. *idaṁ Bhairaveṇa uditaṁ* proktaṁ *paçûnâṁ* jîvànàṁ *pâçaḥ* saṅsàras taj-janikà vàsanàs, tâsàṁ '*samucchede* nàçe *kâraṇaṁ*. — (*K.* suraiva *idam amṛitaṁ bhava-bheshajaṁ* saṅsàra-vyàdhi-vinâçakaṁ *aushadhaṁ*. paçu-paço 'smac-châstriyokta-màrgâtirikta-màrgânusaraṇa-rùpaḥ *paçûnâm* iva 'asmàkaṁ bandha-hetuḥ pàças, tat-*samucchedana-kâraṇaṁ*, ity arthaḥ.)

Z. 11. *kiṁ vimṛiçasi* kiṁ vicàrayasi. *paçutvaṁ* mùrkhatvaṁ *apanîyate* dùrîkriyate. *sva-vaktre âsavaṁ* madyaṁ, tena *pûtâṁ* pavitrâṁ *kṛitvâ*, *upanayatu upa* samipe pràpayatu. *tîrthikâḥ* smârtikàḥ.

P. 60.

Z. 3. *cashakaṁ* pàna-pàtraṁ.

Çl. 2. *asmâbhiḥ veçyâbhiḥ saha kati vârân* vàsarân, "surà ity adhyâhâraḥ, *na pîtâ;* bahudhà pitaiva, ity arthaḥ. kidṛiçi surà: *suvadanânâṁ* sumukhinàṁ *mukhaiḥ ucchishṭâ* pîta çeshâ. punaḥ kidṛiçi surà: *vikacaṁ* vikasitaṁ yad *vakulaṁ*, tasya *âmodena* parimalena *madhurâ* mishṭâ. tataḥ kiṁ? tatra 'àha: *sura gaṇo* deva-gaṇaḥ *etâṁ surâṁ alabdhvâ* apràpya, *vidhâyai* amritàya *spṛihayati* icchati, iti *jânimaḥ*. kidṛiçiṁ suràṁ: *kapâlinyah*

vaktrâsavena ânana-madyena *surabhim* sugandhâm. — (*K. asmâbhih kati vârân veçyâbhih saha* veçyâ-rûpa-*suvadanâ-mukhocchishtâ* surâ *na pîtâ;* api tu bahuvârân pîtaiva. kîdriçî: *vikacânâm* vikasitânâm *vakulânâm* iva *âmodena* gandhena *madhurâ* manoharâ. vayam tu *jânîmah* sambhâvayâmah, vasyâh *kapâlinyâ vaktrâsavena surabhim* sugandhim *etâm madirâm alabdhvâ* 'eva *sura-ganah sudhâyai sprihayati* sudhâm vâñchati, etal-lâbhe tu sudhâ-sprihâm na 'akarishyad, ity arthah.)

Z. 10. (*K. dhâraya* prâpaya, ity arthah.)

Z. 12. *aho* âçcarye, *surabhitvam* rasântarâsadriçatvam, ity arthah. — (*K. surabhir* ghrâna-tarpane, iti koshât; *gandha-surabhyoh* sâmânya-viçesha-yoh prithag upâdânam.)

P. 61.

Z. 9 *mada-skhalitam* madena skhalitam skhalanam prâptam yathâ syât tathâ.

Z. 11. *akleçam* cândrâyanâdi-tapasâ vinâ *abhimatâh* abhilashitâh *artha-siddhayah* prayojana-siddhayah, ity arthah.

Çl. 21. *âçcaryam* eva 'âha: *atra,* iti. *atra* asmin mate *anujjhitah* na ujjhitah atyaktah *cakshur-âdînâm* indriyânâm ye *vishayâs,* teshâm *âsañgah* sambandhah, tasmin saty *api ashtau mahâ-siddhayah* animâdyâh *sidhyanti, prâkritâç* ca *siddhayah sidhyanti* prâpsyante, *param tu vidushâm* jñâninâm *yogântarâyâh* yoga-vighnîbhûtâh, "bhavanti" ity adhyâhârah. kîdriçâm vidu-shâm: *atyâsannah* atinikatah ca 'asau *mahodayaç* ca mokshah, tasmin *pra-nayah* prîtir yeshâm tacchilâs, teshâm. kîdriçyah prâkrita-siddhayah: *vaçyam* vaçîkaranam, *âkarsha* âkarshanam, *vimohanam* bhrânty-utpâdanam, *praça-manam* sakala-jñâna-bhrançah, *prakshobhanam* unmâdah, *uccâtanam* sthâna-bhrançah, tat-*prâyâh* tat-pradhânâh, ity arthah. — (*K. yatra* mate. *atyâ-sanna-mahodaya-pranayinâm* Pârvatî-tulya-dayitâliñgita-candracûdatva-prâ-pti-rûpâsanna-muktimatâm janânâm *anujjhito* vâñchito yo *vishayas,* tad-*âsañge* saty *api, amûr* buddhi-sthâh prasiddhâ animâdayo *'shtau mahâ-siddhayah sidhyanti* sampadyante. *vaçyâkarshanâdayah prâkrita-siddhayah* sâ-mânya-siddhayas *tu param* atiçayam *yogâbhyâsasya antarâyâ* vighna-bhûtâ, ato yogam abhyasyatah pumsas tâni bhavanti, ity arthah. *prâyâ* ity anena madhumatyâh siddheh parigrahah. *vaçyam* vaçîkaranam, *âkarshanam* abhishta-vanitâder âkrishya nayanam, *mohanam* para-gunânâm eva grahah, *prama-thanam* vanitânâm cittonmathanam, *prakshobhanam* vairinâm bhîta-cittikara-nam, *uccâtanam* vairinâm deçata unmûlanam; madhumatî dviprakârâ, ichayâ sarva-bhogya-padârthopasthâpanam, paroksha-vishaya-sâkshâtkâraç ca.)

P. 62.

Z. 1. *vimriçya* vicârya.

Z. 3. *sâtiçaya-pîtayâ* râjakulâd *dûram tapasvî* kshapanakah *unmatt-kitah* atibhrântah sampâditah, iti yojanâ.

Çl. 22. *Vidyâdharîñ* Gandharva-kanyâm, *surâñganâñ* deva-patnîñ; kanyâ akṛita-vivâhâ svayañvarâ çakyata ânetuñ, kṛita-vivâhâ deva-patny apy ânetuñ çakyate, iti. *Nâgâḥ* krûrâḥ, teshâm api *añganâñ* striyañ. *Yakshâs* tato 'py atikaṭinâḥ, teshâm api *kanyâm*. kiñ bahunâ? *bhuvana-traye 'pi yad yad mama 'ishṭañ, tad upâharâmi*, iti yojanâ. — (*K. kanyâm* ity-antena *vidyâ-balâd upâharâmi*, ity anvayaḥ. tathâ *yad yan mama 'ishṭam asmin bhuvana-traye, tat tad* api *vidyâ-balâd upâharâmi*, ity anvayaḥ.)

P. 63.

Z. 8. *khaṭikâ* añka-likhana-sâdhanañ.

Z. 9. *ambâ-gatañ* çraddhâ-vishayañ *hatâçânâñ*, *hatâ* gatâ *âçâ* yeshâñ, teshâm *âlâpañ* sambhâshaṇañ.

P. 64.

Z. 1. *dishṭyâ* bhâgyena. — (*K.* nâṭake *dishṭyâ varddhase* ity ânanda-nivedane bhâshâ; ânanditâ bhavasi, ity arthaḥ.)

Z. 3. *harshañ nâṭayati* harsha-yuktañ nâṭyañ prakâçayati.

Çl. 24. *Vishṇubhaktir devî siddhaye* bodhotpattaye *mûlañ* prathamañ kâraṇañ. *sattva-kanyâ Çraddhâ* sâtvikî çraddhâ *tâñ ca* Vishṇubhaktiñ *anu-vratâ* anugatâ. *tatra* tayoḥ samîpe *Kâmât muktaḥ* Kâma-rahitaḥ *Dharmo 'py abhûç cet*, tadâ *tad' Vivekasya kṛityañ* kâryañ *siddhañ manye* jâtam, ity evañ manye, ity arthaḥ. niḥçrâmañ karmânutishṭhatâñ sâtvika-çraddhâ-vatâñ Vishṇubhaktyâ 'antaḥkaraṇa-çuddhi-dvârâ Vivekena vidyâ 'utpadyate, iti bhâvaḥ. — (*K. devî Vishṇubhaktiḥ siddhaye* arthât prabodhacandrodaya-rûpâyai Vivekasya siddhaye *mûlañ* prabodha-kâraṇañ. *sattva-kanyâ Çraddhâ tâñ ced anudrutâ* anugatâ, *Dharmaç ca tatra Kâmân muktaḥ* sa tv *abhûc cet*, *tadâ Vivekasya sâdhyañ siddhañ manye*, ity arthaḥ.)

Z. 12. *asu-vyayena* prâṇa-nâçenâpi. — (*K. artha-vyayena* prâṇa-vyayena.)

Z. 15. *vyavasâyañ* udyogañ.

Vierter Akt.

P. 65.

Tṛitiye 'ṅke pàkhaṇḍa-tiraskṛitiṁ vidhâya, idâniṁ caturthe 'ṅke pàkhaṇḍa-prerita-Mahâbhairavîtaḥ Çânti-sàvadhânayâ Vishṇubhaktyâ Çraddhà-Dharmau rakshitau, iti saṅsûcayann âha. — *(K.* caturthâṅke Mahàbhairavi-samàkṛishyamàṇàyâḥ Çraddhâyâ Vishṇubhaktyâ traṇaṁ, tato Mahàmoha-vijayâya Vivekena sva-saînya-preraṇaṁ.*)*

Z. 4. *(K. maitrî* sarva-bhûta-mitratà. moha eva *muditâ* sarvadà-hṛishṭatvaṁ, ity arthaḥ.*)*

Z. 9. *utkaṭaḥ kampo* yatra yasyàṁ kriyàyâṁ yathà syàt tathà.

Çl. 1. *aho* ity âçcarye. *me manaḥ adyâpi kadalikâ 'iva vepate* kampate. kathaṁ-bhûtàyà iva me: *Mahâbhairaviṁ paçyantyâ iva* âlokayantyâ iva. kidṛiçìṁ Mahàbhairaviṁ: *ghorâṁ* bhayâvahàṁ. punaḥ kîdṛiçìṁ: *nuḥ ime nâre, nâre* ca te *kapâle* ca te eva *kuṇḍale* vidyete yasyâḥ sâ, tàṁ. punaḥ kiṁ-bhûtâṁ: *dṛishṭibhiḥ vidyuc-chaṭâṁ* vidyun-màlàṁ *muñcantiṁ; dṛishṭibhir* iti bahuvacanaṁ trinetratvena. punaḥ kiṁ-bhûtàṁ: *kacaiḥ vikarâlâ mûrtir* yasyâḥ sâ, tàṁ. kiṁ-bhûtaiḥ kacaiḥ: *analo* agnis, taj-*jvâlâbat piçaṅgaiḥ* piṅgàḥ, taiḥ. punaḥ kîdṛiçìṁ: *daṅshṭrâ* eva *candra-kalâṅkurâḥ*, tad-*antara* madhye *lalanti* khelanti *jihvâ* yasyâs, tàṁ. — *(K. adyâpi Mahâbhairaviṁ paçyantyâ iva me mano 'ho kadalikâ 'iva vepate.* kidṛiçìṁ: *ghorâṁ* bhìshaṇàṁ; *nara-*sambandhi-*kapâla-kuṇḍalavatiṁ; dṛishṭibhir vidyuta* iva *chaṭâṁ* kàntiṁ *muñcantiṁ; anala-jvâlâbhir* iva *piçaṅgaiḥ kacair vikarâlâ* vibhìshaṇâ *mûrtir* yasyàs, tàdṛiçìṁ; *daṅshṭraiva* 'àkàra-sàmyàc *candra-kalâ* saiva ca 'àkàra-sàmyàd *aṅkuras*, tad-*antare* taç-chidre *lalaj-jihvâṁ* lolamàna-jihvàṁ.*)*

P. 66.

Z. 1. *(K. udakâhita-hṛidayâ* utkshipta-manaskà.*)*

Çl. 2. Çraddhà svaṁ duḥkhaṁ nivedayati: *kâla* iti. *kâlarâtrer* iva *karâlaṁ* bhayàvahaṁ *âsyaṁ* mukhaṁ, tasmin mukhe ye *dantâḥ*; tad-*antar*

gatayâ dantântaḥ pràvishṭayà *mayâ*, he *sakhi*, yà *tvaṁ* pûrvaṁ *dṛishṭâ*, *saiva tvam atraiva janmani punar dṛishṭâsi*. — (*K. kâlarâtrer* mṛityor yat *karâlaṁ* bhìshaṇam *âsyaṁ*, tadìya-*dantânâm antar* madhye *pravishṭayâ mayâ*, he *sakhi*, *saiva* pûrvaṁ *dṛishṭaiva*, *tvam atraiva janmani punar dṛishṭâsi*, ity arthaḥ.)

Çl. 3. *sâ* Bhairavì *çyenavat avapâtaḥ* uparipâta-patanaṁ yatra yasyàṁ kriyâyâṁ yathà bhavati tathà, *çyenâvapâtam avapatya* abhipatya asmad-upari patitvà, *pada-dvaye mâm âdâya* caraṇayor mâṁ dhṛitvà, *apareṇa* vàmena *kareṇa Dharmam âdâya*, *vegena* çighraṁ *gagaṇam utpatità* uḍḍiya gatà. kà 'iva: *gṛidhrî 'iva*. kìdṛiçì gṛidhrì: *nakhânâm agrâṇi*, teshàṁ *koṭayo* vakra-bhàgâḥ, teshu *sphurat* prakàçamânaṁ *piçitasya* mâṅsasya *piṇḍa-yugaṁ* piṇḍa-dvayaṁ, yasyàḥ. — (*K. çyenavat avapâtum abhipatya* âgatya, *mâm* arthàd ekena kareṇa *'âdâya*, *apareṇa kareṇa Dharmam âdâya*, *sâ ghorâ* Mahàbhairavì *vegena gagaṇam utpatitâ*; *nakhâgra-koṭau* nakhâgrasyâpy agrà-bhâge *sphuratâ piçita-piṇḍena* yutà *gṛidhrî iva*. *çyenâvapâtam* ity atra tadvad abhipatanena, ity arthaḥ.)

P. 67.

Z. 7. *asmadîya ârto yo nâdas*, tasmâd *upajâtâ* yà *dayâ*; tayà *ârdrayâ* komalayà *devyâ*, ity arthaḥ.

Çl. 4. *tayâ* devyâ Vishṇubhaktyâ, *bhruvor bhaṅgaḥ* vakratà, tayà *bhîmaḥ* bhayânakaḥ sakrodho và, *pari* samantàt *pâṭalaḥ* çvetaraktaḥ *dṛishṭipâto* yatra yasyàṁ kriyàyàṁ yathà syàt tathà, *udgâḍho* 'tidṛiḍho yaḥ *kopas*, tena *kuṭilaṁ* yathà syàt tathà, tena prakâreṇa *vyaloki* avalokitaṁ. tathà kathaṁ: *yathâ* yena prakâreṇa *sâ* Bhairavì *bhûmau viçeshṇa â* samantàt *bhagnaṁ jarjaraṁ* viçìrṇaṁ *çiro-'sthi* çiraḥ-kapâlaṁ yasyàṁ kriyàyàṁ yathà syàt tathà *papâta*. kà 'iva: *vajra-pâtena* vidyut-pàtena *hatâ* pàtità *çailasya* parvatasya *çilâ 'iva*. — (*K. bhrûbhaṅgena bhîmaḥ paripâṭalaç ca dṛishṭi pâto* yatra tàdṛiçaṁ yathà syàd, *udgâḍha-kopena kuṭilaṁ* ca yathà syàt tathâ, *madîyârta-nâdopajâtârdrabhâvayâ Vishṇubhaktyâ tathâ* tàdṛiçaṁ *vyaloki*. *yathâ sâ* Mahàbhairavì, *vajra-pâta-hatâ çaila*-sambandhi-*çilâ 'iva*, *bhûmau papâta*, *vyâbhugnaṁ jarjarataram asthi* yatra tàdṛiçaṁ yathà syàd, iti pàta kriyà-viçeshaṇaṁ.)

Z. 11. *devyâ* Vishṇubhaktyà *samupajâtaḥ* utpannaḥ *abhiniveçaḥ* abhimàno yatra yasyàṁ kriyàyàṁ yathà syàt tathà *evam uktaṁ*. evaṁ kathaṁ? tatra 'àha: *asya durâtmanaḥ*, ity-àdi. *durâtmanaḥ* pàpishṭhasya *Mahâmohahatakasya* Mahàmoha-pretasya. *avajñâya* tiraskritya. *unmûlanaṁ* utpàṭanaṁ. [illegible] 'iti, àjñaptà, ity arthaḥ. *devyâ* Vishṇubhaktyà. kiṁ Vivekaṁ prati vâktavyaṁ? ity àha: *kâma-krodhâdînâṁ*, iti. *tato vairâgyaṁ* iti, *tatas* teshu kàma-krodhàdishu jiteshu *vairâgyaṁ*. *ahaṁ ca* Vishṇubhaktiḥ *yathâ samayaṁ* yathopadishṭa-kâle *prâṇâyâmâdibhiḥ anuprâṇanena yushmat saiṅyaṁ* tattvavicàràdi-rûpaṁ *anugrahishyâmi*, ity arthaḥ. *ṛitaṁ* satyaṁ *bhavati* bibharti, sà *ṛitambharâ* prajñà; Patañjalinâpy uktaṁ: "prajñà ṛitambharà," ity àdi. *ṛitaṁ*

bharâdayaç ca devyah çânty-âdi-rûpeṇa *kauçalena* samicîna-sâdhanena. *bhagavataḥ* paramâtmanaḥ. *anuvidhâsyanti* iti, *anu* 'ajñâna-janyâvaraṇa-nâçânantaraṁ *vidhâsyanti* karishyanti, iti *vi*-pûrvako *dhâñ* karaṇârthe vartate. *ahaṁ* çraddhâ. — *(K. prâṇâyâmâdy-anuprâṇena* 'iti, prâṇâyâmâdinâm anupreshaṇena, ity arthaḥ. *ṛitambhavâdayaç ca* iti, *ṛitaṁ* satyam eva *ṛitambhavâs*, tâ âdayo yâsâm, iti vigrahaḥ. *upanishad-devyâ saṅgatasya* iti, tayâ saṅgatasya 'arthâd vivekasya sakâçât, *bhagavataḥ* parama-purushasya, yaḥ *prabodhodayas*, tam *anudhyâsyanti*, ity arthaḥ. tathâ ca 'upanishat-saṅgasya 'anutpannatve 'pi na doshaḥ.)

P. 68.

Z. 8. *mahâtmanâṁ hṛidaye vartâmahe*, ity uktaṁ, tad âha:

Çl. 4. *te hi dhyâyanti*, iti. *te* mahâtmanaḥ *sukhini* jive *mâṁ* maitrîṁ *dhyâyanti* cintayanti; *duḥkhini ca* râga-dveshavati *anukampâṁ* kṛipâṁ *dhyâyanti; puṇya-kriyeshu muditâṁ* santushṭâṁ *dhyâyanti*; *kumatau* kubuddhau *upekshâṁ* udâsînatâṁ *dhyâyanti*. evaṁ sampâdite teshâṁ kiṁ kâryaṁ siddhaṁ? ata âha: *evaṁ* sati, *ayam antarâtmâ prasâdaṁ* prasannatvam *upayâti*. nanu sva-rasa-nirmalasya kîdṛicî prasannatâ? ity âçaṅkya, 'âha: *râga*, iti. *râga-lobha-dveshâdibhir doshaiḥ* akalushaḥ *kalushaḥ* sampâditaḥ tathâ kṛitaḥ kalushî-kṛitaḥ; âropita-râgâdi-doshaiḥ kâlushyaṁ svabhâvato nirmalaḥ, iti bhâvaḥ. — *(K. catasro bhaginyaç* ca maitrî-muditâ-anukampâ-upekshâ-rûpâḥ. *mahâtmanâṁ hṛidaya*-sthitâ bhavatyaḥ kiṁ kurvanti? ity atra 'âha: *dhyâyanti*, iti. *mâṁ* maitrîṁ *sukhini* jane dṛishṭe *dhyâyanti* anuçîlayanti; mahâtmano 'tra kartâraḥ sukhini jane dṛishṭe tatra mitra-vyavahâram âcaranti, ity arthaḥ. evam uttaraprâye 'pi bodhyaṁ. *muditâṁ* modaṁ. nanu Vishṇubhaktyâ yushmâdṛiçînâm îdṛiçâjñâ tâvat prabodhodayârtham udyuktasya Vivekasya 'ânukûlyârtham, ity uktam, tad-ânukûlyaṁ ca îdṛiça-yushmadanudhyânena kiṁ syâd? ity atra 'âha: *evaṁ prasâdam*, iti. *ayaṁ* utpatsyamâna-prabodho *'ntarâtmâ râga-lobhâdi-kalusho* 'pi *prasâdaṁ* prabodhodayopayuktaṁ prasâdam *upayâti*, ity arthaḥ.)

Z. 16. *Râḍhâ* ity *abhidhânaṁ* nâma yasya, tâdṛiço *janapado* deçaḥ. *parisaro* nikaṭa-pradeçaḥ. *mîmâṅsânugatâ* mîmâṅsâ-matânurodhinî *matir* buddhiḥ. *vyâkulena 'antarâtmanâ* upanishado virahâd, iti bhâvaḥ. — *(K. mîmâṅsânugatayâ*, iti, asad-anuvyâvartikayâ mîmâṅsânugatayâ sad-anuvishayayâ, ity arthaḥ. *prâṇa-dhâraṇasya* kiñcit tvaṁ ca mahâmohâdy-abhibhavâd bodhyaṁ.)

P. 69.

Z. 7. *vishkambhako* nâma pûrva-kathâ-saṅkshepaḥ. — *(K. praveçaka* iti, çraddhâ maitrî-dvaya-prayojyatvât.)

Z. 8. *râjâ* Vivekaḥ. *pratihârî* dauvârikaḥ.

Çl. 6. ayaṁ janaḥ, *amṛitaṁ* nâsti mṛitaṁ maraṇaṁ yatra tad *amṛitaṁ* brahma, tad eva *samudra jalaṁ*, tatra *magnaḥ* âpluto *manâg api* svalpam api *na âcâmati* na pibati, na 'anubhavati ity arthaḥ. anya-sâgara jalâpekshayâ viçesham âha: kîdṛiçe 'mṛita-sâgarâmbhasi: *çânte* nirupadrave, anyat

tu nakra-çiçumârâdy-upadravât. *ananto* niḥsîmo *mahimâ* sâmarthyaṁ yasya tasmin, anyat tu gaṇanîya-sâmarthyaṁ. *nirmalaḥ* dehendriyâdi-vishaya-mala-rahitaḥ, *cin*-mâtraḥ jñâna-mâtraḥ *ânandaḥ* sukhaṁ yasmin. *taraṅgâḥ* uccâvaca-vikârâḥ, teshâm *âvaliḥ* paṅktis, tayâ *nirmukte* rahite; anyasya satarañgatvât. *niḥsâre* nistattve kâryâkârya-samarthatvât. *mṛigatṛishṇikâ* marumarîcikâ, tatra kalpitaṁ yad *arṇava-jalaṁ* sâgara-pânîyaṁ, tatra *çrânto mûḍhaḥ* ajñaḥ *pibati, âcâmati, avagâhate, abhiramate, majjati, unmajjati;* mûḍhe mûrkhe sarvam asambhâvitam api sambhâvyate. pânârthaṁ mṛigatṛishṇârûpa-saṅsâra-sukha-nipatitaḥ sajjano 'tîva vañcitaḥ, iti bhâvaḥ. — (*K. amṛita-sâgarâmbhasy* arthât samasta-bhinnatayâ dhyeya-rûpe brahmaṇi *magno 'pi* tâdṛiça-dhyâna-vishayo 'pi ayaṁ mahâjano brahma-svarûpaḥ paramâtmâ *na 'âcâmati*, arthât svâtmakam amṛita-sâgara-jalaṁ na 'âcâmati na pibati, tâdṛiça-dhyânâdhîna sâkshâtkâra-vishayaṁ na 'âtmânaṁ labhate, ity arthaḥ. kîdṛiçe brahma-rûpe amṛita-sâgarâmbhasi: *çânte* vishaya-vyâvṛitte, sâgarâmbhaḥ-pakshe *çânte* niçcale. *ananta-mahimni* advitîyatvât vyâpake, pakshe mahâ-parimâṇe. *nirmalaṁ cid*-âtma-vishayakaṁ jñânaṁ, tat-svarûp*ânanda*-rûpe, pakshe *nirmalaṁ cid-ânandaṁ* cita ânando yasmât tâdṛiçaṁ ca, iti karmadhârayaḥ; tena tâdṛiçe nirmale manasa ânanda-janake ca, ity arthaḥ. *taraṅgâvali* abhibhavaikatvena râga-dveshâdi-rûpâ, tan-*nirmukte* svabhâvatas tâdṛiçatvât, pakshe tu çântatvenaiva tathâtvaṁ bodhyaṁ. *niḥsâre* iti saṅsârasya jâgrat-svapnatvena 'alîka-rûpe *mṛigatṛishṇikârṇava-jale* mṛigatṛishṇikâyâm avagatârṇava jala-prâyâlîke saṅsâre *vimûḍho* mohâbhibhûtaḥ *çrânto* duḥkha-bhâjanaṁ *pibati*, ity-âdi atyantâsakto bhavati, iti sakala-kriyârthaḥ.)

Z. 15. *abodhaḥ* ajñânaṁ. *mûlaṁ* âdikâraṇaṁ. *tattvâvabodhât* âtma-sâkshâtkârât, yad vâ: mûḍhaḥ mṛigatṛishṇikâyâm "idaṁ jalaṁ" iti matvâ, manasaiva pânâcâmanâvagâhanâbhiramaṇa-krameṇa majjanonmajjanâny âcarati, iti na 'anupapattir uttarârdhe; yad vâ: pibati ity-âdau pânâdy-anukûla-yatnas tân ity arthaḥ; jala-bhrântyâ Yudhishṭhirâdhishṭhita-sabhâyâṁ Duryodhanasya pânâvagâhanâdy-abhâve 'pi tad-anukûlo yatno drishṭaḥ, iti na 'anupapattir uttarârdhe, ity arthaḥ. — (*K. saṅsâra-cakra-vâhakasya* saṅsâra-cakra-pravartakasya *Mahâmohasya* tattva-jñâna-virodhi-jñânasya *mûlaṁ* pradhâna-kâraṇam *abodhas* tattva-jñâna-virahaḥ, pratiyoginas *tattva bodhâd eva tasya nivṛittir*, ity arthaḥ.)

Çl. 7. pûrva phakkikâyâm uktaṁ çlokena 'âha: *yataḥ*, *amushya* iti. *amushya* idânîm upalabhyamânasya *saṅsâra-taroḥ* saṅsâra-vṛikshasya *abodho* bhâva-rûpâjñânaṁ, tad eva *mûlam* ârambhakaṁ yasya, tâdṛiçasya *unmûla vinâçanâya* saṅvâsanâjñâna-vinâçanâya. *tattvâvabodhât* tattva sâkshâtkârât *aparo* anyaḥ *abhyupâyaḥ* sâdhana viçeshaḥ *na* 'eva asti, yato jñânam ajñânasya ghâtakam ity uktatvât. kiṁ-bhûtât tattva-sâkshâtkârât: *viçveçvarasya ârâdhanaṁ* sevanam anâdikaṁ rûpaṁ, tad eva *vîjaṁ* kâraṇaṁ, tasmâj *jâtaḥ*, tasmât. tac ca 'îçvara nodanâbhivyaktâd dharmâd eva, iti Kaṇâda-munir apy abhâṇi. — (*K. yata* iti yathâ 'ity arthe bodhyaṁ. *amushya* ity âdeḥ pûrvokta hetv abhâvât tathâ ca *abodha mûlasya amushya saṅsâra* rûpa *taror*

âmûla-vinâçanâya upâyo viçveçvarârâdhana-rûpa-*vija-jâta-tattva-prabodhân* *na aparo* yathâ, tathâ Mahâmohâ-nivṛitter api tattva-prabodhâd aparo na 'upâyaḥ, ity arthaḥ.)

P. 70.

Z. 3. kâryam uddiçya kâraṇam âha: *prâyaç ca* iti. *tathâ ca devyâ* iti *Vishṇubhaktyâ sandishṭaṁ* âjñaptaṁ. *udyogaḥ* prayatnaḥ. *aham api* Vishṇubhaktir api, ity arthaḥ. *tam eva* vastuvicâram eva *nirjayârtham* iti "Kâmasya" iti çeshaḥ, *tâvad* âdau *nirjayârtham âdiçâmi* âjñâpayâmi. yâ *vedavati*, saiva pratihârî; veda-vidyâbhimâninî devatâ vedavatî. — (*K. aham api* ahaṁ Vishṇubhaktiḥ; Vishṇubhakti-sandeçam anûdya Vivekaḥ svayam âha: *tatra kâmaḥ*, ity-âdi. *vetravati* dvârapâlikâ strî.)

Z. 16. vicârân nirgato *nirvicâraḥ* vicâra-çûnyaḥ yaḥ *saundaryâbhimânaḥ*, tena *vardhishṇunâ* vṛiddhiçîlena *Kâma-haṭakena* Kâma-pretena *jagad* viçvaṁ *hataṁ* bhrançitam, ity arthaḥ. *atha vâ* iti, atikutsite saundarye buddhir Mahâmoha-sâdhyâ, iti tâtparyaṁ. — (*K. nirvicâra-saundarya* 'iti, strîṇâṁ saundaryaṁ vicârato mithyâ, ity arthaḥ.)

Çl. 8. *aho* âçcarye, *mohasya duçceshṭitam* etat. etat kiṁ: *vidvân api* paṇḍito 'pi *pratyakshaṁ açucir* apavitrâ yâ *putrikâ*, tâṁ *dṛishṭvâ striyam* iti sambhâvya, *kântâ* ity âdi-viçeshaṇaiḥ *iti prastauti*. iti kiṁ: *kântâ* ity-âdi. *kântâ* manoharâ. *utpala-locanâ* kamala-locanâ. *vipulaḥ* sthûlaḥ *çroṇi-bhâro* nitamba-bhâro yasyâḥ, sâ. *unnamantau* milantau *pînau* mânsalau *uttuṅgau* uccau *payodharau* stanau yasyâḥ, sâ. *sushṭhu mukhaṁ ambhojam* iva yasyâḥ, sâ. *sushṭhu bhruvo* yasyâḥ, sâ. iti na kevalaṁ prastauti, api tu *mâdyati* matto bhavati, *modate* santushyati, *abhiramate* krîḍati. — (*K. pratyakshâçuci-putrikâm* mala-mûtra-kledâdy-açuci-kanyakâ-rûpâṁ *striyaṁ dṛishṭvâ*, *vidvân api* janaḥ *kântâ* ity-âdi buddhyâ *mâdyati* pramatto bhavati, *modate* hṛishyate, *abhiramate* krîḍati, *prastauti* praçansati, *aho* idaṁ *kâmasya duçceshṭitaṁ*. *kântâ* 'iti kâmanîyâ 'iti; *nîlotpala*-tulya-*locanâ* 'iti; *pṛithu-nitamba-bharâ* 'iti; *vinodya-pṛithu-kucâ* 'iti; *çobhana-mukhâmbojâ* 'iti; *çobhana-bhrûr iti* buddhyâ pramattatâdi.)

Z. 18. *vastu* svarûpaṁ yathâ 'sti, tathâ *vicârayatâm*. *amanda-matînâm* tîkshṇa-buddhînâṁ. *piçitaṁ* mânsaṁ, tasya *paṅkena* kardamena *avanaddhaḥ* sambaddho yo *asthipañjaraḥ* tan-*mayî* tat-pradhânâ, *svabhâvena durgandhiḥ bibhatsaḥ* kutsito *veço* yasyâḥ, sâ *nârî* 'iti. *nâsti viratiḥ* vairâgyaṁ. anya-guṇâropât tatra guṇa-buddhir, ity âha: *tad atra*, iti. *atra* nâryâṁ *itara-guṇâdhyâsaḥ* anya-guṇâropaḥ. — (*K. yathâvastu* yathârthaṁ vastu tad *vicârayatâm*. *amanda-matînâm api piçita* 'ity-âdy ukta-rûpâ *nârî ity* evaṁ buddhyâpi kâma-hata-vaçâu *nâsti viratir*, ity arthaḥ. *itara-guṇa* 'iti itarasya hârâder guṇaḥ saundaryâdiḥ.)

P. 71.

Çl. 9. ârope hetuṁ darçayati: *tathâ hi*, *muktâ*-iti. *aho* iti mahâ-vinodaḥ, *alpa-matibhiḥ* svalpa-dhîbhiḥ etat *nâryâṁ kalpitaṁ*, iti sambandhaḥ. etat.

kiñ? tad àha: *muktânâñ hârâ* eva *latâ*. *raṇantyaḥ* çabdaṁ kurvantyaḥ *maṇimayâḥ* ratna-pradhânâḥ *haimâḥ* suvarṇena nirmitâḥ *tulâkoṭayaḥ* caraṇa-bhûshaṇâni. *kuṅkumotpanno râgo* aṅgarâgaḥ. *surabhayaḥ* parimala-bahalâḥ, *pushpair viracitâḥ*, *vicitrâḥ* nânâvarṇâḥ *srâjaḥ*. *vâsaḥ* vastraṁ. *citraṁ* nânâvarṇaṁ *dukûlaṁ* paṭṭa-vastraṁ. etâdṛiçaṁ saundaryaṁ nâryâm âropitam, ity arthaḥ. viçeshâdarçinâm ayam âropo, na viçeshaṁ paçyatâm, ity àha: *vâhye* vahiḥ *antaḥ* abhyantare *nirâyaṁ paripaçyatâṁ* samantâd avalokayatâṁ purushâṇâṁ *nâri 'iti nâmnâ kṛitaṁ*, ity arthaḥ. — (*K. aho alpa-matibhir nâryâṁ muktâ-hâra-latâdikaṁ* saundarya-hetutayâ *kalpitaṁ*, ity arthaḥ. tatra *haimâ* hema-nirmitâs *tulâkoṭayo* nûpurâḥ. *citra-dukûlaṁ* vâsa âchâdanam, ity arthaḥ. evaṁ hârâdikaṁ *vâhyam antargataṁ* ca mala-mûtrâdikaṁ *paçyatâm* arthân manasi bhâvayatâṁ vidhâtrâ *nâmnâ kṛito nirayo* narakaṁ, ity arthaḥ.)

Z. 7. *anâlambanam eva* nishkâraṇam eva *âvirbhavatâ* prakaṭi-bhavatâ kâma-veça-vaçâd *ativyâkulo* bhavati, ity àha: *ayam eva*, iti. *ayaṁ* kâmavishṭaḥ *evam abhimanyate*. — (*K. anavalambanaṁ* nirvishayaṁ, ity arthaḥ; çarîra-rûpasya vishayasya 'alîkatvâd, iti bhâvaḥ. mâṅsâsthi-piṇḍa-rûpatvena nârya alîkatvaṁ sâdhayituṁ prathamaṁ kâmino nârî-bhramaṁ darçayati: *tathâ hy ayam*, iti. *ayaṁ* kâmî janaḥ.)

Çl. 10. evaṁ kathaṁ? tad àha: *bâlâ*, iti. *iyaṁ bâlâ mâm icchati*. *indu-vadanâ* candra-vadanâ *sânandaṁ* yathâ syât tathâ, *ut* ûrdhvaṁ *vikshate* avalokayati, ity arthaḥ: *iyaṁ nîlendîvara-locanâ* nîla-kamala-nayanâ *mâṁ*, *pṛithu-kûcayor utpîḍanaṁ* unmardanaṁ yasyâṁ kriyâyâṁ yathâ syât tathâ, *parîripsate* âliṅgitum icchati. taṁ tiraskaroti: *are mûḍha*, iti. *are mûḍha paço! kâ tvâm icchati? kâ ca paçyati?* na kâpi, ity arthaḥ. tatra kâraṇam àha: yato *mâṅsâsthibhir nirmitâ nârî na kiñcid veda* ajaḍatvât. tarhi kathaṁ caitanyopalambhaḥ? ity âçaṅkya 'àha: *atra* asyâṁ nâryâṁ *saḥ* prasiddhaḥ *amûrtaḥ* mûrti-rahitaḥ *pumân* sâkshî *paçyati*, *icchati*. icchati paçyati ity atra 'icchâ-darçanayoḥ drashṭṛi-dharmatvât nârî aprayojikâ, iti tâtparyaṁ. — (*K. iyam indu-vadanâ bâlâ* nârî *mâm ichati*, *sânandaṁ vikshate*, *nîlendîvara-locanâ stanâbhyâṁ mama parirambham* âliṅganaṁ *vâñchati*, ity ayaṁ kâmî jano manyate, ity arthaḥ. punaḥ kâmi-janaṁ sambodhya 'àha: *are mûḍha!* iti. nanu nâry eva paçyati 'ity atra 'àha: *mâṅsâsthibhir*, iti. mâṅsâsthi-piṇḍa-rûpâ *nârî kiñcid atra na veda* na jânâti acetanatvât, yas tu cetanaḥ *pumân paçyati*, *so 'mûrto* darçanâliṅganâdy-avishayaḥ, ity arthaḥ. *tishṭhaty amûrtaḥ*, ity api pâṭhaḥ.)

P. 72.

Z. 6. *sampravṛittaḥ* upakrântaḥ *praticiratayâ* pratispardhi viratayâ *nirûpitaḥ* manasy ânîtaḥ.

Z. 11. *âḥ* ity âçcarye. *pañca-çaraḥ* iti vipsâ upahâsârthaṁ, *pañca* 'eva *çarâḥ* bâṇâḥ yasya, *kusumaṁ dhanur* yasya, 'etâdṛiçasyâpi jaye kayâ çastra vidyayâ?" iti praçne âçcaryam, iti bhâvaḥ.

Çl. 11. kâma-vijayopâyam âha: *dṛiḍhataram*, iti. *kâmam* aham *unmûlayishyâmi* mûla-çûnyaṁ karishyâmi, iti yojanâ. kiṁ kṛitvâ: *dvâraṁ* jîvasya vishayânudhyâna-mârgaṁ, jîvo mṛigayaty anena mârga iva mârgas, taṁ mârgam antaḥkaraṇaṁ, *ârât* vishayânudhyânât pûrvaṁ *dṛiḍhataraṁ kathañcit kenâpi* vihita-mârgeṇa *apidhâya* nirudhya. punaḥ kiṁ kṛitvâ ca: paraṁ *yoshitâṁ* strîṇâṁ *smaraṇam* eva *viparivṛittiḥ* svabhâva-parivṛittiḥ, tasyâṁ satyâṁ vâ; *darçane* indriya-janya-jñâne sati vâ; *pariṇatau* pariṇâme *virasatvaṁ vâ*, *dehasya* çarîrasya *bîbhatsatâṁ* kutsitatâṁ *vâ pratimuhuḥ* pratikshaṇam *anucintya* anudhyâya; evaṁ kâma-jayaḥ sukaraḥ, ity arthaḥ. — (*K. yoshitâṁ kathañcit smaraṇa-viparivṛittau* smaraṇasya nishpattau satyâṁ, *darçane* vâ sati, *dvâram* indriya-rûpaṁ dvâram *ârâd* eva 'vyayahitâ-kâla eva *apidhâya* âchâdya, *pratimuhur* vâraṁ suratasya *pariṇati-virasatvaṁ*, mala-mûtrâdimayatva-rûpa-*deha-bîbhatsatâṁ vâ anucintya*, *kâmam unmûlayishyâmi*, ity arthaḥ.)

P. 73.

Çl. 12. kâma-jayopâyam ântaram uktvâ, vâhyam âha: *api ca*, *vipula* iti. *yadi idaṁ* sarvaṁ *yadi* vartate, tadâ *nâryaḥ kva*? *kva ca* tad-adhîno *Manmathaḥ* Kandarpaḥ? idaṁ kiṁ? tad 'âha: *vipula* ity-âdi. *vipula-pulinâḥ vipulâni* praçastâni *pulinâni* tîrâṇi yâsâṁ, tâḥ *kallolinyo* nadyaḥ. *nitântaṁ* atiçayena *patantyo jharyaḥ* nirjharâḥ, tâbhiḥ *masṛiṇitâḥ* cakvâṇâḥ *cilâḥ* yeshâṁ, te ca te *çailâç* ca. *sândrâḥ* niviḍâḥ *drumâḥ* taravo yâsu, tâdṛiçyo *vanarâjayaḥ* tapobhûmayaḥ, etâsu upaviçya. *vaiyâsikyo* Vyâsa-praṇitâḥ *çamagiraḥ* çânti-pradîpâdikâ vâcaḥ, *budhaiḥ* jñâtṛibhiḥ, jñâtṛi-vâṅmarâ *budhâḥ*, taiḥ *samâgamaḥ* saṅgatiç *ca*; etad dvayam api yadi prabhavati, ity arthaḥ. kidṛiçyo nâryaḥ: *piçita-vasâmayyaḥ* mâṅsa-vasâ-pradhânâḥ. — (*K. yady* ete santi, tadâ *piçita-vasâmayyo nâryaḥ kva? manmatho* vâ *kva*? nârî-sattve 'pi manmathodayo nâsti, ity arthaḥ. kasmin kasmin sati manmathodayo nâsti, ity âha: *vipula* iti. *vṛihat-pulinâḥ kallolinyo* nadyo *yadi* santi, tathâ tatpulina eva tapasy ataḥ kva Manmathaḥ? ity arthaḥ. evam anyâny api upasthânâni: çânti hetu-vâkyaṁ ca 'âha: *nitânta* 'iti, *çailâ yadi* santi, kidṛiçâḥ: *nitânta-patat-nirjhara-pravâhâ*, ata eva *masṛiṇita-çilâḥ* jala-snigdhîkṛita-çilâḥ; *niviḍa-drumâ vanarâjayaç* ca, *vaiyâsikyo* Vyâsoktâḥ *çama-giraç ca yadi* santi, ity arthaḥ. *budhaiḥ* sâtvika-paṇḍitaiç *ca* saha *yadi samâgamas* tishṭhati, ity arthaḥ.)

Z. 6. *bhaṅgaṁ* parâjayaṁ.

Çl. 13. pradhânâbhâve sahâya-vaiphalyaṁ darçayati: *candra*, iti. *induddhâmnâ* candra kântyâ *dhavalâ* râtrayaḥ. *guñjanti* çabdâyamânâ yâ *dvirephâvali* shaṭpada-paṅktiḥ, tasyâ *jhaṅkâreṇa* çabdena *mukharâḥ* saçabdâḥ *vilâsa-vipinasya* krîḍopavanasya *upântâḥ* prânta-pradeçâḥ *vasantodayâḥ* vasanta-prâdurbhâvâḥ. *mandra-dhvânâḥ* gambhîra-çabdâḥ ye *ghanâḥ* meghâḥ, teshâm *udayo* yeshu, tâdṛiçâḥ *dinasâḥ* varshâ kâlîna-divasâḥ, ity arthaḥ. *mandâḥ kadamba*-sambandhino *anilâḥ* vâyavaḥ. *çṛiṅgdra-pramukhâḥ çṛiṅgdraḥ*

pramukho mukhyo yeshàñ, te àsana-pâna-bhojanâdayaḥ *kâmasya suhṙidaḥ* sahâyâḥ, *nâryâñ jitâyâñ*, sarve *jitâḥ*. — (*K.* *nâryâñ jitâyâñ* candrâdayaḥ kàmasya sahâyà jitàḥ, ity arthaḥ. tàn âha: *candra* ity-àdi. *indu-dhâmnâ* candra-jyotsnayâ *dhavalâ* ràtryo. *dvirephâvalinâñ jhaṅkâreṇa unmukharâ vilâsa-vipinasya upântâḥ*, tathà *vasantasya 'udayâḥ*, tathà *mandro* gabhîro *dhvânaḥ* çabdo yeshàñ, tàdṙiçànàñ *ghanânâm udayo* yeshu; tàdṙiçà *divasâ* vàrshika-dinâni, ity arthaḥ. *kadamba*-pushpa-sambandhino *'nilâḥ*, tathà *çṙiṅgâra*-rasa-*pradhânâḥ kâmasya suhṙido* nàrîṇàñ helà-lîlâdayo, hàrà, anye và çûnya-vàsagṙihâdayaḥ, ity arthaḥ.)

Çl. 14. *so 'hañ* prathamañ pratijñàta-kâma-jayaḥ *prakîrṇair* vistṙitair aneka-rûpaiḥ *paritaḥ* samantataḥ *çarair iva vicâraiḥ pareshâñ* mohâjñapta-mithyàdṙishṭi-praṇîta-çàstrânurodhena pravṙittânàñ çatrûṇàñ *balañ* sainyam *unmathya* niràkṙitya, *kâmam* abhilàshañ *nihanmi* niçcayena nàçayàmi. tatra dṙishṭàntaḥ: *yathâ gâṇḍiva-dhanvâ* Arjunaḥ *çaraiḥ Kurûṇâñ sainyam unmathya* vidràvya, *Sindhu-râjañ* Jayadratham *iva* jaghnivàn, tathà, ity arthaḥ. — (*K. so 'hañ* vastuvicàraḥ paritaḥ *prakîrṇair vicârair* nàrî-deha-bîbhatsatà-pradarçana-rûpaiḥ *pareshâñ sainyam unmathya*, *kâmañ nihanmi*. tatra 'anekçva-çabdair dṙishṭàntam àha: *çarair iva*, ity-àdi, *aham* ity atra *Gâṇḍivadhanvâ* Arjuna *iva*, iti dṙishṭàntaḥ; evañ *kâmam* ity atra *Sindhu-râjañ* Jayadratham *iva*, iti; *pareshâñ* ity atra *Kurûṇâm iva*, iti; *vicârair* ity atra *çarair iva*, iti. *çaraiḥ Kurûṇâñ sainyam unmathya*, *Gâṇḍivadhanvâ Sindhurâjañ yathâ nijaghâna*, *tathâ vicâraiḥ pareshâñ sainyam unmathya*, *Kâmañ nihanmi*, ity arthaḥ.)

P. 74.

Çl. 15. *dhîrâḥ* vivekinaḥ *parasya* anyasya *parivâda-giraḥ* nindà-vacanàni *sahante*, ity anvayaḥ. kîdṙiçàḥ dhîràḥ: *niḥkampo* niçcalaç ca 'asau *payodhiç* ca, tad-vat *gabhîrâḥ* anavagàhanîya-manasaḥ, etàdṙiçà *vîrâ* iva vîràḥ. kîdṙiçasya parasya: *krodha*-rûpo yo *andhakâraḥ*, tena *vikaṭâ* uccâvacà yà *bhrukuṭi* krodhâhita-bhrû-ceshṭà, saiva *taraṅgaḥ*, tena *bhîmasya* bhayànakasya. punaḥ kîdṙiçasya parasya: sandhyàyàñ bhavàḥ *sândhyâḥ* ye *kiraṇâḥ* sûrya-raçmayaḥ, tad-vad *aruṇâ* raktâ *raudrâ* bhayàvahà *dṙishṭir* yasya, tàdṙiçasya, ity arthaḥ. — (*K. dhîrâ* janâḥ *parasya parivâda-giraḥ* para-kartṙika-parivàda-giro nindà-vàkyàni *sahante*. parasya kîdṙiçasya: *krodha* rûpândhakâreṇa yo *vikaṭo bhru kuṭa-taraṅgas*, tena *bhîmasya*. tathà *sândhya-kiraṇavad aruṇâ ghorâ* bhîshaṇà *dṙishṭir* yasya, iti. dhîràḥ kîdṙiçàḥ: *nishkampâ nirmalâ gabhîrâḥ payodhaya* iva, *dhîrâ* nirvikàràḥ.

Z. 8. *saçlâghañ* praçaṅsà-sahitañ.

Çl. 16, *vâcâñ klamo* 'vasàdo *na*. *çirasaḥ çûlañ na* pîḍà na. *cittasya* manasaḥ *tâpaḥ* santàpo *na*. *tanoḥ* çarîrasya *vimardaḥ* parasya ràgàt *na* saṅgharshaḥ na. *hiṅsâdi*-pràṇi-màraṇâdir *anartha-yogo na* anartha pràptir *api* na. ato *aham eva ekâ krodha-jaye çlâghyâ* praçaṅsyà. — (*K. parañ* kevalañ *krodha jaye 'ham ekâ çlâghyâ* praçastà dhikàriṇî, yataḥ parasya krodhe sati

mad-adhishṭhitânâṁ maunâvalambanân, *na vâcâṁ* sakâçât *klamaḥ*, *çirasaḥ çûlaṁ* vyathà ca *na*, nindà-vàkya-çravaṇena *na citta-tâpo* 'pi, dantapîḍana-hastapîḍanâdis *tanor vimardaç* ca *na*, parà-*hiṅsâdir anartha-yogaç* ca *na*; *âdi*-padâd dveshâdi-parigrahaḥ; pàpa-janakatvâd anarthatà.)

P. 75.

Z. 2. *paryâptâ* samarthâ. *tanau* çarîre *carati*, iti *tanucaraḥ* çarîrântarvartî, sa tu svalpa-prayatna-sâdhyaḥ, ity arthaḥ.

Çl. 17. ahaṁ *taṁ pâpa-kâriṇaṁ krodhaṁ viçesheṇa nipâtayâmi*. kîdṛiçaṁ krodhaṁ: *svâdhyayâç* ca vedâdhyàyanaṁ *deva-yajñaḥ pitṛi-yajñaç* ca deva-pitṛi-yajñaḥ jyotishṭoma-çrâddhâdiḥ, *tapaṅsi* ca càndràyaṇâdîni, *kriyâḥ* nitya-naimittikâḥ, tàsàm *akâraṇa-bâdhitâraṁ kâraṇaṁ* prayojanaṁ *vinâ bâdhitâraṁ* vighaṭitâraṁ vinâçitâraṁ. punaḥ kîdṛiçaṁ: *dṛishṭibhiḥ* dṛishṭi-vyàpàraiḥ *sphuliṅgam iva* agni-kaṇam iva *vamantaṁ*. kâ kam iva: *Kâtyâyani* Durgà *Mahisham iva* Mahishâsuram iva. kîdṛiçaṁ Mahishaṁ: *pâpa-kâriṇaṁ*. punaḥ kîdṛiçaṁ: *svâdhyâya-deva-pitṛi-yajña-kriyâṇâm akâraṇa-bâdhitâraṁ*, tulyo 'rthaḥ. kathaṁ-bhûtam iva: *dṛishṭibhiḥ sphuliṅgam iva krodhaṁ vamantum*, ity api yojanà susâdhyà. — (K. *taṁ pâpa-kâriṇaṁ krodham ahaṁ, Kâtyâyani* Pàrvatî *Mahisham* asuram *iva, vinipâtayâmi*. kîdṛiçaṁ: *svâdhyâyasya, deva-pitṛi-yajñasya, tapaḥ-kṛiyâyâç* ca *akâraṇa-bâdhitâraṁ*, krodhena svîye, tat-sakala-tyâgât parakîye tat-sakala-vighâtâc ca: *dṛishṭibhiḥ sphuliṅgami va krodham udvamantaṁ* prakàçayantaṁ, krodhasya purushatvena 'âropât krodhas tad-dharma uktaḥ.)

Çl. 18. *iti* anena prakàreṇa *dayaiva rasaḥ* santoshaḥ; "*raso* jalaṁ, *raso* harsho, *rasaḥ* çṛiṅgàra ity api" ity abhidhànàt; tena *ârdraṁ mano* yeshâṁ, te dayà-rasârdra-manasas, teshâṁ purushâṇâṁ *krodhasya udayaḥ* utpattiḥ *kutra*? na kutrâpi, ity arthaḥ. *iti*, iti kiṁ; *asya ajitâtmanaḥ* na jitaḥ âtmà mano yena, tasya *jantoḥ* pràṇinaḥ *daivâd* adṛishṭa-vaçât *durvârâḥ* duḥkhena vàryante durvàràḥ, ata eva *mahati vipad* vipattiḥ *upetâ prâptâ*, iti upayântaram àha: *kruddhe* utpanna-krodhe jane *smeraṁ* hàsyaṁ, tad yuktaṁ *mukhaṁ*, tena *avadhâraṇaṁ* sukha-buddhyà nirûpaṇaṁ; "dhanyo 'haṁ yan mayy asau kupyati", iti. *atha âvishṭe* krodhâveçe *atiprasâda-kramaḥ*; 'kshamîyatâṁ, mahâ-prasâdaḥ", ity-âdi. *vyâkroçe* gàli-pradànâdau *kuçaloktiḥ* âçîrvàdaḥ; "ayam eva sàdhuḥ, vayam îdṛiçà eva", ity-àdi. *tâḍane âtmano duritasya ucchedena* nâçena *utsavaḥ* santoshaḥ. deva, lobha-hiṅsâdayaḥ krodha-mûlà eva,' iti bhâvaḥ. — (K. parasmin *kruddhe* sati mad-adhishṭhitasya *smera-mukhaṁ* yathà syât tathà *avadhiraṇam*; *atha* smera-mukha-pradarçanàt parasmin krodha eva *âvishṭe* sati *prasâda kramo*; *vyâkroçe* nindoktau pareṇa kṛitâyâṁ satyâṁ, tasyaiva *kuçala* praçna rûpà *kuçaloktiḥ*; pareṇa svasmiṅs *tâḍite* sati, *âtma-durita-chedotsavo* bhogena durita-nàçàt. *ajitâtmano 'sya jantor mahati vipat* krodheṇa para-tâḍana-rûpà *daivâd upetâ*, tasmâd *dhig*, iti nindà-vâkyaṁ. evaṁ *dayâ rasârdra-manasaḥ* kshântasya purushasya

thàne *kutaḥ krodhasya 'udayo*, mad-adhishṭhitena 'evaṁ kṛite taṁ prati krodho na 'udayati, ity arthaḥ.)

P. 76.

Z. 4. *sânukroçaṁ* sadayaṁ. — *(K. sânukroçam* iti, anukroço nindà, sà ca 'arthishu, tat-sahitaṁ yathà syàt tathà vadati, ity arthaḥ.*)*

Çl. 19. *vanaṁ vanaṁ prati* iti *prativanaṁ*, *kshitau ruhanti* te *kshiti-ruhâḥ* vṛikshàḥ, teshàṁ *phalaṁ*, jàtâv ekavacanaṁ, bilva-vadarâdi, *akhedaṁ* yathà syàt tathà sukhena *svechâ-labhyaṁ* ichà-màtra-pràpyam, ity arthaḥ. *sthâne sthâne* sthale sthale *çiçiraṁ* çitalaṁ *madhuraṁ* mishṭaṁ, *puṇyâḥ* Gaṅgà-Yamunâdayaḥ *sarito* nadyaḥ, tàsàṁ *payaḥ* pàniyaṁ svechà-labhyam, iti yojaniyaṁ. *mṛiduḥ* komalaḥ *sparço* yasyàḥ sà, etâdṛiçî *sulalitâḥ* sundaràç ca tàḥ *latâç* ca, tàsàṁ *pallavâḥ* tat-pracurà *pallavamayi çayyâ* svechà-labhyà; artha-vaçàd vibhakti-vinyâsaḥ. evaṁ yady api padàrtha-pràpti-sau-labhyam asti, *tad api* tathâpi *kṛipaṇâḥ* dînàḥ *dhaninâṁ dvâri santâpaṁ* duḥ-khaṁ *sahante* anubhavanti, iti mahad âçcaryaṁ. amum arthaṁ çri-Bhàga-vate Çuka âviç cakàra: "cîrâṇi kiṁ pathi na santi" ity evam-àdi. — *(K. prativanaṁ* vane vane *kshitiruhâṁ phalaṁ svechâ-labhyaṁ*, tathà ca tenaiva kshun-nivṛittiḥ; tathà *sthâne sthâne puṇya-saritâṁ* anishiddha-jala-pàna-sari-tàṁ *çiçiraṁ madhuraṁ* ca *payaḥ svechâ-labhyaṁ* ity anushaṅgaḥ, tathà ca tenaiva tṛiṇ-nivṛittiḥ; tathà *sulalita-latâ-pallavamayi çayyâ*, arthàt *sthâne sthâne svechhâ-labhyâ*, tathà ca tayaiva sushupty-upapattiḥ. *tad api* tathâpi *dhaninâṁ dvâri kṛipaṇâ* dhana-lipsayà kâtarà janàs tad-avajñâdhinaṁ *santâ-paṁ sahante*, ity arthaḥ.*)*

Z. 9. punar api labdhaṁ tiras karoti: *are mûrkha*, iti. *bhavato* lobhâ-saktasya.

Çl. 20. he *paço* viveka-vidhura! *tava kati* kiyat-saṅkhyakàḥ *samârambhâḥ* upakramàḥ *kati vârân na bhagnâḥ* na nashṭàḥ, api tu bhagnà eva. paçutvam eva viçadayati. kidṛiçasya tava: *asmin tuche* atikshudre *draviṇa-*rùpaṁ dhana-rùpaṁ yan *mṛigatṛishṇâ* marumaricikà, tad eva *arṇava-jalaṁ* sàgara-jalaṁ tasmin, tâdṛiçe saṁvàda-leça-çûnye 'pi jale *pipâsoḥ* pàtum ichoḥ. kiṁ ca: he *mûḍha! tathâpi* samàrambha-nàçe 'pi *te* tava *pratyâçâ* pracurechà adyâpi *na viramati* na 'uparamate. evaṁ vimarshe kriyamàṇe, iti pratibhàti, ity àha: *yac ceto* antaḥkaraṇam adyâpi *çatadhâ vidirṇaṁ na* sphuṭitaṁ na, tac cetaḥ *niyataṁ* niçcayena *açanigrâvabhiḥ* vajropalaiḥ *gha-ṭitaṁ* nirmitam, ity arthaḥ. — *(K. are mûrkha!* iti sukha-virodhi dhana-lubdha-purushasya sambodhanaṁ. he *paço! draviṇaṁ* dhanaṁ, tad eva 'asâ-ratvàn *mṛigatṛishṇâ*; tad-rùpe *'rṇava-jale tuche* 'nupàdeye *pipâsos tava kati kati vârân* dhana-pràpti-*samârambhâ na bhagnâ*, api tu bhagnà eva; *tathâpi te pratyâçâ na viramati*. ato he *mûḍha! tava ceto* yat *çatadhâ na dirṇaṁ*, tan *niyatam açani-grâva*bhaya-*ghaṭitaṁ*. *açanir* vajraṁ, *grâvâ*, çilà.*)*

Z. 15. *camatkâraṁ* açcaryaṁ

Çl. 21. *mugdhaḥ* san *anâratañ* nirantarañ sarva-daiva-*labhyañ* labdhuñ çakyañ yat, tat *labdhañ* prâptañ. *idañ ca adhikañ labhyañ* labdhuñ çakyañ. *tasmâd* eva *mûla*-dhanâl *labhyañ* prâptavyañ vṛiddhi-rûpañ. *tato* vṛiddhi-rûpa-dhanât *aparañ* kalâvṛiddhyâkhyañ *labdhañ* prâptam, *iti ca* evañ prakâreṇa *dhyâyasi dhanañ dhanam*, iti. param tu tvam *etan na vetsi*, yad *bhavantam* eva *'iyañ âçâ-piçâcî balât* haṭhât *sarva-grâsañ* yathâ syât tathâ *acirât* jhaṭity eva *grasishyati* gilishyati, iti. kidṛiçañ bhavantañ: *mahâ-lobha* eva *andhakâraḥ*, tena *âvṛitañ* vyâptam, ity arthaḥ. — (*K.* idam api labdhañ purushañ sambodhyaiva, iti, *aho* tvam *anâratañ labdhañ*, lapsyamânañ, labdhum âkâñkshitam aparyâptañ *dhanam* eva *dhyâyasi*; *alabhyañ dhanam* iti nârtha *od*-antâd *aho*-çabdât parañ sandhy-abhâvât. dhyâna-kâram âha: *etad*, iti. *etal labdham, idam adhikañ labhyam* iti, atas tan-*mûlena labhyañ* labdhum ucitañ, parañ *labhyañ* lapsyate, ity arthaḥ. iti dhyâyasi, ity arthaḥ. *etat punar na vetsi âçâ-piçâcî* iyañ *mahâmohândhakârâvṛitañ bhavantañ balâd* acirât *sarva-grâsañ* sarvâvayava-grâsenaiva *grasishyati*, na tu kiñcid-avayava-grâsena, iti arthaḥ.)

P. 77.

Çl. 22. dhanârjanam atikleça-sâdhyam, ity upapâdya, tad-vakshaṇam api atîva duḥkaram, ity âha: *api ca dhanañ. katham api* mahatâ kashṭena *tâvat* prathamataḥ *dhanañ labdhañ* prâptañ, *tathâpi asya dhanasya viçesheṇa nâçe* yugapat kshaye *sati, nâce vâ* krameṇa apagame *sati, ubhayathâpi niyatañ* niyamena tava *viyogaḥ* virahaḥ *asti*. tataḥ kiñ? tatra 'âha: etat *kathaya*. etat kiñ: *kimu* iti praçne, *anutpâdaḥ çreyân* anutpattiḥ çreyaskarî, *atha* athavâ *vilayo* vinâçaḥ *pathyaḥ* çreyaskaraḥ, etat *kathaya* brûhi. vicâre tv evam asti, ity âha: *labdhasya* prâptasya *vinâçaḥ vyathayati tarâm* atiçayena pîḍayati, ity arthaḥ; *na tv anudayaḥ* na tv anutpâdaḥ; utpatty-abhâve lokasya na tathâ pîḍâ, ity arthaḥ. — (*K. katham api* prakâreṇa *dhanañ tâvad* yadi *labdhañ, tathâpy asya* dhanasya *vilayo* nâças, tathâ ca dhanasya *vinâçe* dhvañse, *nâçe* 'nutpâde *vâ sati*, dhanena saha *tava ubhayathâ viyogaḥ*; yad vâ: *tava nâçe vâ sati*, ity arthaḥ. *viyogo* 'pi [illegible] api-çabdasya *tathâpi*, ity evam anvayaḥ. ubhayos tvañ *kathaya, kiñ* dhanasya *anutpâdaḥ çreyân, atha vâ vilayo* vinâçaḥ *pathyaḥ*. *atha* ity atra vâ-kâraḥ pûraṇîyaḥ. koṭi-dvayasya bhadrâbhadratvañ svayam eva darçayati: *vinâça* iti. *labdhasya* dhanasya *vinâço vyathayati tarâm, na tv anudayo vyathayati tarâm*, ity arthaḥ.)

Çl. 23. dhanâd viraktasya kathañ sukham? ity âçañkya 'âha: *kiñ ca, mṛityur*, iti. *mṛityuḥ çaçvat nirantarañ mûrdhni* mastake çirasy eva sthitvâ, *mâdyati* hṛishyati. *ghorâ* bhayâvahâ *jarâ* vârdhakañ, tad-*rûpiṇî uragî* sarpiṇî *eshâ* atiprasiddhâ *tvâñ grasate* gilati. na kevalañ tvâm eva grasate, api tu *parigrahâḥ* strî-putrâdayas, *tanmayaiḥ gṛidhraiḥ* mâñsa-bhakshakaiḥ pakshibhir *jagad* viçvañ *grasyate*. evañ sati, kim vidheyañ? tatra 'âha: *bodha-jalair* jñâna jalaiḥ *abodhena* ajñânena *bahulañ* bahu *tat*

pûrvoktaṁ *lobhena janyaṁ rajaḥ dhûtvâ* prakshâlya, *santosha eva amṛita-sâgarâmbhaḥ,* tatra *manâk* kshaṇa-mâtraṁ *magnaḥ* âplutaḥ, *sukham* askhalitaṁ *jîvati* tishṭhati, ity arthaḥ. — (*K.* iyam api saṅsâra-sukha-lubdha-janaṁ praty uktiḥ. *çaçvat* vâraṁ vâraṁ *mûrdhni mṛityur mâdyati* madena nṛityati, ity arthaḥ, tathâ ca tava maraṇam âsannam, lobhena kiṁ kiṁ karishyasi? ity arthaḥ. maraṇa-sâmagrîṁ darçayati: *uragî*, iti. *jarâ*-rûpiṇî *ghorâ 'eshâ urâgî tvâṁ grâsate*, tathâ saṅsâra-*parigrahamayair gṛidhrair jagad* eva *grasyate;* saṅsâra-parigrahasya lobha-mûlakatvena 'idam api lubdhânâṁ anishṭa-pradarçanaṁ; tarhi mayâ kiṁ kartavyam? ity âha: *dhautvâ* 'iti. *tat* tasmât saṅsâra-vâsanâ-rûpaṁ *lobha-janyaṁ rajo* dhûliṁ *abodhâd* ajñânâd *bahulam* anekaṁ *bodha*-rûpair *jalair dhautvâ* prakshâlya, *santosha*-rûpe *amṛita-sâgara-jale bhṛiçaṁ magnaç ciraṁ sthâsyasi* çiraṁ jîvî bhavishyasi, ity arthaḥ. yad vâ: *santosha* ity-âdau *ciraṁ magnaḥ sthâsyasi,* na tu dhana-viyoga-duḥkham anubhavishyasi, ity arthaḥ.)

Z. 15. *sva-sannidhau* sva-samîpe; anena vastuvicâra-kshamayor antaraṅgaḥ santoshaḥ, iti dhvanitaṁ.

P. 78.

Çl. 24. râjño nikaṭe sva-sâmarthyaṁ darçayati: *so 'ham, nânâ* iti. *so 'haṁ* vikhyâta-vibhavaḥ santoshaḥ *tarasâ* balena *prasahya* parâbhûya *nirjitya* jitvâ *avaçyaṁ* vyâpâra-çûnyaṁ vikalaṁ *lobhaṁ pinashmi* sañcûrṇayâmi. kaḥ kam iva: *Dâçarathiḥ* çrî-Jânakî-patiḥ *balena paribhûya jitvâ avaçaṁ raksho-'dhinâthaṁ* Râvaṇam *iva*. kîdṛiçaṁ lobhaṁ Râvaṇaṁ ca: lobha-pakshe, *nânâ* bahûni *mukhâni* dvârâṇi yasya, taṁ; Râvaṇa-pakshe: *nânâ* anekâni *mukhâni* yasya, taṁ, daça-vadanatvât. *trayâṇâṁ jagatâṁ vijayinaṁ* jaya-çîlaṁ paksha-dvaye 'pi tulyaṁ spashṭaṁ ca. punaḥ kîdṛiçaṁ: *devâç* ca *dvijâtayaç* ca brâhmaṇâḥ, teshâṁ *badho* mâraṇaṁ *bandhanaṁ* ca, tena *labdhâ vṛiddhir* yena saḥ, taṁ. anyâya-labdha-dhanasya yâdṛiçî gatiḥ, tâdṛiçî lobhasyâpi, iti bhâvaḥ. — (*K. idânîṁ so 'haṁ prasahya* balâtkâreṇa *lobham avaçaṁ* svâyattaṁ *nirjitya tarasâ* vegena *hinasmi* nâçayâmi, ity arthaḥ. *raksho-'dhinâthaṁ* Râvaṇaṁ *Dâçarathî* Râma *iva*. lobha-Ravaṇayor dvayor api viçeshaṇâny âha: *nânâmukham,* iti. *nânâ*-vishayeshu *mukhaṁ* sâmmukhyaṁ pravṛittir yasya, tâdṛiçaṁ *lobhaṁ, Râvaṇam* tu daça-mukhaṁ. *trayâṇâṁ jagatâṁ vijayinaṁ* lobhasya jagat-trayâkramât, Râvaṇasya ca jagat-traya-parâbhava-kâraṇât. *deva* 'iti *labdha-vṛittiṁ* labdha-vyavasâyaṁ, lobhasya devâdînâṁ hiṅsayâ svâbhishṭotpâdanât, Râvaṇasya tu sva-prasiddhaṃ eva tat.)

Z. 7. *sambhṛitâni* susiddhâni *vijayârthaṁ prayâṇâya maṅgalâni* kanyâ-darça-dadhy-âdîni. *pratyâsannaḥ* nikaṭa-vartî, *mauhûrtikâveditaḥ* jyotirvidâ 'âdishṭaḥ *prasthâna-samayaḥ* vijaya-yâtrâ-samayaḥ. — (*K. mauhûrtiko* muhûrta-nirṇaya-kartâ gaṇakaḥ.)

Çl. 25. *karîndrâḥ* hastîndrâḥ *sajjyantâṁ* sapalyâṇâḥ kriyantâm. kîdṛiçâḥ karîndrâḥ: *kumbha-bhittoḥ* gaṇḍasthala phalakât *cyutâ* sṛitâ ca 'asau *mada*

madirâ mada-dravaç ca, tena *mattâḥ bhṛiṅgâḥ* yeshu te. *turaṅgâḥ* açvâḥ *syandaneshu* ratheshu *yujyantâñ* badhyantâñ; kidṛiçâḥ turaṅgâḥ: *prasabham* atiçayena *jitaḥ maruto* vâyoḥ *caṇḍaḥ* atiçayitaḥ *vego* yais, te. *pâdâtâḥ* pattayaḥ *sañcarantu* agre gachantu; kidṛiçâḥ pâdâtâḥ: *kakubhâñ* diçâñ *antarâle* madhye *kuntaiḥ* prâsaiḥ âyudha-viçeshaiḥ *nilotpalânâñ vanam iva sṛijantaḥ* kurvantaḥ. *açvavârâḥ* açva-sâdhinaḥ *prasabham* atiçayena *sañcarantu* gachantu; kidṛiçâḥ açvavârâḥ: *asibhiḥ* khaḍgaiḥ *lasantaḥ* çobhantaḥ *pâṇayo* hastâḥ yeshâñ, te. — (*K. kumbha*-rûpa-*bhittitaç cyutâyâ mada-madirâyâ* âmodena *mattâ-bhṛiṅgâ* yebhyas, tâdṛiçâḥ *kariṇdrâḥ sajjâḥ kriyantâm. prâsabhena* bâlâtkâreṇa *jito marud* yais, tâdṛiçâç *caṇḍa-vegâs turaṅgâḥ syandaneshu yojyantâñ. kakubhâñ* diçâm *antarâle* madhye *nilotpalânâñ vanam iva kuntair* astra-viçeshaiḥ *sṛijantaḥ pâdâtâḥ* padâtayaḥ *prathamañ sañcarantu. atha* anantaram *asi-latâ-pâṇayo açvavâhâḥ sañcarantu*, ity arthaḥ.)

Z. 17. *pâripârçvikañ* pârçva-carañ sevakañ. *sâṅgrâmikam* saṅgrâme yogyañ. — (*K. pâripârçvikañ* svânucarañ.)

P. 79.

Çl. 26. *ete vâhâḥ* açvâḥ *gagana-simni* antarikshe *rathañ vahanti* nayanti. kidṛiçâḥ vâhâḥ: *uddkûtañ* uccalitañ yat.*pâñçu-paṭalañ* dhûli-samûhas, tena *anumitaḥ* jñâto yaḥ *prabandho* gati-santânaḥ, tena *dhâvatâ khurâgra-cayena* khurâgrabhâgena *cumbitaḥ* îshat spṛishṭaḥ *bhûmi-bhâgo* yais, te. kidṛiçañ rathañ: *nirmathyamâno* yo *jaladhiḥ* samudras, tasya yo *dhvaniḥ*, tadvad *ghoro* bhayâvaho *ghoshaḥ* çabdo yasya, tañ. — (*K. uddhûtena pâñçu paṭalena 'anumitaḥ prabandho* gati-paripâṭo yeshâñ, tâdṛiçâḥ ye *dhâvantaḥ khurâs*, teshâm *agra-cayena cumbitaḥ* spṛishṭo *bhûmi-bhâgo* yais, tâdṛiçâ *ete vâhâ* açvâ *nirmathyamânasya jaladher dhvanivad ghora-ghoshañ* yathâ syât tathâ *gagana-simni rathañ vahanti*, ity arthaḥ.)

Z. 9. (*K. puṇâti*, iti, "mâm" iti çeshaḥ.)

Çl. 27. *amî* sammukhe vartamânâḥ *saudha-çikharâḥ* gṛihoparibhâgâḥ *bhûyaḥ* bâhulyena *vibhâvyante* dṛiçyante. kidṛiçâḥ saudha-çikharâḥ: *dhûni-yantrebhyaḥ skhalat* nirgachad yaj *jalañ*, tasya yo *jhaṅkâraḥ* çabda viçeshaḥ, tena *mukharâḥ* saçabdâḥ. punaḥ kidṛiçâḥ: *çaçikarân mushṇanti* corayanti, iti *çaçikara-mushaḥ; çaçikaravât ruk*.dîptir yeshâñ te, iti vâ pâṭhaḥ, sudhâdhavalâḥ, ity arthaḥ. *yatra* yeshu saudha çikhareshu *iyam* upalabhyamânâ *vicitrâ* nânâvarṇâ *patâkânâm âvaliḥ* paṅktiḥ, *uccaih* atiçayena *çaradi amalâḥ* nirmalâḥ ye *meghâḥ*, teshâm *ante* madhye *vilasanti* camatkâram âvishkurvanti yâ *taḍit* vidyul-latâ, tasyâḥ *lekhâ* rekhâ, tasyâḥ *lakshmîñ* çobhâñ *vitarati* vistârayati. saudha-meghayoḥ taḍit pâtâkayoḥ ca upamânopameyabhâvaḥ. — (*K. amî çaçi-kara rucaḥ saudha çikharâ bhûyo* vârañ vârañ yathâ syât tathâ *vibhâvyante* dṛiçyante. kidṛiçâḥ: *dhârâ yantram* jala sañcâraṇârtha-kṛita-yantrañ prakriyâ viçeshas, tena *skhalitânâñ jalânâñ jhâtkâreṇa, jhâd* ity avyakta-çabdena, *mukharâḥ. yatra* yeshu *patâkâvalir* iyam

çarad-amala meghasya 'nte vilasantyâs taḍil-lekhâyâ vicitrâṁ lakshmîm uccair vitarati, paçyatâṁ cakshuḥ-sukhaṁ dadâti, ity arthaḥ.)

Z. 15. *etâḥ nagarasya*, Vârâṇasî-nâmnaḥ *paryanteshu* prânteshu *udyâna-bhûmayaḥ* upavana-pradeçâḥ *nâtidûre* atinikaṭe "dṛçyante" ity adhyâhâraḥ. kîdṛçyaḥ udyâna-bhûmayaḥ: *mukulaṁ mukulaṁ prati*, iti *pratimukulaṁ* pratikoçaṁ *lagnâ* ye *madhupâḥ*, teshâm *âvaliḥ* paṅktiḥ, tasyâ *raṇitena* çabditena *mukharâḥ* vâcâlâḥ. *jṛimbho* vikâças, tasya *ârambhaḥ* utpattiḥ, tasya *bharaḥ* atiçayaḥ, arthât tu kusumânâṁ vikâçâtiçayaḥ, tasmâd *vigâlan* niḥsaran yo *makarandaḥ* pushpa-rasas, tena *durdinaṁ* yâsu, tâḥ; vṛishṭimatyaḥ, ity arthaḥ. punaḥ kîdṛçyaḥ: *kusumaiḥ surabhayaḥ* suparimalâḥ. *çyâmâyamânâḥ* nîla-varṇâḥ *ghana-chada-châyâḥ* niviḍa-châyâḥ *taravo* yâsu, tâḥ. *maruto* vâyavaḥ *gṛihîtaṁ pâçupata-vrataṁ* yais, te; sarvadâ dhûlim uddhûlayantaḥ pracaṇḍâḥ, iti bhâvaḥ. — (*K.* nagara-paryantâraṇya-bhûmayo "dṛçyante", iti çeshaḥ. kîdṛçyaḥ: *pratimukula-lagnâyâ madhupâvalyâ raṇitena* çabdena *mukharâḥ*, *jṛimbhâ-bhareṇa* vikâçâtiçayena *vigalatâṁ makaranda-vindûnâṁ durdinaṁ* yatra, tâdṛçyaḥ. *çyâmâyamânânâṁ ghana-chadânâṁ* niviḍa-patrâṇâṁ *châyayâ taralâḥ*, châyâ-calanâd eva tat-târalyaṁ bodhyaṁ; *châyâtaravaḥ*, iti pâṭhântaraṁ, tathâ ca châyâtaruḥ sthira-chhâya iti koshâd artho bodhyaḥ.)

P. 80.

Çl. 28. tad eva darçayati: *tathâ hi, toya iti. samîrâḥ* vâyavaḥ *prakarsheṇa calâḥ* cañcalâḥ *latâs*, tâ eva *bhujâs*, tair *nṛityanti* nṛityaṁ kurvanti, tâpasâḥ pâçupatâ api evaṁ nṛityanti, iti bhâvaḥ. kîdṛçâḥ vâyavaḥ tâpasâç ca: *sura-sarito* Gaṅgâyâḥ *toyena* *ârdrâḥ*, kṛita-Jâhnavî-majjanâḥ. pu. kî. *parâgaiḥ* kusuma-rajobhiḥ *sitâḥ* yuktâḥ vâyavaḥ, *shiñ* bandhane ity asya *sitâḥ*, iti rûpaṁ, *parâgaiḥ* vibhûti-rajobhiḥ *sitâḥ* dhavalâḥ tâpasâḥ. *cyuta-kusumaiḥ* svayam eva patitaiḥ pushpaiḥ *Indumauliṁ* Çaṅkaram *arcantaḥ* pûjayanta *iva*: pu. kî. *madhupa-rutaiḥ* bhramara-çabdaiḥ *prodgîtâm* uccaiḥ gîyamânâṁ *stutiṁ paṭhanto* vâyavaḥ, tâpasâç ca *madhupânâm* iva *rutâni*, taiḥ *prakarsheṇa* tâla-svara-tânâdi-rûpeṇa *udgîtâṁ* gânakramavatîṁ *stutiṁ paṭhantaḥ*, ity arthaḥ. — (*K. samîrâḥ pracala-latâ-*rûpair *bhujair nṛityanti*. kîdṛçâḥ; *sura-sarito* Gaṅgâyâs *toyair ârdrâḥ*; *parâgaiç* ca kusuma-reṇubhiḥ *sitâḥ*; *cyutaiḥ kusumair Indumaulim arcanta iva*, *prodgîtâṁ* prakṛishṭoccaritâṁ *stutiṁ madhupa-rutaiḥ paṭhanto nṛityanti*, iti pâṭha-nṛityayor ubhayatra 'ivârtho bodhyaḥ. pâçupata-vratadharo 'pi Gaṅgâ-snâto, bhasma-parâgasitaḥ, kusumaiḥ Çivam arcayan, stutiṁ paṭhan, nṛityati.)

Çl. 29. *sâ 'eshâ Candracûḍasya* Mahâdevasya *vasatiḥ* Kâçî *ceto* manaḥ *âkarshati* vaçî-karoti, ity arthaḥ. kîdṛçî Kâçî: *antas tamo vighaṭanât* ajñâna-vinâçât *âtma-prabhaṁ* sva-prakâçam *ânandaṁ dadhati* prakaṭayanti. pu. kî. *mukteḥ padyata* prâpyate anena, iti *mukteḥ padaṁ* kâraṇaṁ, ity arthaḥ. kâ 'iva: *vidyâ 'iva* brahmâtmaikatva-jñânam iva; brahmâtmaikatva-jñânam api, ajñânaṁ vinâçya, sva-prakâçam ânandaṁ prakaṭayat, mukti-hetur, iti.

tad-dṛishṭântaḥ. sâ kâ: *yatra* yasyâñ Kâçyâñ *iyañ Jâhnavî* Gaṅgâ *vakrâm aindavîñ kalâm* ardhacandrâkârâñ candra-kalâñ *phena-paṭalaiḥ* phena-samûhaiḥ *hasati 'iva*. utprekshate, kathañ-bhûtâ 'iva; *bhûmeḥ kaṇṭha-vilambinî* kaṇṭhe lambamânâ *kuṭilâ* svabhâvataḥ *muktâvalî 'iva* mauktika-mâlâ 'iva. — (*K. eshâ Candracûḍasya* Maheçasya *vasatir* Vârâṇasî *cetaḥ karshati vidyâ 'iva mukteḥ padañ*. kîdṛiçî: *tamo-vighaṭanâd* ajñâna-nâçâd *antar* manasy *ânandañ dadhati* aparyanti. ânandañ kîdṛiçañ: *âtma-prabhañ* Brahma-tulyañ, "ânando Brahmaṇo rûpañ" iti çrutyâ; brahmaṇo 'py ânandakatva-bodhanât, tathâ ca paramânanda-tulyam ânandañ, ity arthaḥ.

âtmâ yatno, dhṛitir, buddhiḥ, svabhâvo, brahma, varshma ca,

iti koshaḥ. *yatra* Vârâṇasyâñ *iyañ Jâhnavî phena-paṭalair* Maheça-mûrdhni svasamaçîlâm *aindavîñ vakrâñ kalâñ hasati 'iva*, svayam api Maheça-mûrdhasthâ *kuṭilâ* pheṇa-dhavalâ ca. kîdṛiçî: *bhûmeḥ kaṇṭha-vilambinî muktâvalî 'iva*, iti dairghya-kauṭilya-dhâvalyaiḥ sâdṛiçyañ.)

Z. 10. *sura-sarito* deva-nadyâḥ *parisaras* tîrañ, tasya *alaṅkâra-bhûtam âyatanañ* sthânañ, Anâdiçvara âyatanavân jñâtaḥ, ity arthaḥ.

Çl. 30. *eshaḥ devaḥ*, dyotanâd devaḥ, paramâtmâ, *purâ-vidbhiḥ* kshetra-mahimajñaiḥ Vyâsâdibhiḥ *kshetrasya 'âtmâ* kshetrâbhimânî devatâ *iti gîyate* ucyate. *puṇyam* Îçvarañ *bhajanti* sevante, te *puṇya-bhâjaḥ* Çiva-bhaktâḥ, *atra* Âdikeçava-sannidhau *dehañ samutsṛijya*, *yañ viçanti* praviçanti, prâpnuvanti, ity arthaḥ. — (*K. esha* Âdikeçavaḥ *kshetrasya* Vârâṇasî-rûpasya *âtmâ*, *iti purâvidbhir gîyate*. *atra* kshetre *dehañ parityajya yam* Âdikeçavañ *puṇya-bhâjo viçanti.*)

Z. 16. anena vivekâsanni-mâtreṇa kâmâdînâñ parâbhâvo darçitaḥ.

P. 81.

Z. 1. bodhotpatti-rûpa-svâbhîshṭa-siddhaye bhagavantam Âdikeçavañ stauti. *bhagavân* shaḍ-guṇaiçvarya-sampannaḥ;

utpattiñ ca vinâçañ ca, bhûtânâm agatiñ gatiñ,
vetti vidyâm avidyâñ ca, sa vâcyo *bhagavân* iti.

jayatu sarvotkarsheṇa vartatâñ. — sarvâṇi sambuddhy-antâni. *amarâṇâm* devânâñ *cayaḥ* samûhaḥ, tasya *camû-cakrañ* senâ maṇḍalañ, tasya *cûḍâ maṇi çreṇibhiḥ* mukuṭa-maṇi-paṅktibhiḥ *nirâjitañ upânte* samîpe *pâda dvayâmbhojam* caraṇa-yugma-kamalañ yasya. — *râjantaḥ* çobhanto ye *nakhâḥ*, teshâñ *dyotâḥ* prakâçâḥ ta eva *khadyotâḥ*, taiḥ *kimîritañ* çabalitañ *svarṇa-pîṭhañ* yasya. — *sphurat* yat *dvaitañ* bhedaḥ, tasya yâ *vibhrântiḥ*, tasyâḥ *santâna* paramparayâ *santaptâḥ* khinnâ ye *vandâravo* vandana-çîlâḥ bhaktâḥ, teshâñ *saṅsâra*-rûpâ yâ *nidrâ*, tasyâḥ *apahâre* vinâçe *eko* mukhyo *dakshaḥ*; tasya sambodhane: he daksha! evañ sambuddhy-anteshu sarvatra jñeyañ. — *kshamâ-maṇḍalasya* kshoṇî valayasya ya *uddhâras*, tena *sambhârâṇâm* parvatâdînâñ *saṅghaṭṭaḥ* sammardo yasmin *daṅshṭrâgra koṭau* daṅshṭrâgra-bhâge *sphurac chaila cakrañ* parvata samûho yasya. — *krameṇa* pâda vikshepeṇa *âkrântañ loka trayañ* yena. — *prakṛishṭa balâbhyâñ bhujâbhyâñ bala-na uddhûtam*

ûrdhvaṁ dhṛitaṁ yad *Govardhana*-rûpaṁ *chatraṁ*, tena *nivâritaṁ* nitarâṁ vâritaṁ, *Âkhaṇḍalena* Indreṇa *udyojitâḥ* preritâḥ *akâṇḍe* asamaye *caṇḍâḥ* pralaya-kâlînâḥ *ambuvâhâḥ* meghâḥ, teshâm *ativarshaṇena trasad* bhîtaṁ yad *gokulaṁ*, tasya *trâṇaṁ* rakshaṇaṁ, tena *vismâpitam* âçcarya-yukta-kṛitaṁ *viçvaṁ* yena. — *prabho* avyâhataiçvarya. — *vibudhâḥ* devâḥ, teshâṁ *ripavo* Dânavâḥ, teshâṁ yo *badhû-vargaḥ* strî-samûhaḥ, tasya yat *sîmanteshu sindûraṁ*, tad eva *sandhyâ-mayûkha-chaṭâ* sandhyâ-kâlîna-mayûkhâḥ kiraṇâḥ, teshâṁ *chaṭâ* âbhâ, tasyâ *unmârjane* proñchane *uddâmaṁ* prasiddhaṁ yad *dhâma* tejaḥ, tasya *'adhipaḥ* âçrayaḥ, tasya sambodhane *he adhipa!* — *trâsto* bhîto yo *daityendro* Hiraṇyakaçipuḥ, tasya *vakshas-taṭî-pâṭane* vidâraṇe *akuṇṭhâ* apratihatâ *bhâsvatî* dîptimatî *nakha-çreṇiḥ* paṅktir yasya, tâdṛiçaṁ yat *pâṇi-dvayaṁ*, tasmât *srastam* adhaḥ-patitaṁ *vistâri* prasaraṇa-çîlaṁ yad *raktaṁ*, tasya *arṇavaḥ* sâgaraḥ, tasmin *â* samantât *magnaṁ loka-trayaṁ* yena. — *tribhuvanasya bhayakṛit* ripuḥ yaḥ *Kaiṭabho* Daityaḥ, tasya *uddaṇḍaḥ* sthûlo yaḥ *kaṇṭhaḥ*, tasya *asthi-kûṭaṁ* asthi-saṅghaḥ, tasmin *sphuṭaṁ* spashṭaṁ *unmârjitaṁ* çodhitam *uddâmaṁ* khyâtaṁ yac *cakraṁ* Sudarçanaṁ, tasya *sphurad* dedîpyamânaṁ yaj *jyotiḥ*, tena *ullâsitâ* uddîptâ *uddâmarâḥ* udbhaṭâḥ *uddaṇḍâḥ* catvâro *dordaṇḍâḥ* bâhavo yasya. — *khaṇḍendu cûḍo* Mahâdevaḥ *priyo* yasya. — *prauḍho* atibalo yo *dordaṇḍaḥ* bâhudaṇḍaḥ, tena *vibhrântaḥ* bhrâmito yo *Manthâcalaḥ* Mandarâdriḥ, tena *kshubdho* yo *dugdhâmbudhiḥ* dugdha-samudraḥ, tasmât *protthitâ* âvirbhûtâ yâ *Çrîḥ* Lakshmîḥ, tasyâḥ *bhuja-vallîḥ*, tat-*saṅçleshaṇa* âliṅganena *saṅkrântâ pîna stanayor âbhoge* viçâle sthale yâ *patrâvalî* patra-lekhâ, tayâ *lâñchitam uraḥsthalaṁ* yasya. — *sthûlâni* yâni *muktâphalâni*, teshâm *udâraç* ca *'asau hâraç* ca, tasya *prabhâ-maṇḍalena sphuran kaṇṭho* yasya. — *vaikuṇṭha* paramâtman — *bhaktasya lokasya* bhakta-janasya, yaḥ *saṅsâraḥ*, tad-upâdânaṁ *mohaḥ* bhâva rûpam ajñânaṁ *chinatti*, iti *chit*, taṁ *bodhodayaṁ* brahmâdvaitasya sâkshâtkârodayaṁ *dehi*. *deva* sva-prakâça! *tubhyaṁ namo* 'stu. — (K. he *bhagavan! jaya jaya! bhakta-janasya saṅsâra-chidaṁ bodhodayaṁ dehi!* tasmât *tubhyaṁ namaḥ*, ity anvayaḥ. — tatra *amaracaya* ity-âdi *dyute* ity-antaṁ sambodhanam ekaṁ. he *amara-cayasya* yac *camû-cakraṁ* sainya-samûhas, tac-*cûḍâ-maṇi-çreṇyâ nirâjitaṁ* yat *pâda-dvayâmbhojaṁ*, tatra *râjatâṁ nakhânâṁ dyotâ* eva *khadyotâs*, taiḥ *kirmîritâ* miçritâ *svarṇa-pîṭhasya dyutir* yasya, tâdṛiça! — *sphurad* ity-âdi *daksha* ity-antaṁ aparaṁ sambodhanaṁ. he *sphuratâ dvaita vibhrânti-santânena* dvaita-bhrama-samûhena *santaptasya vandâru-saṅsârasya* praṇamaj jagato bhrama-rûpa-*nidrâpahâra eka-daksha* pradhâna-samartha! — *kshamâ* ity-âdi *cakra*-antam aparaṁ. he *kshamâ maṇḍalasya* bhû khaṇḍasya *uddhâra-sambhâre* uttolanârambhe varâha-mûrteḥ *saṅkhanâyâḥ* prâpita-khedâyâ *daṅshṭrâyâ agra-koṭir* agra-bhâgasya *agraṁ*, tayâ *sphurad* vidîryac *chaila-cakraṁ* yasmât, tâdṛiça! — tathâ he *kramâkrânta-lokatraya*, *kramas* trivikramasya pâda trayeṇa 'âkramas, tena *âkrântaṁ* vyâptaṁ *loka-trayaṁ* yena, tâdṛiça! — *prabala* ity-âdi *ugra* ity antam aparaṁ. he *prabho! prabala bhuja balâd uddhṛitena* uttolitena *Govardhana*

parvata-rûpa-*chatrena nivâritam* *Âkhandalena* Indrena *uddyotitasya* pravartitasya *akânda-candâmbhuvâhasya* âkasmika-canda-meghasya *ativarshâ*dhjnam yad *ambu*; tena *sândra-trasatâm* atibibhyatâm *gokulânâm* *trânena vismâpitam* vismiti-kritam *açesha-viçvam* yena, tâdriça! — *vibudha* ity-âdi *dhâmâdhipa* ity antam aparam. he *vibudha-ripu-badhû-vargasya sîmante* yâ *sindûra-rûpâ sandhyâ*, arthâd vaidhavyât sîmantato 'pasâryamânâ, tasyâ yâ *mayûkha-chatâ*, tayâ *unmârjita* ujjvali-krito *dhâmâdhipah* sûryo yena, tâdriça! — *trasta* ity-âdi *lokatraya* ity antam aparam. he *trasto* Narasiṅha-mûrti-darçanâd bhîto yo *Daityendro Hiranyakaçipus*, tasya *vaksho*-rûpa-*tatâ*tmaka-*kapâtasya pâtane* vidârane *akunthâ bhâsvatî* dîptimatî *nakha-çrenî* yasya, tâdriçena *pâni-dvayena çraste vistîrne rakta-*rûpâ*rnave âmagnam loka-trayam* yasmât, tâdriça! nakhair Hiranyakaçipor vaksho vidârya, pâni-dvayena vistîrnais tadîya-raktair jagad-vyâpanât. — *tribhuvana* ity-âdi *dordanda* ity-antam aparam.. he *tribhuvana-ripoh Kaitabhasya akuntho* yah *kanthâsthi-kûtas*, tatra *sphutam unmârjitasya* tat-kartanena nirmalîbhûta-dhârasya *cakrasya sphuratâ jyotir ulkâ-çatena uddâmara uddanda* udbhato *dordando* yasya, tâdriça! — he *khandendu-cûdasya* Maheçasya *priya!* — *praudha* ity-âdi *sphuratkantha* ity-antam aparam sambodhanam. he *praudha-dor-darpena vibhrânto* yo *Manthâcalo* Mandarâdris, tena *kshubdhât dugdhâmbudher utthitâyâh Çriyah svabhujâvalli-sançleshena* svorasi *sankrântâ* yâ *pîna-stanâbhogasya patrâvalî*, tayâ *lâñchite urahsthale* yah *sthûlo muktâphala*-ghatita *udâra-hâras*, tat-*prabhâmandalena sphuran* dîpyamânah *kantho* yasya, tâdriça! —)

P. 82.

Z. 1. *nâtayitvâ* bhramana-viçeshena darçayitvâ, ity arthah. *skandhâvâram* katakam *niveçayâmah* sthâpayâmah. — (*K. skandâvâram* senâm.)

Fünfter Akt

P. 82.

Ittham caturthe 'nke vivekodyogam uktvâ, vairâgyotpattim varṇayitum pañcame 'nke çraddhâyâḥ praveçam stauti: *tataḥ praviçati çraddhâ*, iti. — *(K.* Vairâgyotpattir iti viveka-sainyena kâma-krodhâdau mahâmoha sainye nâçite, putra-pautrâdi-çokâkulasya manaso vaiyâsikyâ Sarasvatyâ vairâgyasya 'utpâdayishyamâṇatvât.*)*

Z. 9. paraspara-pratispardhinoḥ saṅgrâmam sûcayantî âha: *prasiddha* iti.

Çl. 1. *ayam* ity anena 'uktam *panthânam* viçadayati: *yataḥ*, iti. *vairât sambhavaḥ* utpattir yasya, etâdṛiço yaḥ *krodhaḥ*, sa *jñâtînâm açesham samastam kulam nirdahati*. tatra dṛishṭântaḥ: *ghanaḥ* pracaṇḍo yaḥ *pavano* vâyuḥ, tena *âhatâḥ* âṇḍolitâḥ ye *taru-varâḥ* sthûla-vṛikshâḥ, teshâm *saṅghaṭṭanena* saṅgharsheṇa *sambhavo* janma yasya saḥ, tâdṛiço *dahano* agniḥ *vanam iva nirdahati*, ity arthaḥ. uktam hi Mahâbhârate:

> dhûmâyante vyapetâni, saṁhatâni jvalanti ca,
> ulmukâni 'iva bhânti sma jñâtayo, Bharatarshabha! iti.

(K. vaira-sambhavaḥ krodho jñâtînâm açesham kulam nirdahati, ghana-pavanena âhatayos taru-varayoḥ saṅghaṭṭena sambhavo yasya, tâdṛiço *dahano vanam iva.)*

Z. 12. *sodarâṇâm* bandhûnâm *vyasanam* maraṇam, tasmâj *janma* yasya, saḥ. *çoka* eva *analo* agniḥ, *viveka* eva *jaladharâḥ* meghâḥ, teshâm *çatâni*, taiḥ. — *(K. viveka-jaladharâ* iti viveko 'tra çokasya kartavyâkartavyatva-vicâraḥ.*)*

Çl. 2. etad eva spashṭayati: *dhruvam*, iti. *jalanidhayaḥ* samudrâç ca, *mahî* ca, *çailâḥ* parvatâç ca, *sarito* nadyaç ca, tâsâm sthirâṇâm api *dhruvam* niçcayena *dhvaṁso bhâvî* bhavishyati; *ato* hetoḥ *çrayat* truṭitam yat *tṛiṇam*, tadvat *laghushu* atituccheshu *jantushu* prâṇishu *mṛityoḥ* maraṇasya *kâ kathâ* kim vaktavyam, ity arthaḥ. *tathâpi* evam viveke jâte 'pi *uccaiḥ*

atiçayena, *ko 'py* anirvâcyah *vishamo* asahyo, *vivekañ prakarshena 'unmathnâti* nâçayati, tâdṛiçah *bandhûnâñ vyasanena* nidhanena *janitah çoka* eva *dahano* agnih *hṛidayañ* ceto *dahati.* — *(K. jalanidhy-*âdînâm api *dhvañso dhruvañ bhâvî, ahoratrañ* pratikshanañ *çiryat-tṛina-laghushu jantushu kâ kathâ?* teshâñ dhvañsah sutarâm eva, ity arthah. *tathâpi ko 'pi vishamo bandhu-vyasana-janitah çoka-dahana uccair hṛidayañ dahati;* kîdṛiço: *viveka-pronmâthi.)*

P. 83.

Z. 1. kâmâdi-badhasya nâtye pratyakshatah kartuñ açakyatvât Çraddhâmukhena tañ sûcayati: *yena,* iti. *kathâ* vârtâ, saiva *çesho* avaçishta-bhâgah, tasya bhâvas, tâñ *gateshu* prâpteshu, mṛiteshu, ity arthah. — *(K. tathâprakṛiteshu* iti, durvṛitteshu, ity arthah.*)*

Çl. 3. *krûrah* asahyah *çokâgnih, ûrdhvâh çikhâh* yasya udara-pûrakatvât *ucchikho, me* mama *marmâni nikṛintati iva* chinatti iva, *dehañ çoshayati iva, antarâtmânañ* mano *dahati iva,* ity arthah. — *(K. krûra ucchikha* udgata-çikhah *çokâgnir marmâni nikṛintati iva.)*

Z. 5. kâmâdi-badhañ pûrva-sûcitañ prakatayituñ Vishnubhakteh praveçañ sûcayati: *âdishtâ* ity-âdi. *vishnubhaktir* nâma pratyak-ceto-vṛittih. *hiñsâ-prâyo* badha-pradhâno yah *samarah* sañgrâmah, tad-*darçanena parâñmukhî* udâsînâ. *Çâlagrâmâbidhâne* cakratîrthe *Bhagavato* Vishnoh *kshetre. atipâlayâmi* atikramâmi. *yathâ-vṛittañ* yena prakârena jâtañ "vṛittântam" iti çeshah. *yatra* cakratîrthe *sañsâra-sâgarasya* samudrasya *uttâre* pâragamane *taranih* naukâ jñâna-rûpâ, tasyâh *karnadhâro* niyâmakah. *mahâ-munibhih* Nârada-Çuka-Parâçarâdibhih *upâsyamânâ* sevyamânâ. *upâsyamânâ* ity anena 'idam uktañ, yan nânâvidhâ bhaktir eva paramârtha-sâdhanam upâyântarañ nâsty eva, kalau vikshipta-manasâñ tu sutarâñ bhaktyaiva aneke santîrnâh. tathâ 'uktañ:

Vishnos tu çravane Parîkshitir abhût, Vaiyâsakih kîrtane,
Prahlâdah smarane, tad-añghri-bhajane Lakshmîh, Pṛithuh pûjane,
Akrûras tv abhivandane, Kapipatih dâsye ca, sakhye 'rjunah,
sarva-svâtmani vedane Balir abhût; kaivalyam eshâñ padañ;

iti. — *(K. vatse* ity-âdi Vishnubhakty-âdeçânuvâdah. *tad aham* ity âdikañ tu Çraddhâyâh parâmarçah.*)*

Z. 18. *sâmparâye* sañgrâme. *abhiyuktasya* tiraskṛitasya. *duhsthitam iva* sacintam iva *me* mama *hṛidayañ* mânasañ.

P. 84.

Z. 4. *niyatam eva* niçcitam eva.

Çl. 4. *yady api prâyo* bâhulyena *abhyudayo* bhâgyotkarshah *pramânâd* dharma-pakshapâtitvâd *avadhâryate* nirnîyate, *tathâpi kâmam* atyarthañ *suhṛidâñ mânasam anishtâçañki* anarthâçañki, ity arthah.

Z. 15. *etah-padañ* antahkaranañ rûpañ sthânañ.

P. 85.

Z. 1. Moha-Vivekayoḥ saṅgrâmam anuvarṇayishyan Vishṇubhakti Çraddhayoḥ praçnottare avatârayati: *devyâñ* Vishṇubhaktau *Ildikeçavâyatanât* Gaṅgâvaraṇâ-saṅgamât *apakrântâyâñ* cakratîrthañ prati gatâyâm *eva*. *bhagavati bhâsvati* atisannarthe çrî-sûrye. kidṛiçe bhâsvati: *kiñcid utsṛishṭaḥ* tyaktaḥ *pâtalimâ* çvetaraktimâ yena tasmin. *teshâñ* Mahâmoha-pakshe vartamânânâñ, *asmâkañ* Viveka-pakshiyâṇâñ *sainya-sâgare* sainya-samudre *sannaddhe* saunâha yukte sati, *mahârâjena* Vivekena, *mahârâja* *Mahâmohasya*, iti karmaṇi shashṭhî, tañ prati *naiyâyikañ darçanañ dautyena*, dûtasya karma dautyañ, tena *prahitañ* preshitam, iti sambandhaḥ. kidṛiçe sainya-sâgare: *vijaya-ghosheṇa* vijaya-vâdya-çabdena *âhûyamânâ aneke* bahavo ye *varâḥ* çreshṭhâḥ *virâḥ* yoddhâraḥ, teshâñ *bahalo* yaḥ *siñha-nâdaḥ*, tena *badhiritâḥ* badhirâḥ sampâditâḥ *diçâm antâḥ* yena, tasmin. punaḥ kidṛiçe: *satatañ* nirantarañ *rathâç* ca, *turaga-khurâç* ca, taiḥ *khaṇḍitañ* cûrṇitañ yad *bhû-maṇḍalañ*, tasmâd *ucchalat* ûrdhva-patat yat *vipulañ rajaḥ-paṭalañ* dhûlî-samûhaḥ, tena *antaritaḥ* âchâditaḥ *kiraṇa-mâlî* sûryo yena, tasmin. punaḥ kidṛiçe: *prabalatarañ* yat *karṇatâlâsphâlanañ*, tena *uccalat* yat *kari-kumbha-sindûrañ*, tena *sandhyâyamânâḥ* sandhyâ-tulyâḥ *daça-diço* yena, tasmin. *pralaya*-kâlînâḥ *jaladharâḥ*, teshâm iva *dhvânaḥ* çabdaḥ, tena *bhîshaṇe* bhayânake. - (*K. bhagavati bhâsvati* sûrye *kiñcid utsṛishṭa pâṭala dhâmni* sati, prâtaḥ-kâle, ity arthaḥ. *teshâñ* Mahâmohâdinâñ, *asmâkam ca sainya-sâgare sambaddhe* milite sati, *mahârâja-Vivekena naiyâyikañ darçanañ dautyena prahitañ*, ity anvayaḥ. sainya-sâgare kidṛiçe: *vijaya ghoshaṇayâ âhûyamânânâm aneka-virâṇâñ bahulaiḥ siñha-nâdair badhirikritañ digantarañ* yatra, tâdṛiçe. *santatena ratha-turagâṇâñ khuraiḥ khaṇḍitâd bhû maṇḍalâd uccalatâ* udgachatâ *vipula-râjaḥ-paṭala*-rûpa *paṭena antarita* âchâditaḥ *kiraṇa mâlî* sûryo yatra, tâdṛiçe. *prabalatarasya karṇa* rûpa *tâlasya karatâlasya âsphâlanena uccalatâ* udgachatâ *samada-kari-kumbha-sindûreṇa sandhyâyamânâḥ* sandhyâ-tulyâ *daça-diço* yatra, tâdṛiçe. tathâ *pralaya*-kâlina-*jaladharasya* iva *dhvânaiḥ* çabdair *bhîshaṇe*.)

Çl. 5. dûtena kim uktañ, tad âha: *Vishṇor*, iti. he Mahâmoha! ity adhyâhâraḥ. *bhavân sânugaḥ* anugaiḥ kâma-krodhâdibhiḥ saha *Mlechân* Mlecha-deçân *vrajet* gachet. kiñ kṛitvâ: *Vishṇoḥ âyatanâni* sthânâni Çâla grâma-kshetrâṇi, *saritâñ* Gaṅgâdinâñ *kûlâni* tîrâṇi, *puṇyâḥ* pâvanâḥ *araṇya sthaliḥ* Naimishâraṇya-bhûmiḥ, *puṇyakṛitâñ* yâjñikânâñ *manâñsi*, *apâsya* parityajya, iti sarvatra sambadhyate. *no cen* na gachasi cet, *phetkâravaḥ* phetkâra çabda-yuktâḥ *pheravâḥ* çṛigâlâḥ, *kṛipâṇena* khaḍgena *dâritam* chinnañ *bhavato* yat *pratyaṅgañ*, tasmâd *dhârayâ ksharat* nirgachat yad *raktañ*, tena *sphîtâni* dîptâni *vaktrâṇâñ vivarâṇi* chidrâṇi yeshâñ, tadṛiçâḥ *santu* bhavantu, ity arthaḥ. - - (*K bhavân* Mahâmohaḥ *sânugo* 'nugâmibhiḥ mada mânâdibhiḥ saha *Mlechân vrajet*. kiñ kṛitvâ: *Vishṇor âyatanâni* gṛihâṇi, *saritâñ* nadînâñ *kûlâni*, *puṇyâraṇya sthalîḥ*, *puṇyakṛitâm manâñsi ca apâsya*

tyaktvâ, ity arthaḥ. Mlechân na gachati *chet*, tadà *kṛipâṇa-dârita-bhavat-pratyaṅgât dhârâ-ksharatâ raktena sphîtâç* ca te, *vidirṇa-vaktre vilasat-phet-kâra-yuktâç* ca, iti karmadhârayaḥ, *pheravâḥ* çṛigâlâs tâdṛiçâḥ *santu*, ity arthaḥ.)

Z. 14. *tataç tataḥ* punaḥ punar, ity arthaḥ.

Z. 15. *vikaṭâ* vishamà *lalâṭa-taṭe* lalâṭa-phalake *tâṇḍavitâ* nartitâ *bhru-kutiḥ* bhrûr yena, *Mahâmohena abhihitam* uktaṁ. kim uktaṁ, tad âha: *anu-bhavatv* iti. *durnayo* durnîtiḥ, tasyâḥ *paripâkaḥ, phalaṁ* tasya. *Viveka-hatakaḥ* Viveka-pretaḥ. *pâkhaṇḍâgamâḥ* sugata-cârvâka-yogâcàra-jaina-kâpâlikâdy-âgamâḥ, teshâṁ *pâkhaṇḍa-tarka*-pratipâdakâni *çâstrâṇi*, taiḥ *saha samarâya* saṅgrâmâya *samudyojitâḥ* udyogavantaḥ kṛitâḥ. *atrântare ca* etasminn eva samaye *sainya-çirasi* sainya-mastake.

P. 86.

Çl. 6. *Sarasvatî sahasâ* akasmât *âvir âsît* prakaṭî-babhûva. kidṛiçî Sarasvatî: *vedâç* catvâraḥ; *upavedâḥ* âyurveda-gândharvâdi-çâstrâṇi; *aṅgâni* çikshâ, kalpo, vyâkaraṇaṁ, niruktaṁ, chaado, jyotishaṁ, iti; *âgamâḥ* Nârada-pañcarâtraṁ, Rudrayâmalaka ity-âdayaḥ; *purâṇâni* ashṭadaça Matsya-Mârkaṇḍeyâdîni; *dharmaçâstrâṇi* smṛitayo 'shṭadaça, tâvanty upasmṛitayaḥ Manv-âdayaḥ; *itihâsâḥ* Mahâbhâratâdayaḥ, *âdi*-grahaṇât purâṇa-vahir-bhûtâḥ stotra-kavacâdayaḥ, taiḥ *ucchritâ*-atiçayitâ *çriḥ* çobhâ yasyâḥ, sâ. punaḥ kidṛiçî Sarasvatî: *padmaṁ kare* yasyâḥ, sà. paṭhântare *padmaṁ dhârayati*, iti vâ. punaḥ kidṛiçî: *çaçâṅkena* candramasâ *saṅkâçâ* tulyà *kântir* dîptir yasyâḥ, sâ. — (*K. tato 'smâkaṁ sainya-çirasi sâ* prasiddhâ *Sarasvatî sahasâ âvir âsît*. kidṛiçî: *veda-vedâṅgâdibhir ucchritâ çrîḥ* kântir yasyâs, tâdṛiçî; tadâ *padma-hastâ; çaçâṅka-tulya-kântiḥ*)

Z. 6. *vaishṇavam* aṇv-âtma-vâdinâṁ, *çaivaṁ* pâçupatam çâstraṁ, *sauraṁ* saurâgamaḥ. — (*K. devyâ* iti, Sarasvatyâḥ, ity arthaḥ.)

Çl. 7. *Vâgdevyâḥ purataḥ* agre *samarâya utsukâ* utkaṇṭhà *mîmâṅsâ* pûrvottara-mîmâṅsâ vicâra-pradhânâ bhâṭṭa-prâbhâkara-çâstra-rûpâ *âvir abhavat* prakaṭî-babhûva. kîdṛiçî mîmâṅsâ: *sâṅkhyaṁ* prasiddhaṁ *nyâyo* Gautama-praṇitaṁ çâstraṁ, *Kaṇâdena bhâshitaṁ* vaiçeshikaṁ darçanaṁ, *mahâbhâshyâ-dîni* vyâkaraṇâdini *çâstrâṇi*, taiḥ *vṛitâ* yuktâ, ity arthaḥ. punaḥ kidṛiçî: *sphûrjanto* abâdhitâ ye *nyâyâ* adhikaraṇâni, teshâṁ *sahasraṁ* ta eva *bâhavo* hastâs, teshâṁ *nikaraiḥ* samûhaiḥ *diçaḥ* vaidika-karma-brahma-bodhana-mârgân *udyotayanti* prakaṭayantî. punaḥ kidṛiçî: *dharma* eva *induḥ*, tadvat *kântaṁ* manoharam *ânanaṁ* yasyâḥ, sâ. punaḥ kidṛiçî: *trayî* veda-trayî, saiva *triṇi nayanâni* netrâṇi yasyâḥ, sà. tatra 'utprekshate: *aparâ* dvitîyâ *Kâtyâyanî iva*, tatrâpy etâni viçeshaṇâni yojyâni. — (*K. anantaraṁ Vâg-devyâḥ purataḥ samarotsukâ mimâṅsâ âvir âsît*. kîdṛiçî: *sâṅkhya-çâstreṇa, nyâya çâstreṇa, Kaṇâda bhâshita mahâbhâshyâdi çâstraiç* ca *vṛitâ*; *sphûr jadbhir nyâya sahasra* rûpais tarka rûpair *bâhu vyûhair diça uddyotayantî*;

dharmâtmakeṇdur iva *kântam ânanaṁ* yasyâs, tâdṛiçî *trayî*-rûpâṇi *trîṇi netrâṇi*-yasyâs, tâdṛiçî ca. *aparâ Kâtyâyanî iva* tri-nayanatvât.)

Z. 14. svârasika-virodhinâṁ kathaṁ samavâyaḥ? iti Çântir âkshipati: *aye*, iti. *svabhâva-dvandvinâṁ* svârasika-virodhinâṁ *tarkâṇâṁ* çâstrâṇâm *âgamânâṁ* vedânâṁ; "ced deva-brahmaṇî veditavye, ekam eva 'advitîyam" ity-âdi viruddhârthakatvât; *samavâyo* melakaḥ kathaṁ *sampanno* jâtaḥ?

Çl. 8. samâdhatte: *putri*, iti; *samânânvaya*, iti. *samânânvaya-jâtânâm* eka-vaṅço vedaḥ tasmât *sambhûtânâṁ, paraspara-virodhinâṁ, paraiḥ* sâdhâraṇa-çatrubhiḥ *pratyabhibhûtânâṁ* parâbhibhûtânâṁ *saṅgatiḥ* melanaṁ *çriyaṁ* çobhâṁ *prasûte*. sva-paksha-rakshaṇâya para-pakshâdikshepa, iti lakshyate.—(*K.*. sâṅkhyâdi-çâstrâṇâṁ vedârtha-vyâkhyâna eva *paraspara-virodho*, na tu veda-prâmâṇyâbhyupagame. aveda-prâmâṇyâbhyupagantṛi-*nâstika-paksha-pratikshepâya*, veda-prâmâṇya-sâdhanâya ca sâṅkhyâdi-çâstrâṇâṁ *sâhatyam asty eva*, ity arthaḥ. tattac-châstra-mûlibhûtâgamânâṁ tu tattva-pratipâdanâṅçe 'virodha eva, ity âha: *âgamânâṁ tu*, iti. *vicârayatâṁ* nirṇâyayatâṁ.)

Z. 19. nanu sva-tantra-ṛishi-praṇîtânâṁ bhinna-matâvalambinâṁ darçanânâṁ katham eka-vaṅça-prasûtatvam, ity âçaṅkya 'âha: *yena*, iti. *veda-mûlatvam* eka-vaṅça-prasûtatve vîjam, iti bhâvaḥ. *sâhityam* eva *avirodha* eva. nanu sva-tantra-ṛishi-praṇîtânâṁ çâstrâṇâṁ paurusheyatvâd viruddhârthâbidhâyakatve 'nyatarasya 'aprâmâṇya-prasaṅgâd avirodhe ca 'ubhayasya çâstrârthatvât. upapadyate çâstreshv idaṁ pramâṇam, idam apramâṇam, iti *vicâraṇâ*. apaurusheyâsu 'upanishatsu dve vâ brahmaṇî veditavye: "dvâ suparṇâ sayujâ sakhâyâ" ekam eva 'advitîyaṁ, etad âtmyam idaṁ sarvaṁ, ity-âdi viruddhârthakatvaṁ kathaṁ soḍhuṁ çakyaṁ? bhrama-pramâda-vipralipsâ-karaṇâpâṭavâdi-purusha-doshâṇâm anirûpaṇâd ity âçaṅkya tatra viruddhârthakatvam eva nâsti, ity âha: *âgamânâm* iti. *tattvaṁ vicârayatâṁ tattva* pratipâdakânâṁ tattvam advitîyaṁ brahmâṇḍa-vâkyârtha-rûpaṁ, tad eva sâkshâtkṛitaṁ prayojanaṁ. tathâ ca padârthânâṁ virodhe 'pi vâkyârthasya 'aikatvân, na tatra virodha-çaṅkâçûkam api, iti bhâvaḥ.

P. 87.

Çl. 9. uktam artham âviḥkaroti: *tathâ hi, jyotir*, iti. *tais taiḥ* prasiddhaiḥ *sad-âgamaiḥ* samâcînaiḥ vaidika-parigṛihîtaiḥ âgamaiḥ Nârada pañcarâtrâdibhiḥ *jyotiḥ* brahmaiva *anekadhâ* aneka-prakâraṁ *prastûyate* upâsyate. ke ke prakârâḥ, ity apekshâyâm âha: *brahma*, ity-âdi. *Brahmâ* 'eva tattvam, iti hairaṇyagarbhâḥ, *Acyutaḥ*, iti vaishṇavâḥ, *Umâpatir*, iti çaivâḥ. nanv etâny eva pâramârthikâni tattvâni nânâ santu, kuto virodhaḥ? ity âçaṅkyâte; tad âha: *te te guṇâḥ* rajaḥ-sattva-tamo-rûpâḥ, teshâm *unmîlanâd* âdhikyât brahmety-âdi-saṅjñâḥ, rajasaḥ âdhikyât brahma iti, sattvâdhikyât Vishṇur iti, tamasa âdhikyâd Umâpatir iti; ekasyaiva guṇopâdhikâḥ saṅjñâḥ, na tu vâstavo bhedaḥ, iti bhâvaḥ. kîdṛiçaṁ jyotiḥ: *çântaṁ* râga dvesha-bhiniveça çûnyaṁ. punaḥ kîdṛiçaṁ: *anantaṁ* vastutaḥ, kâlato, deçataç ca, iti

trividha-pariccheda-çûnyaṁ. punaḥ kîdṛiçaṁ: *avyayaṁ* vikâra-çûnyaṁ. *ajaṁ* janma-rahitaṁ: yady apy evaṁ, tathâpi nânâ-çrutibhiḥ Brahma-Vishṇu-Çiva-pratipâdikâbhiḥ nânâtvam eva, na tv aikyam, ity âçaṅkya 'âha: *nânâ*, iti. *nânâ-patha-prasthitaiḥ* nânâ-mârga-pravṛittaiḥ *çruti-mukhaiḥ* upanishat-pradhânaiḥ *asau* aparoksho *jagad-îçvaraḥ*, "yasmâd aparokshâd" iti çruteḥ, *gamyaḥ* lakshaṇayâ bodhyaḥ. abhede dṛishṭântam âha: *vârâṁ* jalânâṁ *pravâhaiḥ jalanidhir iva;* yathâ "nadyaḥ syandamânâḥ samudram astaṁ yânti nâmarûpe vihâya", ity-âdi çruteḥ; tathâ ca Gîtâyâṁ:

ye 'py anyad eva tâ bhaktâ yajante çraddhayâ 'anvitâḥ,
te 'pi mâm eva, Kaunteya, yajanty avidhipûrvakaṁ; iti. —

(*K.* tattva-nirṇâyane 'virodhaṁ darçayati: *tathâ hi, jyotir,* iti. *tais tair âgamaiḥ, çântaṁ* nirvikâraṁ, *anantam* aparicchedyaṁ, *avyayam* anaçvaraṁ, *ajam* anutpannaṁ *jyotis, tattad-guṇânâṁ* sattva-rajas-tamasâm anyatamasya *unmeshaṇâd* âdhikyât *Brahmâ* ity-âditayâ *anekaṁ prastûyate* pratipâdyate, rajo-guṇâdhikyâd Brahmaiva tat, tamo-guṇâdhikyâd Umâpatir eva tat, sattva-guṇâdhikyâd Acyuta eva tad, iti pratipâdyate, ity arthaḥ. *tena* hetunâ *tais tair âgamair* brahma-pratipâdakâgamaiḥ *çruti-mukhais* tattac-chruti-mûlakair *nânâ-pathe* nânâvidhârtha-vyâkhyâne *prasthitair* eko *'sau jagad-îçvaro gamyo, vârâṁ pravâhair jalanidhir iva,* ity arthaḥ.)

Z. 8. *teshâm asmâkaṁ ca kari-turaga-ratha-padâtînâṁ yodhânâṁ* ca vîrâṇâṁ *tumulo* dâruṇaḥ *samprahâraḥ* saṅgrâmaḥ *prâvartata* ajâyata. kîdṛiçânâṁ teshâm asmâkaṁ ca: *nirantaraṁ* nividaṁ *çara-nikarâṇâṁ* bâṇa-samudâyânâṁ yo *dhârâ-sampâta* iva *sampâto* vṛishṭis, tena *upadarçitaṁ durdinaṁ* meghâcchinnam aho yebhyaḥ, teshâṁ. — (*K. parasparaṁ samprahâraḥ pravṛittaḥ,* ity anvayaḥ. *nirantareṇa* niçchidreṇa *çara-nikara-dhârâ-sahasrasya pâtena 'upadarçitaṁ durdinaṁ* vṛishṭir yais, tâdṛiçânâṁ *yodhânâṁ* dhânushkâṇâṁ *kari-turagâdînâṁ ca,* ity arthaḥ.)

Çl. 10. *tatra* saṅgrâme *sravantyo* nadyaḥ *sasruḥ* asravan. kîdṛiçyaḥ sravantyaḥ: *bahalaṁ rudhiram* eva *toyaṁ* jalaṁ yâsu, tâḥ. punaḥ *nividaṁ* ghanaṁ *piçitaṁ* raktam eva *paṅkaḥ* kardamo yâsu, tâḥ. *kaṅkâḥ* pakshiṇaḥ ta eva *raṅkâḥ* dînâḥ prâṇinas, tair *avakîrṇâḥ* vyâptâḥ. *çarair dalitâḥ* jarjarîkṛitâḥ, ata eva *vidîrṇâ* ye *uttuṅgâḥ* uccâḥ *mâtaṅgâḥ* kariṇaḥ, ta eva *çailâḥ* parvatâḥ, tebhyaḥ *skhalita-rayâḥ* çûnya-vegâç ca, tebhyo *vikîrṇa-chatrâṇy* eva *haṅsâs,* ta eva *avataṅsâḥ* bhûshaṇâni yâsu, tâḥ. — (*K. tatra* saṅgrâme *bahala-rudhiraṁ* nivida-rudhiram eva *toyaṁ* yâsâṁ, tâdṛiçyaḥ *sravantyo* nadyaḥ *sasruḥ* pravavṛitire. kîdṛiçyo: *nividâni piçitâny* eva *paṅkâ* yâsâṁ, tâdṛiçyaḥ. tathâ *kaṅkâ* eva kshudhârtatvena *raṅkâ* daridrâs, tair *avakîrṇâḥ*; nadyâṁ matsya-bhakshaṇârthaṁ rudhireshu ca tad-bhakshaṇârthaṁ kshudhârta-kaṅka-sthitiḥ. tathâ *çara-dalitâ* bâṇa-chinnâḥ, ata eva *viçîrṇâ* mṛitâ ya *uttuṅga-mâtaṅgâs,* ta eva *çailâs,* tatra *skhalito* yo *rayo* vegas, tena *viçîryanti* bhajyamânâni *chatrâṇy* eva *haṅsâs,* ta eva *karṇabhûshâ* yâsâṁ, tâdṛiçyaḥ; raya-skhalanâdhinâbhighâta-chatra-bhaṅgaḥ.)

Z. 15. atha pàkhaṇḍa-tiraskàram àviṣkaroti: *tasminç ca*, iti. *tasmin* pùrva-nirùpite *atimahati dàruṇe sangràme lokâyatam tantram* çarìràtma-vàdi çàstram, *anyonyam* parasparam *sainya-vimardanàni* sanghaṭṭanàni tair *eva nashṭam;* sarvathà yukti-çùnyam, iti bhàvaḥ. tasya prathamato vinàça-hetum àha: kidṛiçam tantram: *pàkhaṇḍàgamàiḥ* saugata-sautràntika-mâdhyamakâdibhiḥ *agresarì-kṛitam* puraskṛitam. anyonya-vimardane kàraṇam àha: *paraḥ* utkṛishṭaḥ sad-àgama-rùpas tarkaḥ, *aparaḥ* apakṛishṭaḥ pàkhaṇḍàgama-rùpas tarkaḥ, tayor *virodhitayà;* lokàyatà hi bhùta-pariṇàma-rùpa-çarìram eva 'àtmânam urarì-kurvanti, tac ca 'àstikànàm sarveshàm nàstikànàm ca 'anabhimatam, iti virodhaḥ, iti bhàvaḥ. *anyad* iti; *anyad* apy asti çrotavyam, iti çeshaḥ. *pàkhaṇḍa* iti, *sad-àgamàḥ* samìcìnà àgamàḥ veda-mùlàḥ, ta eva 'ativisṛitatvàd *arṇavàḥ*, tat-*pravàheṇa* pramàṇa-paramparà-rùpeṇa *pàkhaṇḍàgamàḥ paryastàḥ* dùre prakshiptàḥ, yato nirmùlàḥ, ity arthaḥ. tad eva 'àha: *saugatà* iti; *saugatàḥ* sugata-praṇìtàḥ àgamàḥ *Mlecha-pràyàn* Mlecha-dharmàkràntàn *janapadàn* deçàn *pravishṭàḥ*, te deçàḥ *Sindhu-Gàndhàràdayaḥ*. *pàkhaṇḍa* iti; *pàkhaṇḍaḥ* ahinsà-màtra-nirata àgnìshomìyàdi-hinsàm api tiraskurvan; çveta-paṭa-siddhàntaḥ *digambaraḥ* sattvàsattva-vàdi kshapaṇaka-siddhàntaḥ; *kàpàliko* bhairava-siddhàntaḥ yatheshṭa-vàdi; *pàmaràḥ* atinìcàḥ, tad-*bahuleshu* tat-pracureshu. *nàstikànàm* vàhyànàm *tarkàḥ* çàstràṇi *anu* paçcàt *teshàm eva àgamànàm* pàkhaṇḍàgamànàm *padam* sthànam *prayàtàḥ* pràptàḥ, ity arthaḥ. — (*K.* yat *lokàyatam çàstram agresarì-kṛitam, paraspara-vimardanair* eva tad *vinashṭam*, ity anvayaḥ; lokàyata-çàstrasya ca paraspara-virodhi-pàshaṇḍàgamànàm mùla-bhùtatvàd agresarì-karaṇam. *teshàm àgamànàm* iti, saugatàdy-àgamànàm, ity arthaḥ.)

P. 88.

Z. 5. (*K. tṛishṇà-dainya* iti, *dainyam* atra yàcamànasya kàtaratà.)

Z. 11. yoga-bhrançam mohasya dṛishṭvà yogibhiḥ samàhita-manaskatayà sthàtavyam, iti jñàpayanti Vishṇubhaktir Moha-vṛittàntam pṛichati: *atha* iti. *vṛittàntaḥ* samàcàraḥ.

Z. 13. *yogopasargaiḥ* yoga-vighnaiḥ *saha nilìno* guptas *tishṭhati, iti* hetor *na jñàyate.*

Çl. 11. uktam nayam upadiçati: *yata* iti. *vidvàn* paṇḍitaḥ *atyàdara-paraḥ* atiçayitàdara-yuktaḥ *sthiràm* niçcalàm *çriyam* sampattim *ìhamànaḥ* ichan, *agneḥ çesham, ṛiṇàt çesham, çatroḥ çesham na çeshayet* na sthàpayet. *anàdara-paraḥ* iti pàṭhe agny-àdi-çesha-sthàpane anàdaravatà na bhàvyam, kim tu tat-parihàre yatnavatà bhàvyam, iti bhàvaḥ. — (*K. paràm çriyam ìhamàno vidvàn agneḥ çesham, ṛiṇàc chesham, çatroḥ çesham* ca *na çeshayed*, ity anvayaḥ.)

Z. 19. vairàgyavato manasaḥ praveçam àha: *atha manasaḥ* iti.

P. 89.

Z. 1. *putra-pautrâdi-marana-janita-çokasya âveço* praveço yasmin, *tena manasâ jîvotsargâya* prâṇa-tyâgâya *vyavasitaṁ* nirṇayaḥ kṛitaḥ.

Z. 3. *smitaṁ* hâsyaṁ. *yady evaṁ syât* mṛiyeta, vishaya-nirmuktaḥ syâd, ity arthaḥ. *kṛita-kṛityâḥ* sampanna-prayojanâḥ. *purusho* jîvaḥ *parâṁ nirvṛittiṁ* paramânandaṁ. *durâtmano* dushṭa-svabhâvasya.

Z. 6. *devyâm* upanishad-rûpâyâṁ *çarîreṇa* liṅgaçarîreṇa *saha na bhavishyati* viraktaṁ bhavishyati. praveçakaḥ upasaṅharati: *tad bhavatu*, iti. *nishkrânte* Vishṇubhakti-Çraddhe.

Z. 11. *(K. vishkambhakaḥ* iti; Çânti-sâhityena tri-prayojyatvât.*)*

Z. 12. *saṅkalpo* mano-vyâpâraḥ.

Z. 13. *datta* prayachata *priyam* ishṭaṁ *darçanaṁ; prativacanam* iti pâṭhe, *prativacanaṁ* pratyuttaraṁ.

P. 90.

Çl. 12. *eshaḥ çoka-jvaraḥ vishâgnivat*, visha-rûpo 'gniḥ tadvat, *visarpati* sarva-çarîraṁ vyâpnoti. *me* mama *çarma* sukhaṁ *marmâṇi* ca *vishâgnivat dahati* jvâlayati. *bhṛiçam* atiçayena *vedanâḥ tanoti* vistârayati. *sarva-kâçaṁ* sarva-chedaṁ yathâ syât tathâ *vapuḥ kashati* vichinnatti. *vivekitâṁ vilumpati* vinâçayati. *hṛidi* manasi *mohaṁ* buddhi-bhraṅçam *unmîlayati* prakaṭayati. *aho* iti chitraṁ *prasabhaṁ* haṭhena *jîvitaṁ grasati* gilati, *çoka-jvaraḥ* iti sarvatra 'anushañjanîyaṁ. — *(K. esha çoka-jvaro vishâgnivad visarpati; dâvâgnivan marma dahati; dṛiḍha-vedanâç* ca *tanoti; vapuç* ca *sarva-kâshaṁ kashati* samantâvayava-kashaṇena vapuḥ kashati hinasti, ity arthaḥ. *vivekitâṁ* ca *vilumpati; mohaṁ ca hṛidi unmîlayati; aho! jîvitaṁ* ca *prasabhaṁ grasati*, ity arthaḥ.*)*

Z. 8. *pravṛittiḥ* pravartikâ veda-vidyâ. *evam-avasthaṁ* mumûrchuṁ.

Z. 10. *yato* hetoḥ *çrutam* âkarṇitaṁ *kuṭumbakânâṁ vyasanaḥ* nidhanaṁ, tena *sañjâto* yaḥ *çokânalaḥ*, tasmâd *dagdhaṁ hṛidayaṁ* yasyâḥ, sâ. *hṛidaya-sphoṭaṁ*, svâṅge dhruvam iti naṁ, *hṛidayaṁ prasphuṭya* vidîrya *vinashṭâ* mṛitâ ity arthaḥ; vairâgye utpanne pravṛittir *naçyati*, iti tâtparyaṁ, anyonyâdya-dharmaḥ.

Çl. 13. sphuṭaṁ pûrvârdhaṁ. he *devi! vidher* daivasya *durlalitaiḥ* dushṭa-vilasitaiḥ yady api *dûrî-kṛitâsi* dûraṁ nîtâsi, *tathâpi mano jîvati 'iti* alam, asambhâvanîyam etat. tarhi jîvane ko hetus? tatra 'âha: hi yataḥ *asavaḥ* prâṇâḥ *durantâḥ* sahasâ na naçyanti. *jîvaty eva manaḥ*, iti pâṭhe, tathâpi mano jîvati; kutaḥ: *asavo durantâḥ* nâçayitum açakyâḥ yataḥ, *ity avehi* jânîhi. — *(K.* he *devi* pravṛitte! *mayâ vinâ tvaṁ svapne 'pi na ramase,* aham api *svâpe 'pi tvayâ rahitaḥ* san *mṛitavad bhavâmi. vidhi-durlalitair dûrî-kṛitâsi aho! manas tathâpi jîvati*, ato *'savaḥ* prâṇâ *durantâ*, *ity avehi.)*

P. 91.

Z. 1. *Sarasvatyâḥ* praveçaṁ darçayati: *tataḥ praviçati*, iti. — (*K. Sarasvati* Vishṇubhakti-prayuktà *vaiyâsiki*, ity arthaḥ.)

Z. 2. *Sarasvati sakhi!* iti sambodhanena yathà Vishṇubhaktis tathà vaiyàsikì Saràsvatì, iti sùcitaṁ, yataḥ svaprayatnavatì. *bhavatâ vidita-pûrvaiva pûrvaṁ viditâ* jñâtà vidita-pùrvà *bhâvânâm* ity atra utpattimatàm, iti çeshaḥ. nanu "càturmàsya-phalasya 'akshayyatvaṁ", iti çruter asiddho hetur, iti chen, na: akshayyatva-çruter guṇârtha-vàdatvàd etat-paratvaṁ tasyàḥ; tad yathà: 'iha karma-jito lokaḥ kshìyate, evam eva 'amutra puṇya-jito lokaḥ kshìyate, iti çruty-antara-virodhàc ca çravaṇa-vidhi-vaiyarthyàc ca hetor asiddhatà asiddhà, iti bhàvaḥ. *pûrvaiva 'anityatâ*, ity atra vijaṁn àha. *itihâse* bhavàni *aitihâsikâni*.

Çl. 14. *Ambujabhuvo* Hiraṇyagarbhaḥ, *sendrâḥ* Indreṇa sahitàḥ *devâḥ*, *asurâç* ca, *Manv-âdyâ* bhùpàlàḥ, *munayo* ṛishayaḥ, *mahî* dharitrì, *jaladhayaḥ* sàgaràḥ, *parâḥ* adhikàḥ *koṭayaḥ* koṭibhyo adhikàḥ asaṅkhyàtàḥ *bhûtvâ* utpadya *nashṭâḥ* nàçaṁ pràptàḥ. alpâyushàṁ nàçe kà parivedanà? ity àçaṅkya 'àha: *kalpa-çatâyushâm* iti, *kalpânâṁ çatâni âyur* yeshàṁ, te tathà; *kalpo* yuga-catushṭayaṁ, *çata*-çabdo asaṅkhyàta-vàcanaḥ. evaṁ ca sati, *bandhoḥ* putrâdeḥ *vapushi* dehe *phena-same* budbuda-sama-samaya-jìvite *pañcâtmake* pàñcabhautike *pañcatâṁ gate* maraṇaṁ pràpte sati, *yad udayate* utpadyate, ity *ayaṁ lokasya çokâvegaḥ* çoka-janako *mahân* anivàraṇìyaḥ *ko mohaḥ? aho* ity àçcarye; na ko 'pi, ity arthaḥ. — (*K pañcâtmake* pṛithivy-àdi-mahâbhûtâtmake *sindhoḥ phena-same vapushi pañcatâṁ* maraṇarûpatàṁ pratyekam pañcatàṁ *gate* sati, *aho yad* yasmàt *lokasya çokâvaho moho mahân udayate*, ataḥ *ko 'yam* anucita-hetukatvàd anirvacanìyaḥ, iti yàvat. Brahmâdìnàm api nàçàc choko 'nucitaḥ, iti pratipàdayati: *bhûtvâ* iti. *Ambujabhuvo* Brahmàṇaḥ, *sendrâ devâsurâ*, *Manv-âdayo munayaç ca kalpa-çatâyusho bhûtvâ, mahî jaladharaç* ca *parâḥ koṭayaḥ* koṭy-adhikà *nashṭâḥ*, ato vinàçishu bhàveshu çokânaucityaṁ, ity arthaḥ.)

Z. 12. çrutam arthaṁ sthiri-kartuṁ punaḥ punar anusandhehi, ity upadiçati; *tad* iti bhàvanàyàḥ phalam àha: *nitya* iti. *nityaṁ* Brahmaiva, anyat sarvam *anityaṁ*, etad-dvaya-*darçanaḥ*; yad và: *nityaṁ* nirantaram *anityasya* naçvarasya prapañcasya yad *vastu* adhishṭhànaṁ Brahma, tad yaḥ *paçyati*, saḥ *çokâvegaṁ* saṁsàraṁ *na paçyati*, ity arthaḥ. yato 'nyad anyad iva paçyan mubyati ekatvam anupaçyatàṁ ko mohaḥ kaḥ çokaḥ? ity-àdi çrutibhir apy udìritaṁ.

Çl. 15. uktam artham upanishadà 'àràdhaṁ karoti: *ekam* iti· *yadi* yadi *ekaṁ* nirasta-sad-dvitìyaṁ *Brahmaiva satyaṁ*, *itarat* Brahmâṇyat *vikalpitaṁ*. anirvacanìyaṁ sad-bhinnatvam eva 'anirvacanìyatàyà lakshaṇaṁ, tayà ca brahmâṇyasya mithyà bhùtasya pràtìtikasya naçvaratvàt *ekatvam* eva pàramàrthikam *anupaçyataḥ* samyagtayà jànataḥ tava *ko moho?* na ko 'pi, ity arthaḥ; mohâbhàvàt *kaḥ çokaḥ?* na ko 'pi, ity arthaḥ. evaṁ ca

sati ante brahma-bhâvanayâ brahmaiva bhavati; sansâry-âdi-bhâvanayâ 'ante sansâry eva bhavati, uktaṁ, Gîtâyâm (VIII, 6):

"yaṁ yaṁ vâpi smaran bhâvaṁ tyajaty ante kalevaraṁ,
"taṁ tam eva 'eti, Kaunteya, sadâ tad-bhâva-bhâvitaḥ."

hetoḥ çokâveçe svîyaṁ mano na 'arpaṇîyaṁ. arthât cet tadâ sansâry eva çokâd anirmukta eva syâd, iti bhâvaḥ. — (*K.* nityânitya-darçanam upapâdayati: *ekam* iti. *yadâ ekam eva brahma satyam, anyat tu vikalpitaṁ* vikalpavaçât siddham asatyaṁ, ity arthaḥ; tadâ *ekatvam anupaçyato* janasya *ko mohaḥ, kaç ca çokaḥ?*)

Z. 16. *Bhagavati*, iti Sarasvatîṁ sambodhayati; *he bhagavati* Sarasvati! *çokâvegâd dûshite me* mama *manasi viveko 'vakâçaṁ na labhata* eva, iti yojanâ. — (*K. viveka eva* iti, *viveko* vicâraḥ.)

P. 92.

Çl. 16. snehasya 'anarthe hetutvaṁ prakaṭayati: *tathâ hi*, *upyante* iti. *naraiḥ* manushyaiḥ *priyâkhyâḥ* priyâ ity âkhyâ yeshâṁ putrâdy-abhilâshâṇâṁ, te priyâkhyâḥ, nâmnaiva priyatvaṁ, na svarûpataḥ. ta eva vastutaḥ *kleçâḥ* â utpatter â maraṇam iti kleça-janakatvât sansâra-hetutvâc ca te *upyante* âropyante. kîdṛiçâḥ kleçâḥ: *visha-valli-vîjaṁ* visha-kandaḥ, tadvad *vishamâḥ* duḥsahâḥ; *tebhyaḥ* abhilâshebhyaḥ *na cirât* jhaṭiti *snehamayâḥ* sneha-rûpâḥ *vajrâgni-garbhâḥ* vajrâgnivat *garbho* yeshâṁ, te ca te *ankurâç* ca dâru-cheda-pâṭâdi-samarthâ *bhavanti*, *yebhyaḥ* snehânkurebhyaḥ *ami* tvayi dṛiçyamânâḥ *çataço* anantâḥ *çoka*-rûpâḥ *drumâḥ* vṛikshâḥ *rohanti* udbhavanti, ity arthaḥ. kîdṛiçâḥ çoka-drumâḥ: *kukûla-hutabhuk-dâhaṁ*, *kukûlaṁ* tusham eva, *hutaṁ* homa-dravyaṁ *bhunakti*, iti *kukûla-huta-bhuk* tushâgniḥ, tad-agni-dâhavad yo *dâhaḥ*, taṁ tadvat; karmaṇi ca 'upamânaḥ, iti ṇaṁ; *çanaiḥ* mandaṁ mandaṁ *dehaṁ* çarîraṁ *dahantaḥ*. tushâgni-dṛishṭânto duḥkhasya cira-pâkitva-sûcanâya, iti bhâvaḥ. punaḥ kîdṛiçâḥ çoka-drumâḥ: *dîptâ* yâḥ *çikhâḥ* duḥkhântara-smṛitayaḥ, tâsâṁ *sahasraṁ çikharâḥ* agrabhâgâḥ udbodha-rûpâḥ yeshâṁ, te. — (*K. narair visha*-rûpa-*vahner* yad *vîjaṁ*, tadvad *vishamâḥ priyâkhyâḥ* priyajana-nâmânaḥ *kleçâ upyante* âropyante, ity arthaḥ. *tebhyaḥ snehamayâ vajrâgni-garbhânkurâ na cirâd* acirâd *bhavanti*, *yebhyo* ankurebhyo *'mî çataçaḥ çoka-drumâ rohanti* jâyante. kîdṛiçâḥ: *kukûla-hutabhug-dâhaṁ dahantaḥ*, *kukûlâs* tushâs tadîyâgnivad *dâhena dâhantaḥ*. kîdṛiçâḥ: *dîpreṇa çikhâ-sahasreṇa vishamâḥ.*)

Z. 6. *sâdhu sampannaṁ* samyag jâtaṁ, ity arthaḥ.

Z. 7. *paraṁ* sthûlaṁ *akṛityam* akâryaṁ; kiṁ tad? ity âha: *yad* iti. *vyavasâyaḥ* udyogaḥ sva çarîra-tyâgenâpi dadhîvivat sâdhushu 'upakartavyaṁ, ity âçankya ity âha: *api ca* iti. *apakâriṇâṁ* nirantara-duḥkhakarâṇâṁ. *bhavato* manasaḥ *ko 'yam atyâvegaḥ* âdaraḥ, ity eshâ yojanâ.

Çl. 17. *ete parigrahâḥ* putra-kalatrâdayaḥ *tava sukhâya na bhavanti*, mama sukhâya mâ bhavantu, anyeshâṁ *puṅsâṁ* putra kalatratvâd eva sukhadâyakâ bhavishyanti, ity âçankya 'anyeshâm api puṅsâṁ na ebhyaḥ ko 'py upa-

kâraḥ, ity ata âha: *amîbhiḥ kvacit* kutrâpi *puṅsâm upakṛitir* upakâraḥ *kartâ* karishyate, *kṛitâ vâ, atha kriyate vâ;* na kvâpi kâlatraye 'py upakurvanti, iti sukha-hetavo 'pi na bhavanti, iti bhâvaḥ. nanu "putrâdînâṁ lâlanâdau brahmânando 'nubhûyate" iti vadanti putriṇaḥ, tat kathaṁ putrâdînâṁ na sukha-janakatvaṁ? ity âçaṅkya 'âha: *dadhati,* iti. *virahe* viyoge *marma-chedaṁ dadhati* pushṇanti; yady apy evaṁ *tad api* tathâpi, *aho* âçcarye, *jantavo vipulâḥ* bahavaḥ *âyâsâḥ* çrâmâḥ yeshâṁ te, *tad-arthaṁ* tat-prayojanâya *apârthakaṁ, vata* iti khede, *sîdanti* duḥkhitâ bhavanti. — (*K. amîbhiḥ* putra-pautrâdibhiḥ *kvacid upakṛitiḥ kâryâ* karishyamâṇâ, *kṛitâ, athavâ kriyate,* na hi naiva, ity arthaḥ. *ete parigrahâḥ* putrâdi-bândhavâḥ *puṅsâṁ sukhâya na hi bhavanti,* puṁâṅsas teshâṁ parigrahâṇâṁ *virahe* sati, *apârthakaṁ* nirarthakaṁ *tad-artham* âtmano *marma-chedaṁ dadhati* bibhrati, *tad api* tathâpy amî *jantavo, aho* âçcaryaṁ, *vata* khede, *sîdanti,* ity arthaḥ.)

Çl. 18. api ca ete çoka-yogyâ eva na bhavanti upakâritvâd, ity âha: *api ca, tîrṇâḥ,* iti. *etaiḥ pâpaiḥ kim iva duritaṁ kârito 'nâsi,* kiṁ tu sarvaṁ duritaṁ *kashṭaṁ* kârita eva. kashṭam eva 'âha: tvayâ upayâcitaṁ kṛitvâ *pûrṇâḥ* varshâ-kâlînâḥ *sarito* nadyaḥ *kati* kiyat-saṅkhyâ na *tîrṇâḥ?* api tu bahyas tîrṇâḥ, ity arthaḥ. *ke çailâh na laṅghitâḥ* na 'âkrâṇtâḥ? api tu sarve. *krûrâṇâṁ* vyâghrâṇâṁ *sañcâreṇa ghorâ* bhayânakâḥ *vanabhuvo* araṇyasthalyaḥ *kati* kiyantyo *na 'âkrântâḥ?* api tu sarvâ eva. kârite 'py etâvaty anarthe *yato* asmât kâraṇât *dhana-madaḥ* lakshmî-garvaḥ, sa eva *mashi,* tad-yuktâni ata eva *mlânâni* çushkâṇi *vaktrâṇi* yeshâṁ, te *duriçâḥ* dushṭa-prabhavaḥ *kashṭaṁ* yathâ syât tathâ *dṛishṭâḥ.* evaṁ ca kâmâdibhyo virajitavyaṁ, iti bhâvaḥ. — (*K.* mano-viçishṭa-purushatvenaiva manaso 'dhyâsât taṁ purushaṁ praty eva 'âha: *tîrṇâ iti. ebhir* lobhâdibhiḥ *pâpair* durvṛittaiḥ *kim iva duritaṁ kârito nâsi? kim iva* ity atra *iva*-çabdaḥ saṁbhâvanâyâṁ. *yad* yasmâd *dhana-madena masîvan mlânaṁ vaktraṁ* yeshâṁ, tâdṛiçâ *duriçâs te* prasiddhâḥ *kashṭaṁ* yathâ syât tathâ *dṛishṭâḥ;* teshâṁ darçanam api nâtiprayâsaṁ vinâ 'iti darçayati: *tîrṇâ* iti. arthâd dhaninâṁ sânnidhyâya *pûrṇâḥ kati sarito na tîrṇâs* "tvayâ" iti çeshaḥ; *ke çailâ na laṅghitâḥ, krûrâṇâṁ* vyâghrâdînâṁ *sañcareṇa ghorâḥ kati vanabhuvo na âkrântâḥ,* ity arthaḥ.)

P. 93.

Çl. 19. evaṁ vairâgya-hetau saty api, vairâgyaṁ na 'utpadyate, ity âha: *lâlitânâm* iti. *svasmât* sva-çarîrât *jâtânâm* utpannânâṁ bâla-bhâve cumbanâliṅganaiḥ *lâlitânâm,* ata eva *ciraṁ hṛidi sañcaratâṁ vichedo* viyogo *marma-chedâd* api *aruntudaḥ* vyathâ 'atiçayakârî. tatra dṛishṭântaḥ: *prâṇânâṁ vichedo* viyogaḥ sa yathâ *marma chedâd* atipîḍâkaraḥ, tadvad ayam api, ity arthaḥ. — (*K. sva-jâtânâṁ* svasmâj jâtânâṁ putrâdînâṁ *vichedo marma chedâd* apy adhiko *'runtudaḥ,* ity arthaḥ. kîdṛiçânâṁ: *ciraṁ hṛidi sañcaratâṁ* vakshasy âropitânâm, ity arthaḥ.)

Z. 3. *mamatá* madîyatvâbhimânah, tasya *vásaná* sarva-kâlam anuvřittih, 'saiva *nibandhanam* kâranam yasya, sah.

Çl. 20. mamatâ-sambandhâd eva duhkham, ity asminn arthe sammatim âha: *uktam ca, mârjâra,* iti. *mârjâra-bhakshite griha-kukkute* svagriha-poshita-kukkute, *yâdřiçam duhkham, tâdřik* tâdřiçam *kalavińke* cataka *mamatá-çúnyé múshake ca mârjâra-bhakshite na* duhkham mamatâ-çûnyatvât; tasmân mamataiva duhkha-hetur, iti bhâvah. — (*K. griha-kukkute* griha-poshita-kukkute *mârjârena bhakshite* sati *yâdřiçam* duhkham, *mamatâ-çûnye kalavińke* catake *'tha vá múshike mârjârena bhakshite* sati *na tâdřiçam duhkham*, ity arthah. *atha* ity athavâ, ity arthah.)

Z. 7. evam sati mamatoccheda eva yatnah kâryah, ity âha: *tât* iti. *sarve 'pi anarthá* yasmâd, asau *sarvânarthah* snehah, tasya *vîjam* kâranam, tâdřiçasya *mamatvasyá 'ucchede yatnah kâryah*, ity arthah.

Çl. 21. vicârâdhîno mamatvocchedah, iti darçayati: *paçya, prâdur* iti. *vapushah* çarîrât *kati* kiyanto *vá kîtâh* yûkâdayah *na prâdur bhavanti* na 'utpadyante? api utpadyanta eva. *yân* kîtân *tanoh* çarîrât *khalu* niçcayena *yatnato* yatna-pûrvam *apasârayanti* nishkâçayanti. *eshah jagato* viçvasya *mohah kah, yat teshâm* sva-çarîrotpannânâm *apatya-sañjñám vidháya* křitvâ *sva-deham pari* samantât *çoshayati*. yûkâdau sva-dehotpanne 'pi mamatâbhâvân na deha-çoshah, putre mamatâbhimânasya satvâd deha-çoshah, ity arthah, ko mohah, iti bhâvah. — (*K. çarîrát kati vá kîtá na prâdur bhavanti, yân* kîtâns *tanoh* çarîrâd *yatnato 'pasârayanti,* tasmâj *jagatah ko 'yam moho, yat teshâm apatya-sañjñâm vidhâya* tad-viyoge *sva-deham pariçoshayati,* ity arthah.)

Z. 12. *mamatva-granthih* mamatvâbhimânah.

Çl. 22. mamatva-grantheh durucchedyatvam prakatayati; *tathâhi* iti. *avadhârayatu* sâvadhânâ bhûtvâ manasi *dhârayatu*, vismaranam mâ bhavatu, ity arthah. *niranta* iti. *jantor* jîvasya *mamatva*-rûpo *pâçah*, tasya *yata* upâyâd *vimokshah* tyâgah, tam *upâyam*, he *bhagavati*, tvam *kiñcid jânâsi*, "tarhi vada" iti çeshah. kîdřiçasya mamatva-pâçasya: *nirantaram* anavaratam yo *'bhyâsas*, tena *dřidhi-křitasya*. punah kîdřiçasya: *snehena saha* vartante, iti *sasnehâh* antahkarana-vřittayah, tâ eva *sûtrâni*, tair *grathitasya* grathitasya. — (*K.* he *bhagavati! yato* yasmâd upâyâj *jantor mamatva pâçasya vimokshas*, tam *upâyam jânâsi?* api tu jânâsi iti çiraç-câlanâd gamyah praçnah. mamatva-pâçasya kîdřiçasya: *nirantarâbhyâsena* matatânuçîlanena *dřidhikřitasya*, *tat-sneha-sûtra-grathitasya* mamatva-pâtra-vishaya-sneha-rûpa-sûtra-nirmitasya.)

Z. 18. *anityatâbhâvanam eva* anityatâvadhâranam eva *prathamo 'bhyupâyah* mukhyo hetuh.

P. 94.

Çl. 23. yat yasmâd hetoh *tava asmin mahati vitate* vistîrne *samsâre kotayah* koti saṅkhyakâh *pitâdayo na gatâh?* kim tu gatâ eva; *dhârâh*

striyaḥ, *pitṛivyâḥ* pitṛi-bhrâtaraḥ, *putrâḥ*, *pitâmahâç* ca, te api kiñ na gatâḥ? kiñ tu gatâ eva, iti sambandhaḥ. *tat* tasmâd hetoḥ *iha jagati suhṛidâñ* bandhûnâñ *vidyut-pâtavad ujjvalân* dâruṇatayâ prakâçamânân *kshaṇañ* kshaṇa-mâtram eva *saṅgamo* yais tân, *hṛidaye* 'ntaḥkaraṇe *bhûyo bhûyaḥ* punaḥ punaḥ *niveçya* avadhârya niçcitya, *sapadi* tatkshaṇam eva *sukhibhava*, ity arthaḥ. — (*K. vahati* dhârâ-vâhike *vitate 'smin saṅsâre tava koṭayo janakâdayo mṛitâs, tasmâd iha* saṅsâre *bhûyo bhûyo* vârañ vârañ *suhṛidaḥ* putrâdîn *vidyut-pâtavad ujjvalân kshaṇa-saṅgamân hṛidaye nidhâya sukhîbhava.*)

Z. 5. manda-buddhayaḥ pitṛi-prabhṛitishu vyartham udara-tâḍanañ yathâ santâpam anubhavanti, vidushâñ punar evam asâre saṅsâre atyanta-kaṭu-pariṇatau jñâte vairâgyam eva 'âvir bhavati; iti bhavân apy evam adyâpi saṅsâra-cakra-kaca-sambhramâd bambhramati, ity âçcaryam iva me bhavati, ity âçaṅkya 'âha: *bhagavati* iti.

Çl. 24. moha-çesho mâm adyâpi na muñcati, ity âha: *kim tu*, iti. he *bhagavati! tava mukham* eva *çaçadharaḥ* candraḥ, tasya *dîdhitayaḥ* kiraṇâḥ, tebhyo *galitâḥ* nisṛitâḥ *vimalâḥ* nirmalâḥ *upadeçâ* eva *piyûshâṇi* amṛitâni, taiḥ *me* mama *hṛidayañ* manaḥ *kshâlitam api* âtmâvabodha-yogyañ sampâditam api, *çokormibhiḥ* laharîbhiḥ *malinañ kriyate* âvriyate. aho asambhâvanâ viparîta-bhâvanâ saṅskârâḥ balavattarâḥ, ity arthaḥ. — (*K. tava* ity âdi. *galitair vimalopadeça*-rûpaiḥ *piyûshair* amṛitaiḥ *kshâlitam api hṛidayañ, çokormibhiḥ* punar *malinañ kriyate*, ity arthaḥ.)

Z. 8. *ârdrasya* nûtanasya *çoka* eva *prahâraḥ*, tasya.

Çl. 25. *munibhir upadishṭañ* mârgam upadiçâmi, ity âha: *akâṇḍa* iti. *nakâṇḍa-pâtaḥ* bâṇa-prahâro yatra, tathâ *jâtânâm* utpannânâm *ârdrâṇâm* abhinavânâñ *marma-bhedinâm* ativyathâ-kâriṇâm, etâdṛiçânâñ *gâḍhâḥ* dṛiḍhâḥ punaḥ punaḥ smârakâḥ ye *çokâ* eva *prahârâḥ*, teshâm *açintaiva* asaṅkalpa eva *mahaushadhiḥ*, na 'anyâ, ity arthaḥ. — (*K. akâṇḍa-pâto* 'kasmâç chokasya nimittopasthitis, tena *jâtânâñ gâḍha-çokâtmaka-prahârâṇâm*, ity arthaḥ.)

Çl. 26. *etac ceto* mano *vâritañ* nivâritam *api*, *cintâ-santânaiḥ* cintâ-paramparâbhiḥ *abhibhûyate* parâbhûyate. tatra dṛishṭântaḥ: *abhra-chedaiḥ* megha-paṭalair, indor idam *aindavañ* cândramasañ *bimbam iva*. kidṛiçair abhra-chedaiḥ: *muhur* vârañ vârañ *vâtena â* samantât *hṛitaiḥ* nîtaiḥ, câlitair, ity arthaḥ.

Z. 16. *çânte vishaye* çoka-mohâdi-rahite *niveçaya* praveçaya.

Z. 18. *guhyañ* guptañ. *ârtânâñ* moha-çoka-pîḍitânâm *upadeçe na doshaḥ*, iti.

P. 95.

Çl. 27. kiñ upadiçati: *nityam* iti. he manaḥ tvam! ity adhyâhâraḥ. *astuḥ* sarvathâ kâla traye 'pi *çokaḥ* saṅsâra-kâraṇībhûtañ duḥkhañ yasmin, tâdṛiçañ *Brahma*, *vâ* evârthe, brahmaṇiva *praviçya* advitîyatvena jñâtvâ;

"dvitîyâd vai bhayaṁ bhavati," iti çruteḥ. "bhayaṁ dvitîyâbhiniveçâtaḥ syâd," iti çrî-Bhâgavatâc ca. âtmâne hitâ *âtmanînâ* tâṁ *nirvṛitiṁ* parama-sukhaṁ *bhaja* prâpnuhi. tatra dṛishṭântaḥ: *grîshme suçîtaṁ hradam iva;* yathâ caṇḍâṅçu-kara-santaptaḥ çîtaṁ tadinihradaṁ praviçya sukham anubhavati, tathâ saṅsâra-tapto 'brahma praviçya tat-sukham anubhavati, ity arthaḥ. nirguṇe nirâkâre nirvishaye kathaṁ manasaḥ pravṛittir? ity âçaṅkya âdau sâkâre pravṛittiḥ sukarâ, ity âha: kiṁ kurvan san: *jalada-nîlaṁ* ghana-çyâmam, *udâro* amûlyo yo *hâraḥ, keyûraṁ* bâhvor bhûshaṇaṁ, *kuṇḍale* karṇa-bhûshaṇe, *kirîṭaṁ* mukuṭam, etâni *dharati,* iti taṁ *Hariṁ*, *harati* saṅsâram ajñâna-tat-kâryam asau *Hariḥ*, taṁ *nityaṁ smaran;* sâkâra-smaraṇânantaraṁ nirâkâre manasaḥ sukha-praveçaḥ, iti bhâvaḥ. yathâ nûtano dhanurdharaḥ sthûlam api lakshyaṁ lakshî-kartum açaknuvânâḥ, abhyâsa-paripâka-vaçât keçântara-prota-varâṭikâṁ lakshî-karoti, tadvad, ity arthaḥ. — (*K.* nirantaraṁ çarîra-viçishṭeçvara-bhâvanâ yogânudhyânaṁ vâ iti sâṅsârikaṁ duḥkhocchedasya 'upâya-dvayaṁ, tad-dvayam ardha-dvayena 'âha: *nityam* ity-âdi, *grîshma* ity-âdi ca. *jalada*-ity-âdi viçeshaṇa-viçishṭaṁ vâ *Hariṁ nityaṁ* tvaṁ *smareḥ. astaḥ çoko* yasmât, tâdṛiçaṁ *brahma* yogânuçîlanât *praviçya vâ, âtmanînâm* abhedena 'âtma-sambandhinîṁ *nirvṛitim* ânandaṁ *bhaja; grîshma-kâle çîtaṁ hradaṁ praviçya 'iva* brahmaṇa ânanda-svarûpatvena 'ânandasya 'âtmanînatvaṁ.)

Z. 5. *sarvathâ* sarva-prakâreṇa.

Z. 7. vairâgya-praveçam upakshipati: *vatsa* iti. *upadeça-sahishṇu* upadeça-grâhi *aparam* uktâd anyat.

Çl. 28. *pitari* janake, *tanaye* putre, *suhṛidi* sambandhini *vâ mṛityoḥ* maraṇasya *vaçam* adhînatvaṁ *prâpte* sati mṛite sati, *jaḍa-dhiyo* manda-matayaḥ *udara-tâḍam* udaraṁ santâḍya *alam* atyarthaṁ *çucâ* çokena atiçayita-çokena *bhṛiçam* atyarthaṁ *tapyante; çucâ santapyante,* ity pâṭhaḥ 'sugamaḥ. *'tu* punaḥ *viyogaḥ* putrâdibhiḥ saha ity arthât *vidushâṁ* jñâninâṁ *çama-sukhaṁ vitanvan* vistârayan, *asâre* niḥsâre, *virasaḥ* kaṭuḥ *pariṇâmaḥ* phalaṁ yasya, tâdṛiçe *saṅsâre vairâgyaṁ dṛiḍhayati.* — (*K. jaḍa-dhiyo* janâḥ *pitr âdau mṛityor vaçaṁ prâpte* sati, *udara-tâḍam* udaraṁ tâḍayitvâ, *çucâ santapyante, vidushâṁ tu* teshâṁ pitr-âdînâṁ *viyogo-vairâgyaṁ dṛiḍhayati.* viyogaḥ kîdṛiçaḥ: *çama-sukhaṁ* çânti-sukhaṁ *vitanvan.*)

Çl. 29. *prajânâṁ patiḥ* dhâtâ *etad vapuḥ* çarîraṁ *tvaṅ-mâtreṇa* tvacâ mâtreṇa *antaritam* âchâditam *âmishaṁ* mâṅsaṁ yasya, evaṁ-bhûtaṁ *yadi punar na asrâkshîd* na 'utpâdayet, tadâ vapushi *nipatato gṛidhrân* mâṅsâçinaḥ pakshiṇaḥ, *dhvâṅkshân* kâkân, *vṛikân* vṛiddha-çṛigâlân, *çunaḥ* kukkurân, *krauñcân* cakrâṅgân, *pratyagraṁ* navaṁ *ksharat* yad *asraṁ* raktaṁ, tena *miçraṁ* militaṁ yat *piçitaṁ* mâṅsaṁ, tasya yo *grâsaḥ,* tasya *grahaḥ* âdânaṁ yatra yasyâṁ kriyâyâṁ yathâ syât tathâ *gṛihṇataḥ* kâṅkshataḥ, *kathaṁ vârayet?* na katham api, ity arthaḥ. tvaṅ-mâtrâchâdanam eva gṛidhrâdi-nivâraṇe hetur, ity arthaḥ. kîdṛiçaṁ vapuḥ: *navaṁ nîlaṁ* yat *nîrajaṁ* nîlotpalaṁ, tasya *dalaṁ,* tasya *upânto* agra-bhâgaḥ, tadvad *atîkshṇam* atiko-

malaṁ. — (K. vairâgyam utpâdya çarîrasya bîbhatsatayâ vairâgya-hetutvaṁ darçayati: asrâkshîd iti. *prajânâṁ patir etad vapur yadi nava-nîla-nîraja-dalasya* ya *upântas*, tadvad *atisûkshmeṇa* 'âyatena *tvan-mâtreṇa* carma-mâtreṇa *antaritam âmishaṁ* yasya, tâdṛiçaṁ *na asrâkshîn* na sṛishṭavân syât, tadâ *gṛidhra-dhvâṅksha-vṛikâṅs* tanau *nipatataḥ* ko vâ *kathaṁ vârayet? dhvâṅkshâḥ* kâkâḥ, *vṛikâḥ* kshudra-vyâghrâḥ. gṛidhrâdîn kîdṛiçân: *pratyagraṁ* tatkâlaṁ *ksharatâ* carmâvaraṇâbhâvât *sravatâ asreṇa* çoṇitena *miçraṁ* yat *piçitaṁ*, tad-*grâsârthaṁ graheṇa gṛihṇato* mâṅsârthitvât teshâṁ.)

P. 96.

Çl. 30. vairâgya-kâraṇîbhûtaṁ çarîraṁ doshaṁ pradarçya, çarîropakârakeshu doshaṁ pradarçayati: *çriyaḥ* iti. *çriyo* lakshmyâḥ *dolâ* ândolikâ, tadvat *lolâḥ* 'cañcalâḥ' *vishayebhyo jâtâḥ* srag-âdibhyaḥ utpannâ ye *rasâḥ* sukha-viçeshâḥ, te *prânte* samâptau *virasâḥ* vishâda-janakâḥ; *dehaṁ* çarîraṁ *vipadâṁ* vipattînâṁ *gehaṁ* gṛihaṁ; *mahad api* bahv api *dhanaṁ bhûri* bahuprakâraṁ *nidhanaṁ* maraṇaṁ; uktaṁ Câṇâkya-nîtau:

"arthânâm ârjane duḥkham, ârjitânâṁ ca rakshaṇe,
âye vyaye mahad duḥkhaṁ; katham arthâḥ sukhâvahâḥ?"

iti. *loko* janaḥ *vṛihac-chokaḥ* bahu-çokaḥ; *abalâḥ* striyaḥ *satatam* anâratam *anarthaḥ* svarûpa-nindâ-rûpaḥ *bahulo* yâsu, tâḥ. tathâ 'uktaṁ Vishṇupurâṇe:

"amedhya-pûrṇe, kṛimi-râçi-saṅkule,
svabhâva-gandhe 'py, açucau ca, sandrave,
kalevare mûtra-purîsha-bhâjane,
ramanti mûḍhâ, viramanti paṇḍitâḥ;"

iti. *tathâpi* evaṁ saty apy *ghore* bhayâvahe *pathi* saṅsâre *ratiḥ*, iti *bata* mahat kashṭaṁ! ity arthaḥ. paraṁ tu *âtmani na ratâḥ* na âtma-vicâraparâḥ, ity arthaḥ. tathâ 'uktaṁ Hari-vaṅçe:

"adhastâc chidritaṁ carma durgandha-paripûritaṁ,
mûtra-klinnasya tasya 'arthe mâ, râjan, brâhmaṇân vadhîḥ;'

iti. — (K. yady api 'ity arthe *yadâ*, yady api *vishaya-janyâ rasâ lolâlolâvad* vidyudvac cañcalâḥ, *prânte* paryante *virasâḥ*, *dehaṁ dehaṁ* prâpya *vipat*, pratidehe vipad, ity arthaḥ. *guruḥ çoko* yasya *loko* janas tâdṛiçaḥ; aluk samâso 'yaṁ. *abalâ satatam anartha-bahulâ*, *tathâpy asmin ghore pathi* saṅsâra-vâsanâ-rûpe *ghore* duḥkha-hetau *pathi*, *vata* khede, janâ *ratâ*, *na tv âtmani* brahmaṇi *ratâḥ*, ity arthaḥ.)

Z. 5. *sambhâvaya* mânaya.

Çl. 31. *pitâ*, *mâtâ* ca, *bandhuç* ca, *tanayaç* ca, *bhrâtâ* ca, *priyâ* ca, eteshâṁ *saṁyogaḥ*, *sadûra-viyoga eva* viyoga-janya eva; kârya-kâraṇayor abhedât sa viyoga eva, ity uktaṁ; *sadâ* sarvadâ *siddho* yadâ sa viyoga eva, *tadâ vidushâṁ* jñâninâṁ *kaḥ çokodayaḥ?* viyoga-janya saṁyoge dṛishṭântân âha: *vartmani* mârge prâk-pratyak-sañcaratâṁ *panthânâm iva*; *bhraçyatâṁ* bhagnânâṁ *kshitiruhâṁ* tarûṇâṁ *nadyâm iva*, *pushkare* âkâçe virud

dha-vikriya-vâyu-preritânâñ *meghânâm iva; bhrâmyatâñ* iti pâṭhe megha-viçeshaṇañ; *jalanidhau* sâgare *sâñyâtrikâṇâñ* potabaṇijâm *iva*. — (*K. pitr-âdînâñ sañyogo yadâ pânthânâñ vartmani iva, nadyâñ bhraçyatâñ kshitiru-hâm iva, pushkare* gagaṇe *meghânâm iva, jalanidhau sâñyâtrikâṇâñ* baṇijâm *iva, bhûri-viyogaḥ siddho, vidushâñ çokodayas tadâ kaḥ?* ity arthaḥ.)

Çl. 32. *manaḥ adya* idânîñ *tân etân*, *mrigatrishṇikâyâñ* marumarîci-kâyâñ kalpito yo *arṇavaḥ*, tasya *payaḥ* jalañ, tat-*prâyân* tanmayân mithyâ-rûpân pûrva-drishṭatvât *punaḥ paçyati*. etân kân? ity âha: *tâḥ* pûrva-pari-citâḥ *nava-yauvanâs* taruṇyo *nâryaḥ; madhukarîṇâñ* bhramarâṇâñ *vyâhâraḥ* sañcâro yatra, etâdriçâḥ *te* pûrva-paricitâḥ *drumâḥ* vrikshâḥ; *ta eva man-dânilâḥ* vâyavaḥ. kîdriçâḥ vâyavaḥ: *prakarsheṇa unmîlantyo* vikasantyo *navâ* nûtanâḥ *mallikâs*, tâbhiḥ *surabhayaḥ* bahula-parimalâḥ. kîdriçañ manaḥ: *udâttaḥ* svecchâ-pravritto yo *vivekaḥ*, tena *mârjitañ* prochitañ *tamaḥ-stomam* ajñâna-samûha eva *vyalîkam* indriyajâlañ yasya, tâdriçañ, ity arthaḥ. pûr-vañ yathârthatayâ 'nubhûtâ vanitâdayo 'nurâgam utpâdayanti sma, ta eva 'idânîñ mithyâtvena parijñâtâḥ vairâgya-hetavaḥ, iti dhvanitañ. — (*K. adya mana udâtta-vivekena mârjitâ* apasâritâ *tamaḥ-stomâvalî* ajñâna-puñja-çreṇî yatra, tâdriçañ sat *punas tân etân* samprati *mrigatrishṇikâyâm* bhrama-vaçâj *jala-prâyân paçyati* mithyâtvena jânâti, ity arthaḥ. tân etân kân? ity âha: *nâryaḥ*, iti.)

P. 97.

Z. 3. utpanna-vivekasyâpi âçrama-grahaṇam âvaçyakam, ity âha: *vatsa, yady api* iti. *grihiṇâ* grihasthena. *adya-prabhriti* adyârabhya *nivrittiḥ* sukhâ-kârâ vrittiḥ *sadharmacâriṇî*, saha dharmañ carati iti *sadharmacâriṇî* dhar-mapatnî, ity arthaḥ.)

Z. 7. nivrittimato viraktasya çamâdayaḥ âvaçyakâḥ, ity abhipretya 'âha: *çama* iti. *upacarantu* sevantâñ *amâtyâḥ* pradhânâḥ. yuvarâjasya karma *yauvarâjyañ*. *maitrî*, prîtiḥ, karuṇâ, matir, iti *catasraḥ prahitâḥ* preshi-tâḥ. — (*K. amâtyâ* ity antasyâpy upacarishyanti, ity arthaḥ.)

Z. 15. *âyushmatâ* bhavatâ. *svâsthyañ* vishaya-sambandha-râhityam *âpanne* prâpte sati. *kshetrajño* jîvaḥ *svâm* âtmîyâñ *prakritiñ* paramâtma-bhâvam *âpatsyate* prâpsyate. — (*K. kshetrajñaḥ* paramâtmâ.)

Çl. 33. "prakritim âpatsyate" ity uktam eva 'upapâdayati: *tvat-sañgâd* iti. *dîpyate* anya-nirapekshatayâ prakâçate 'sau *devaḥ eka* eva; 'ekam eva 'advitîyam" iti çruteḥ, sukha-duḥkhâdy-avasthâto nânâtva-pratîteḥ. kîdriçaḥ devaḥ: *çâçvato 'pi* shaḍ-bhâva-vikâra-çûnyo 'pi *tvat-sañgât* tvad-upakalpita-vishaya-sañgât *prabhava-layau* janma-mrityû, tâv eva *jarâ*, tayâ *upaplutâḥ* prithak kritâ yâ *buddhi-vrittayaḥ*, tâsu *nânâ 'iva* bahudhâ 'iva. tatra drish-ṭântaḥ: *jaladheḥ* samudrasya *vîcishu* laharîshu pavana-sphâlitâsu *vyastâ* bhinnâ *mûrtir* yasya, etâdriçaḥ *ravir iva*; yathâ ravir eka eva laharî kshobhân nânâ, evam âtmâ buddhi-vritti-pratibimbitatvân nânâ, ity arthaḥ. uktañ ca:

"eka eva hi bhûtâtmâ bhûte bhûte vyavasthitaḥ;
ekadhâ bahudhâ caiva dṛiçyate jalacandravat;"

iti. kiṁ ca: he *vatsa! katham api* kenâpi prakâreṇa *vitatâ* vistṛitâḥ vishayeshu vartamânâḥ *vṛittiḥ saṁhṛitya* saṅkshipya, *tûshṇîṁ* nivṛittaḥ *âlambase cet* aṅgîkaroshi cet, *tadâ sahajânanda-sândraḥ* svabhâvika-vijñâna-ghanaḥ *âtmâ bhâti* prakâçate. kasmin ka iva: *prasanne* nirmale *âdarçe*, *â* samantât *dṛiçyate* asminn ity *âdarçaḥ* jalâdis, tasmin ity arthaḥ; nirmala-jala-tailâdau yathâ *ravir bhâti*, tathâ nirmalâsu buddhi-vṛittishv âtmâ, ity arthaḥ. — (*K. çâçvato* nityo 'yam âtmâ *devaḥ* ko 'pi, *jaladher vîcishu vyasta-mûrtir eko ravir iva*, *buddhi-vṛittishu nânâ* '*iva* san *prabhava-laya-jaropaplavaḥ*, *prabhava* utpattir, *layo* maraṇaṁ, tâdṛiça *upaplava* âpad yasya, *tvat-saṅgât* tâdṛiçaḥ. he *vatsa!* tvaṁ *ced*, *vitatâ vṛittiḥ* sâṁsârikasya vyavasâyân *saṁhṛitya*, *tûshṇîm âlambase* nirvyâpâratvam âçrayasi, *tadâ prasanne âdarçe mukham iva* ekatânaṁ *bhâti*. kîdṛiçaḥ: *sahajânandena sândro* vyâptaḥ; vyâptir atra 'bhedena bodhyâ.)

P. 98.

Ż. 3. upasaṁharati: *tad bhavatu*, iti. *jñâtînâṁ* Kâmâdînâm *udaka-dânâya* jalâñjali-dânâya; tilâñjali-dâne kṛite niranvaya-vinâço bhavishyati, iti bhâvaḥ. *avatarâmo* gachâmaḥ. —

Sechster Akt.

P. 98.

Pañcame 'ṅke vairâgyotpattiṃ abhidhâya, idânîṃ shashṭhe 'ṅke prabodhotpattim abhidhâtuṃ jîvanmuktim upakramya, tasyâḥ kramaṃ darçayan 'Çânti-praveçaṃ prastâvayati.

Z. 11. *çântir*, nâma vâhyeshu vastushu antaḥkaraṇoparatiḥ. *âdishṭâsmi* âjñaptâsmi. *viditam eva* jñâtam eva.

Çl. 1. *tanayeshu* kâmâdishu *astaṅgateshu* satsu; *vairâgyaṃ bhajate* tasmin *vairâgya-bhâji* râga-çûnye, *viçesheṇa lîno moho* yasmât, tâdṛiçe *manasi praçamam* âtyantikaṃ çamaṃ *prapanne* prâpte sati; *pañcasu kleçeshu*, avidyâ-asmitâ-râga-dveshâbhiniveçâḥ *kleçâḥ*, mithyâjñânam *avidyâ*, buddhy-âtmanor aikyâdhyâsaḥ *asmitâ*, vishayecchâ *râgaḥ*, sasâdhane duḥkhe aprîtir *dveshaḥ*, maraṇâd bhayam *abhiniveçaḥ*, teshu *samaṃ* sama-kâlaṃ *samihâṃ* vâsanâṃ *gateshu* saṅskâra-rûpatâṃ prâpteshu, *purushaḥ* kshetrajñaḥ *abhitaḥ* sarvatra sveshu pareshu *tattvâvabodhaṃ* sva-svarûpâvabodhaṃ *tanoti* vistârayati; tad uktaṃ: "yo na hṛishyati, na dveshṭi, na çocati, na kâṅkshati" iti. — (*K. tanayeshu* kâma-krodhâdishu *astaṃ gateshu* satsu; *vilînaḥ* palâyito *moho* yasmât, tâdṛiçe *manasi praçamaṃ* vishaya-vairâgyaṃ *prapanne* sati; *pañcasu* mada-mâtsarya-râga-mâna-dvesha-rûpeshu *kleçeshu çamaṃ* nâçaṃ *gateshu* satsu, *purushaḥ* paramâtmâ *tattvâvabodham abhitaḥ* sarva-dikshu *tanoti*, iti bhavishyat-sâmîpye vartamânatâ, purusha âsanna-tattvâvabodhaḥ, ity arthaḥ.)

P. 99.

Z. 1. *tvaritataram* atiçîghraṃ. *ânîya* sapremâ nânayitvâ. *mantrayanti* vicârayanti.

Z. 5. *râjakulaṃ* râja gṛihaṃ. *piyûsheṇa 'iva* amṛitena 'iva. — (*K. râja kulaṃ* râjadhânîṃ 'Vivekasya" iti çeshaḥ.)

Çl. 2. vastu-tattvam upadiçati: *asatâm* iti. *yatra* yasmin râjakule *asatâm* mohâdinâm *nigraho* daṇḍaḥ; yatra *yamâdayaḥ santaḥ* vivekânugâmitvât *pûjyâḥ*; yatra *jagat-svâmî* Nârâyaṇaḥ *vaçyaiḥ* premâdibhiḥ, *devam* îçvaram *anujîvanti* te *devânujîvino* jîvâḥ, tair *ârâdhyate* pûjyate. — (*K. asatâm* kâma-krodhâdinâm. *vaçyair anujîvibhiḥ* yama-niyamâdibhir. *jagat-svâmi* paramâtmâ.)

Z. 10. *aye adya* iti, "aye adya khalu râjakulam", ity-âdi.

Z. 11. *kîdṛiçî* kiṁ-prakârâ *svâminaḥ purushasya manasi* nigrahârthaṁ *pravṛittir*, ity arthaḥ. — (*K. svâminaḥ purushasya* paramâtmanaḥ.)

Z. 13. *svâmy* eva âtmaiva *sâmrâjyam* âtmârâmatvam *alaṅkarishyati* aṅgîkarishyati.

Z. 14. *yathâ* yataḥ *âtmânaṁ* paramâtmânam *anusandhatte* prapañca-prâtikûlyena paramâtmatvena 'vadhârayati, *tataḥ deva eva svarâṭ*, svasminn â samantâd râjate iti svarâṭ âtmârâmaḥ; samyak cid-ânandâbhedena râjate *samrâṭ* jñânânandâbhinnaḥ, ity arthaḥ. tathâ cha Chândogye: "sa ca esha evaṁ vijânan âtma-ratir, âtma-krîḍa, âtma-mithuna, âtmânandaḥ, sa *svarâṭ* bhavati," iti. — (*K. svârâjyaṁ* svarga-râjyâdhipatyaṁ, *sâmrâjyaṁ* sakala-râjâdhirâjatvaṁ.)

Z. 16. *mâyâyâṁ* mûlâvidyâyâṁ *kîdṛiçaḥ* katham *anugrahaḥ?* na katham api, ity arthaḥ.

Z. 17. "na katham api" ity uktaṁ tad eva çaṅkate: *nanu* iti. *sarvânartha-vîjaṁ* sarveshâm anarthânâṁ vîjaṁ mûla-kâraṇaṁ, ata eva *nigrâhyâ*, ity arthaḥ. — (*K. mâyâṁ sarvânarthâ* ity-âdi-rûpâṁ *manyate*, ity arthaḥ.)

P. 100.

Z. 1. *sthitiḥ* vyavasthâ. — (*K. râjakulasya* râjadhânî-sthita-lokasya *sthitir* vyâvahâraḥ.)

Çl. 3. mâyâ-nigrahe hetum âha: *nitya* iti: *nityaḥ* âtmâ, *anityaṁ* tato 'nyat, teshâṁ *vicâraṇâ praṇayinî*, praṇayaḥ prîtiḥ yasyâḥ sâ praṇayinî prâṇa-priyâ; *vairâgyaṁ* vîta-râgatâ *ekaṁ* mukhyaṁ *suhṛit* hitâhita-prâpti-parihâra-janakaṁ; *samîcînâni mitrâṇi yama*-niyamâsana-dhyâna-dhâraṇâḥ; *çamâdayaḥ*, *çamo* mano-nigrahaḥ, *damaḥ* indriya-nigrahaḥ, *prâyo*-grahaṇât santoshaḥ, ete *sahâyâḥ* sahakâriṇo *matâḥ*; *maitrî* parânudvega-janikâ sâ *âdir* yâsâṁ tâḥ, uktaṁ paricaranti kurvanti tâḥ *paricârikâḥ* ukta kâriṇyaḥ, ity arthaḥ; *mumukshâ* mokshecchâ *sahacarî* sakhî, ity arthaḥ. etasmin tad-buddhir *mohaḥ*, *mamatâ* svakîyatvâbhimânaḥ, *saṅkalpo* manaso abhiniveçaḥ, *saṅgo* vishaya-sâmmukhyaṁ, ete *ripavaḥ balâd* âtma jijñâsâ-balât *nityam* avaçyam *ucchedyâḥ* nâçanîyâḥ, ity arthaḥ. — (*K. praṇayinî* sakhî "mater" iti çeshaḥ; *suhṛin* "manasaḥ" iti çeshaḥ; *suhṛic* ca 'atra prîtikṛit; *mitrâṇi* ca prabodhodaya-kârya-sahâyâḥ, *sakhâyaç* ca kâryopadeshṭâraḥ, iti bhedas, tat sarvaṁ manaso bodhyaṁ; *sahacarî* patnî "purushasya" iti çeshaḥ. *balâd ucchedyâ ripavo* 'pi purushasya bodhyâḥ; *saṅkalpaḥ* kâminaḥ karma-mânasaṁ, *saṅgo* vishayâsaṅgaḥ.)

Z. 7: idânîm dharmasya 'anurâgam pṛichati: *atha* iti. *praṇayaḥ* prîtiḥ; *svâmino dharmasya* iti samânâdhikaraṇe shashṭhyau.

Z. 8. uttarayati: *putri* iti. he *putri! vairâgya-sannikarshâd* vairâgya-sambandhât *prabhṛiti* ârabhya, *nitântam* atiçayena. *iha* asmin loke *amutra* paraloke *phala-bhogaḥ* putra-svargâdi-sâkshâtkâraḥ, tatra *virasa eva* vimukha eva, iti.

Çl. 4. tatra hetum âha: *tena sa,* iti. *sa* svâmî; *tena* hetunâ *pâpa-phalân narakâd iva puṇya-phalâd api* svargân *nâçino* naçvarât *bhayam bhajati* prâpnoti; tad yathâ: "iha karma-jito lokaḥ kshîyate, evam eva 'amutra puṇya-jito lokaḥ kshîyate," iti çruteḥ. *karma*-phalânityatvâd hetoḥ *samujjhitaḥ* tyaktaḥ *kâma-samanvayaḥ* phala-sambandho yasmin, etâdṛiçam *sukṛitam karma kathañcana* kenâpi prakâreṇa *na manyate* na 'aṅgîkaroti. — (*K.* svâmî *pâpasya phalân narakâd iva puṇyasya phalâd api bibheti,* yato *nâçinaḥ; ity* ato hetoḥ *samujjhita-kâma-samanvayas* tyakta-kâmanâ-sambandhaḥ *katham sukṛitam karma* sukṛita-janakam karma *anumanyate,* naiva 'anumanyate, ity arthaḥ.)

Z. 14. kâmyam na karoti cen, mâ krivatâm; nityâkaraṇe pratyavâyaḥ syâd, ity âçaṅkya 'âha: *kiṁ tu* iti. *svâminaḥ* svâtmanaḥ *pratyak-pravaṇatâm* âtmaika-nishṭhatâm *vicintya* dṛishṭvâ, *asau* dharmaḥ, *kṛitam kṛityam* mano vairâgya-rûpa-kâryam yena, tâdṛiçam *âtmânam matvâ, svayam eva çûnya-vyâpâro 'bhût* vyâpâra-rahito 'bhût, ity arthaḥ. evam uktam bhavati: karmâṇy anena tyayante, iti na, kiṁ tu karmabhir eva 'ayam tyajyate, iti na, nityâkaraṇe pratyavâyaḥ. tathâ 'uktam: "na karmâṇi tyajed yogî, tyajyate karmabhiḥ svayam, yato moha-phalam karma" iti. nanu karmaṇâm svatantra-phala-sâdhanânâm katham mano-vaimalya-hetutvam anya-hetor anyatra 'ahetutvâd, iti ced ucyate, saṁyoga-pṛithaktva-nyâyena ity avaihi. dharmeṇa pâpam ayam nudati, yoginaḥ karma kurvanti saṅgam tyaktvâ 'âtma-çuddhaye, iti çruti-smṛityoḥ sattvât. uktam ca 'asmad-gurubhiḥ: nityâdibhir ârâdhitârâdhya-pâda-bhagavad-anugrahâd ativimala-mânasaḥ svayam eva 'ittham jagat-tattvam âlocayati, iti. apare tv evam varṇayanti: tam etam vedânuvacanena brâhmaṇâ vividishanti yajñena dânena tapasâ 'nâçakena, iti vâkyena 'agni-hotrâdîni jñânâya vidhîyante, na ca vâcyam adhikârântara-sambandhasya jñânâdhikâra-sambandho 'bhiniyukta viniyoga-virodhâd, iti; tan na, paçu-prakaraṇe paṭhitât khâdiro yûpo bhavati, iti vâkyâd khâdiratvam kṛitvartham api tasminn eva prakaraṇe paṭhite khâdiram vîrya-kâmasya yûpam kurvîta, iti vâkyântareṇa vîrya-çeshatayâ viniyujyate, tadvan na viniyukta-viniyoga-virodhaḥ; ity alam vistareṇa. — (*K. pratyak pravaṇatâm* prâtikûlya-gâmitvam.)

Z. 16. *Mahâmoha-vṛittânta*-çeshasya Çânti-dvârâ praçnam avatârayati. *nilîya* âchâdya. *teshâm* upasargâṇâm.

Z. 18. *prarocanâya* pratâraṇâya. *madhumatyâ* kayâcit siddhyâ. *eteshu* upasargeshu. *upasargâḥ* antarâyâḥ prâtibhâdayaḥ:

"prâtibhaḥ, çravaṇo, devo, brahmâvartau tathâ 'aparau,
pañca 'ete yoginâm yogam vighnam kurvanti sarvadâ";
iti Dattâtreyeṇâ 'uktam. — (*K. svâminaḥ prarocanâya* iti sâṅsârika-sukhârtham, ity arthaḥ. *madhumatî* siddhi-viçesho, yayâ sarva-bhogyopasthitir akâmenâpi bhavati. *upasargâ* yogopasargâ aṇima-laghimâdayaḥ.)

P. 101.

Z. 4. *aindrajâlikî* avidyamânârtha-prakâça-rûpâ. *kâpi* akathanîya-rûpâ.

Çl. 5. *eshaḥ* purusho *yojanânâm çatam*, kroça-catushṭayena 'eka-yojanam, evam *yojana-çatam çabdân çriṇoti* âkarṇayati. *tâs tâḥ* atiprasiddhâḥ *açrutâḥ veda-purâṇa-bhârata-kathâḥ âvir bhavanti* prakaṭi-bhavanti. *vâṅmayâḥ* vâg-vikârâs *tarkâḥ âvir bhavanti* sphuranti. *çucibhiḥ* vyâkaraṇa-çuddhaiḥ *padaiḥ çâstrâṇi kâvyâni vâ ichayâ svayam grathnâti* racayati. *lokân* bhûr-âdîn *bhrâmyati* gachati. *Meroḥ* imâḥ *mairavyaḥ*, tâ *ratna-sthalîḥ* ratna-khacitân upa-ritana-bhûbhâgân *sphuṭa-ruco* dedîpyamânân *paçyati*. — (*K. esha* svâmî *yojana-çatâd* api *çabdân çriṇoti. açrutâ* api *te te* prasiddhâḥ *purâṇâdînâm gâthâdayo* gîtâdayaḥ, *âdi*-padât kavitvâni ca, *âvir bhavanti, vâṅmayâ* vâkya-svarûpâḥ. *lokân bhrâmyati* "pâdacâram vinâ" iti çeshaḥ. *mairavîr* Meru-sambandhinî *ratna-sthalîḥ paçyati*; kîdṛiçîḥ: *sphuṭa-ruca* ujjvala-prabhavâḥ.)

Z. 10. *madhumatyâ* siddhyâ kalpitâ yâ *bhûmiḥ*, tâm *âpannaḥ* prâptaḥ san ity adhyâhâraḥ, *sthânâbhimâninibhir devatâbhiḥ upachandyate* pralobhyate. pralobhanam eva darçayati: *bho* iti. *anupâdhi-ramaṇîyaḥ* sahaja-sundaraḥ. *Vidyâdharîjanaḥ tvâm upasthitaḥ* prâptaḥ. kîdṛiçaḥ Vidyâdharîjanaḥ: *vividhâ* nânâ-prakârâç ca te *vilâsâḥ* vibhramâç ca netra-kara-caraṇâṅga-hâva-bhâva-lalita-ceshṭâ-bhedâḥ; *lâvaṇyam* ca vastra-kanaka-mauktikâdy-âbharaṇânulepena yatra bhaṅgi-racanâ-rûpam, tad eva *puṇyam* kârye kâraṇopacâraḥ, *tanmayaḥ* tat-pradhânaḥ. punaḥ dadhy-âdarçâdi-*maṅgalârthe vyagrâḥ pâṇayo* yasya saḥ. *praṇaye* prîtau kartavyatâyâm *peçalaç* caturaḥ. — (*K. madhumatîm bhûmim* siddhim *âpannaḥ* purushas *tat-sthânâbhimâninibhir* mairava-sthânâbhimânam purushasya janayantîbhir *devatâbhir* upachalyate pratâryate. upachalanâkâram âha: *bho* ity-âdi. *ramaṇîyo 'yam* ity atra "deçaḥ" iti çeshaḥ. *esha tvâm upasthito Vidyâdharîjanaḥ*, ity anvayaḥ. *veço* maṇḍanam; *vilâso* helâ-lîlâdi; *lâvaṇyam* saundaryam; *maṅgalâdi* iti maṅgalârthâdi *pâṇir* ity arthaḥ. *praṇayo* vâtsalyam, tena *peçalo* manoharaḥ.)

Çl. 6. *kanakasya* suvarṇasya *sikatâ* bâlukâ, tad-yuktâni *sthalâni* yâsu, tâḥ *sravantîḥ* nadîḥ *bhaja* sevaya. *pṛithu-jaghanâḥ* sthûla-nitambâḥ, *kamalânanâḥ* padma-vadanâḥ, *ghanâḥ* niviḍâḥ *ûravo* yâsâm, tâḥ *bhaja*. *marakatam* ratna viçeshaḥ, tasya *dalâni*, tadvat *komalâḥ vanalîḥ* vana çreṇayaḥ *bhaja*. *nijena svena puṇyena jitân* arjitân *sarva-bhogân* vishayânandâṅç *ca bhaja*. — (*K. sikatina* iti *inn*-pratyayaḥ svarântaḥ, *kanaka-sikatâ* yuktâni *sthalâni* yâsâm, tâdṛiçîḥ *sravantîr nadîḥ*. *ghanorûr* vipulatvena paraspara-saṁsaktâḥ *kamalânanâḥ*. *marakata* nishpanna *dalâ vana-çreṇîç ca*. *nija puṇya jitân* etad bhinna-*sarva-bhogâṅç ca bhaja*, ity upachandyate, ity arthaḥ.)

P. 102.

Z. 1. *çlâghyam* atisamicinaṁ. *anumoditam* eva 'idaṁ, na 'anyathâ ity uktaṁ. *protsâhitaṁ* sodyogaṁ kṛitaṁ; bhavatu ko virodhaḥ? ity aṅgîkâraḥ *sammatiḥ*. — (*K. sampratipattiṁ* sammatiṁ.)

Z. 4. *vâgurâṁ* sthûla-rajju-nirmitaṁ jâlaṁ.

Z. 6. *na khalu na khalu* na hi na hi, ity arthaḥ.

Z. 8. *pârçva-vartinâ* nikaṭa-vartinâ *tarkeṇa* sad-asad-vicâraṇena, *sarvân* mâyâ-manaḥ-saṅkalpâdîn *krodhâveçena* kopâvirbhâveṇa *kashâyite* ârakti-kṛite *netre* yasyâṁ kriyâyâṁ yathâ syât tathâ *âlokya, abhihitaḥ* uktaḥ *svâmi*. kim uktam? ity âha: *svamin* iti. *vishayâ eva âmishaṁ* mâṅsaṁ, tasya *grâsaṁ gṛidhnanti* abhilashanti te *gṛidhnavaḥ*, taiḥ *âsthânî-dhûrtakaiḥ* sabhâ-pratâraṇâya gṛihîta-baka-vrataiḥ. *teshv eva* pûrva-pariciteshv eva, *tathaiva* ukta-prakâreṇa *vishamâḥ* duḥsahâḥ *vishayâ* eva *aṅgârâs*, teshu na *avabudhyase* na jânâsi. — (*K. âsthânî* sabhâ, tatra bahubhir nânâvidhaṁ prayujyamânatvân nishṭhâ-rahitâ eva *tarkâ* bhavanti, tâdṛiçair *ebhiḥ kiṁ*, ity arthaḥ. *âsthânî-vakair* iti pâṭhântaraṁ, tatra ca *vakair* dhûrtaiḥ sabhâ-dhûrtair, ity arthaḥ.)

Çl. 7. *bhava* eva saṅsâra-bhava eva *sâgaraḥ* samudraḥ, tasmât *târaṇâya* pâra-gamanâya *yâ yoga* eva *tariḥ* naukâ *tvayâ âçritâ* prâptâ, *adhunâ* idânîṁ *tâṁ* naukâṁ *na cirât parimucya* tyaktvâ *aṅgâra-nadîṁ* vishama-vishaya-pravâhaṁ *kathaṁ vigâhase* âloḍayasi. — (*K.* yâ *yoga*-rûpâ *tarir bhava-sâgara-târaṇâya sucirât tvayâ samâçritâ, adhunâ madât tâṁ parimucya, katham aṅgâramayî nadî vigâhyate?* ity arthaḥ.)

Z. 18. *tad-vacanam âkarṇya* tarka-vacanaṁ çrutvâ. *avadhîritâ* tiraskṛitâ.

P. 103.

Z. 2. *svâminâ* purusheṇa.

Z. 5. *svâmi-niyogaṁ svâmino* vivekasya *niyogam* âjñâṁ *sampâdayâvaḥ* karishyâvaḥ, *iti nishkrânte*.

Z. 7. (*K. praveçaka* iti çânti-çraddhâ-prayojyatvât.)

Çl. 8. *saṅsâra* eva *vârâṁ* jalânâṁ *nidhiḥ* samudraḥ, tasya *pâre* pâre *tîraṁ* mayâ *adhunâ* idânîm *avâpta-kalpaṁ* prâpta-prâyaṁ; 'mayâ' iti sarvatra yojanîyaṁ. anekânartha-vyâptasya saṅsâra-nîradheḥ kathaṁ pâra prâptir? ity ata âha: *tîrṇâḥ* iti. *kleçâḥ* avidyâ-asmitâdayaḥ pañca, ta eva *mahântya ûrmayo* laharyaḥ *tîrṇâḥ*, *bhîmâs* trâsa-hetavaḥ, *mamatvam* eva *bhramâḥ* âvartâḥ *parihṛitâḥ* vañcitâḥ. *mitraṁ* ca, *kalatraṁ* ca strî, *bandhavaç* ca suhṛidaḥ, ta eva *makarâḥ* matsyâḥ, *grâhâḥ* çiçumârâḥ, teshâṁ *grahaḥ* grahaṇaṁ dhâraṇaṁ, tat-pûrvikâḥ *grastayo* grâsâḥ *çântâḥ* praçamitâḥ. *krodha* eva *aurvâgniḥ* vaḍavânalaḥ *apâkṛitaḥ* nirâkṛitaḥ. *tṛishṇâ* eva *lata-granthayaḥ vighaṭitâḥ* viyojitâḥ. çrîmad-Bhagavad-bhakter na kim api dur labhaṁ, iti bhâvaḥ. — (*K. yasyâ* Vishṇubhakteḥ *prasâdân mayâ saṅsâra vârâṁ nidheḥ* param eva *pâraṁ*, tâdṛiçaṁ *tîram avâpta kalpam* alpâvaçishṭa-

pràptikam *adhunâ* laṅghitavyaṁ, ity arthaḥ. samudra-dharmàn rûpayann àha: *tirṇâ* iti. yâcanâdi-*kleçâ* eva *mahormayas tirṇâḥ*. *mamatva*-rûpà *bhramà* âvartà *bhîmâ* bhishaṇàḥ *parihṛitâ* aspṛishṭâḥ. *mitrâdi*-rûpâ ye *makara-grâhâ* hiṅsra-jàntavas, teshâṁ *graho* gràsas, tad-rûpà *granthayo* bandhanàni *krântâ* laṅghitâḥ, ity arthaḥ. *krodha*-rûpo *vaḍavâgnir apâkṛitas* tyaktaḥ. *tṛishṇâ*-rûpàs tîra-sannidhau *latâ-granthayo vighaṭitâ* apasàritàḥ, ity arthaḥ.)

Z. 16. *niranukroçasya* nirgato 'nukroço dayâ yasmàt, nirdayasya ity arthaḥ. *mukham âlokayishyâmi* ity anena mâninitvam âdarçitaṁ. — (*K. niranukroçasya* nirdayasya cirakâlam upekshaṇàt. *svâmino* Vivekasya.)

Z. 19. *devi* iti sambodhanena tvam iti sâdhvîyasî ity api 'idam asmin samaye anucitaṁ, iti bhàvaḥ. — (*K. devo* Vivekaḥ.)

P. 104.

Z. 1. kiñcit kopaṁ parihàrya vadati: *sakhi na dṛishṭâ tvayâ* iti.

Çl. 9. tàṁ *daçâm* eva çràvayati: *çṛiṇu, bâhvor* iti. *ahaṁ kaiḥ kaiḥ duritaiḥ* pàpaiḥ *durvidagdhaiḥ* dushṭa-buddhibhiḥ, *hataṁ* nashṭaṁ yad *vidhi-balaṁ* daiva-balaṁ, tasmàn nirbhàgyatvàt *sapadi* tatkàlam eva *dâsîṁ kartuṁ* svàdhînàṁ sampàdayituṁ *na îhitâ* na tarkità? api tu sarvair api, ity arthaḥ. nirbhàgyatve hetuḥ: *Viveke dûra-saṅsthe* dûraṁ gate sati. dàsîtva-sampàdakam àha: *bâhvoḥ* hastayoḥ *dalitâḥ maṇayo* yàsu tàḥ; *cûḍâ-ratnaṁ* tasya *grahe nikṛitayo* nyakkàràḥ, keça-grahaṇâkarshaṇa-rûpàs tiraskàràḥ, iti yàvat, tàbhir *dûshitaḥ* troṭitaḥ *keçapâço* dhamillaḥ. evaṁ ca sati 'idaṁ phalitaṁ, vivekaṁ vinà nyàya-màtra-dagdha-cittaiḥ upakramopasaṅhàràbhyàṁ çruti-tâtparyânabhijñair upanishada upaplàvyanta eva. — (*K. viveke* vicàrya-tattvârtha-nirṇaya-rûpe mat-svàmini *dûra-saṅsthe* sati, màṁ *dâsîṁ kartuṁ* sva-vyâkhyàtârtha-paratayà svavaçàṁ kartuṁ *kaiḥ kair durvidagdhair* duritaiḥ pàpais tattac-chàstraiḥ *na 'ahaṁ sapadi hata-vidhi-vaçâd îhitâ* ceshṭità, tattac-ceshṭàm àha: *bâhvor* iti. balàd àkarshaṇe *bâhvoḥ kaṅkaṇânâṁ çreṇayo dalita-maṇayaḥ* sadyo *bhagnâḥ*, *cûḍâratna-grahaṇa*-rûpàbhir *nikṛitibhiç* tiraskàraiḥ *keçapâço dûshitaḥ*.)

Z. 7. *durvilasitaṁ* duçceshṭitaṁ. *aparâdhâbhâvaṁ* vyanakti: *tena hi* iti. *tena hi* avadhàraṇe. *mahâmohenaiva kâmâdi-dvâreṇaiva manaḥ prabodhayatâ viveko dûrî-kṛitaḥ*, iti yojanà. *naisargikaṁ* nirupàdhikaṁ svàbhàvikam, iti yàvat. *samaya-pratîkshaṇam* abhyudaya-kàlâvekshaṇaṁ; kulaṭàs tv anyam âçrayante, svàmino vipadam âlokya na samayaṁ pratîkshante, iti bhàvaḥ. *sambhâvaya* sammànaya. *apahatâ* màrità. — (*K. tena hi* iti, mahàmohena *kâmâdi-dvâreṇa manas* tat-pitaraṁ *tathâ tathâ* asad-arthaṁ *prabodhayatâ*, ity arthaḥ.)

Z. 13. upanishad-artha-pratipàdakatayà gîtàṁ viçinashṭi: *vatsayâ* iti. *rahasi* nirjane deçe. *gurûṇâṁ* viveka-pravartakànàṁ çvaçurâdînàm *adhyaksham* agrataḥ. — (*K. gurûṇâṁ* çvaçuràṇàm àdipurushàṇàṁ.)

Z. 18. viveka-*svâminaḥ* iti karmaṇi shashṭhî, viveka-rûpaṁ svàminam prati *nivuktaḥ* uktaḥ, ity arthaḥ.

P. 105.

Z. 2. *parikrâmati* bhramarikâm̃ kr̆itvâ, ity arthaḥ.

Z. 4. *vatse* çraddhe!

Z. 5. *gr̆ihitopadeçaiva* gr̆ihitâjñaiva. — (*K. gr̆ihitoddeçâ* jñâta-tadiya-sthiti-sthânâ.)

Z. 6. *katham iva* iti kutra kutra, ity arthaḥ.

Z. 7. *anupravishṭâ* antargatâ. — (*K. Vishṇubhaktyâ 'âsîd* iti, *prâg eva kathitam âsîd*, ity anvayaḥ. *tarkavidyâ-bhayâd* iti, âtma-nânâtva-pratipâdakatvât tasyâ ekatva-vâdinyâ upanishado bhayam̃.)

Z. 10. *tarkavidyâyâḥ* iti pañcamî.

Z. 11. *prâtoshyati* varṇayishyati, kathayishyati, iti yâvat. *tad âgachatu devo* Vivekaḥ "purusha-nikaṭam̃" iti çeshaḥ. *eshaḥ svâmî* purushaḥ. *vivikte* ekânte.

Z. 14. *prakrama-viruddhaḥ* upakrama-viruddhaḥ *samudâcâraḥ* çishṭâcâraḥ. *pitr̆i-bhâvam̃* pitr̆itvam *âpannaḥ* prâptaḥ. — (*K. samudâcâraḥ* sambhâshaṇam̃.)

Çl. 10. *devâḥ* bhû-devâḥ *purâ hi* pûrva-kâle *hi* niçcitam̃ *dharmâdhvani* dharma-mârge *nashṭa-sañjñâḥ* lupta-bodhâ *tam artham̃ tanayân* putrân *apr̆ichan*: te ca tanayâḥ *etân* praçna-kartr̆în *jñânena* hetunâ *parigr̆ihya* svîkr̆itya *sañçr̆iṇuta iti* samyag adhigachata ity *avocan* avadan. tathâ 'uktam̃ Manunâ:

"adhyâpayâmâsa pitr̆în çiçur Añgirasaḥ kaviḥ;
"putrakâ," iti hovaca jñânena parigr̆ihya tân;"

iti. etena anya-sambandhâpekshayâ jñâna-sambandhasya mahatvam̃ darçitam̃. — (*K.* Mârkaṇḍeya-purâṇe 'yam itihâsaḥ. *dharmâdhvani* dharma-pathe *nashṭa-sañjñâ devâs tam artham̃* sva-*tanayân apr̆ichan*, "tatas te" ity adhyâhâryam̃ tena tanayân *etân* devâḥ *he putrakâḥ sañçr̆iṇuta ity avocan*. kim̃ kr̆itvâ: *jñânena samyag* artham̃ *parigr̆ihya*, ity arthaḥ.)

P. 106.

Z. 1. jñâna-sambandhât pitr̆itvam evam tvayi upacitam, ity âha: *tad bhavân* iti.

Z. 2, *devena* vivekena. *svâmî* purushaḥ.

Çl. 11. *anugraha-vidhau* anugrahe kartavye *devyâḥ* upanishado, *mâtuç ca antaram̃* bhedaḥ *mahat* mahân. antaram eva 'âha: *mâtâ* iti. *nibadhnâti* saṁsâre prakshipati. *devî* upanishat *bandham̃* saṁsâram̃ *nikr̆intanti* chinatti. — (*K.* upanishadam̃ purusho mâtaram uktvâ, mâtr̆ito 'py âdhikyam̃ sâdhayati: *anugraha-vidhâv* iti. *mâtâ gâḍham* iti "mamatâ-pâçena" iti çeshaḥ. *bandham̃* saṁsâra-bandham̃.)

Z. 11. *kva* kutra.

Çl. 12. *amûni* etâni *vâsarâṇi* dinâni, *maṭhâḥ* avadhûta-nivâsa-sthânâni, *catvarâḥ* nânâvidha-janopaveçana-sthânâni, *çûnya-devâlayeshu*, *mûrkhâç ca* te *mukharâç* ca vâcâlâḥ, taiḥ *saha nîtâni* ativâhitâni. *na khalu* iti "jânanti"

iti çeshaḥ. tarhi katham ativâhitâni? iti přichati, *kim tu* ity uttaratvena 'uttarârdham avatârayati pûrva-çlokasya: *te svechayâ* iti. *te* mûrkha-mukharâḥ *svechayâ* gurûpasattim vinâ *mama girâm* vâcâm *artham avicârya vikalpayanti* viçesheṇa kalpayanti, anyathayanti. tatra dřishṭântaḥ: *Draviḍâḥ* Draviḍa-deçasthâḥ purushâḥ, teshâm *aṅganâḥ* striyaḥ, tâbhir *uktâḥ vâcaḥ*, tâsâm iva; Draviḍa-striyaḥ purushâpekshayâ 'aspashṭa-vâco bhavanti, iti Draviḍâṅganâ dřishṭântitâḥ. — (*K. mûrkhâç* ca te *mukharâç* ca, iti taiḥ. *te svechayâ* ity-âdikam anya-parârdham, te mûrkha-mukharâ, *Draviḍa-deçîyâṅganâbhir uktânâm vâcâm iva, mama girâm artham avicârya* tattvato 'nirṇîya, *vikalpayanti* nânâvidham vyâcakshate, ity arthaḥ.)

Z. 18. nanu tarhi teshâm vahirmukhânâm upanishad-artha-vicâro vyarthaḥ, ity âçaṅkya 'âha: *tena* iti. *teshâm* vahirmukhânâm *mad-vicâraṇam* mad-artha-vicâraṇam, *pareshâm artho* dhanam, tasya *grahaṇam*, tad eva *prayojanam*, para-dhana-grahaṇârtham, ity arthaḥ.

P. 107.

Çl. 13. punar api âgachantyâ kutracin mayâ "kânicid vâsarâṇi atikramaṇîyâni" iti manasi vicârya, yajñavidyâ-samîpam âgatam, ity âha: *křishṇâjina* iti. *atha* anantaram *mayâ adhvani* mârge *yajñavidyâ dřishṭâ*. kidřiçî yajñavidyâ: *křishṇâjinam* křishṇa-mřiga-carma, *agnayo* gârhapatyâdayaḥ, *samidhaḥ*, *âjyam* ghřitam, *juhûḥ*, *çruvaḥ*, *âdi*-padât upabhřit dhruvâ ity-âdîni yâni *pâtrâṇi*, taiḥ; *tathâ ishṭiḥ* darça-pûrṇamâçeshṭiḥ, *paçuḥ* nirûḍha-paçuḥ, *somo* agnishṭomaḥ *mukham* âdyo yeshâm, tâdřiçâḥ ye *makhâ* yâgâḥ, taiḥ *kila* niçcayena *parivřitâ* vyâptâ. punaḥ kidřiçî: *karma-kâṇḍe vyâdishṭâ* upadarçitâ *paddhatiḥ* kartavyatâ-kramo yasyâḥ, sâ. — (*K. atha mayâ adhvani yajñavidyâ dřishṭâ*. kidřiçî: *křishṇâjinâdibhiḥ parivřitâ*. *juhuḥ* srak; *ishṭi-paçur* yajñîya-paçuḥ; *somo* latâ-viçeshas; tan-*mukhais* tad-abhimukhais tat-sambandhair *makhair* yajñair, ity arthaḥ. tathâ *karma-kâṇḍam* yajña-karma-bodhaka-çruti-samudâyas, tena *vyâdishṭâ* darçitâ *paddhatiḥ* křiyâ-kalâpo yasyâs, tâdřiçî.)

Z. 7. *cintitam* vicâritam; kim tad âha: *api* iti. *eshâ* yajñavidyâ. *nayâmi* parikalayâmi.

Z. 11. *tâm aham upasthitâ* prâptâ. *samîhitam* îpsitam. *tvayi* tvat samîpe.

Z. 15. *te* tava *kim karma* kâryam, ity arthaḥ.

Çl. 14. kim uktam ity âha: *yasmâd* iti. *tam purusham* âtmânam. "aham" ity uttamapurusha-sambandhât labhyate, *prastaumi* prakarsheṇa staumi nirûpayâmi. tam kam: *yasmâd viçvam* jagad *udeti* utpadyate; *yatra* yasmin âtmani *ramate* santushṭam tishṭhati; *yasmin punar ante lîyate* layam prâpnoti; *yasya bhâsâ* jyotishâ *jagad vibhâti* prakâçate, "yasya bhâsâ sarvam idam vibhâti" iti çruteḥ; *yan-maho* yasya tejaḥ *sahajânandojjvalam*, saha jâyate iti *sahajaḥ* svâbhâvikaḥ *ânandaḥ* sukham, tad rûpaḥ *ujjvalaḥ* prakâço yasya, nitya-sukha-prakâçâbhinnaḥ, ity arthaḥ. *çântam* vikâra çûnyam;

çâçvatam avinâçi; *akriyam̃* kriyâ-rahitam̃. punas tam̃ kam̃: *kṛitinaḥ* kuçalâḥ *yam̃ bhûteçvaram̃* bhûtânâm îçvaram̃ niyantâram̃ paramâtmânam *apunarbhâvâya* sam̃sâra-vichittaye *yânti* prâpnuvanti. kim̃ kṛitvâ: *dvaitam̃* bhedaḥ, sa eva *dhvântam̃* tamaḥ *apâsya* tiraskṛitya. — (*K. tam̃ pûrusham* aham̃ *prastaumi*, *yasmâd* ity-âdi samasta-viçeshaṇa-vaiçishṭyena pratipâdayâmi, ity arthaḥ. *yasmât* purushâd itthaṁ *sam̃sâra* udeti jâyate, janma ca mithyâvâsanâ-jñeyatva-rûpam̃ *yatra ramate* krîḍati, viçvam eva kartṛi-krîḍâ-dharaṇyâ api tad-âtmakatvât, *yasmin* purushe tadîya-tattva-jñâna-daçâyâm̃ *punar lîyate* jâgrat-svapnâvishayî-bhavati, ity arthaḥ. *yasya bhâsâ* prakâçena *jagad vibhâti*, yat-svarûpam̃ *mahas* tejaḥ *sahajânandam ujjvalam̃* ca, ity arthaḥ. kîdṛiçam̃ purusham̃: *çântam̃* vishaya-vyâvṛittam̃, *çâçvatam̃* nityam, *akriyam̃* niçcalam̃; pûrusham̃ *bhûteçvaram̃* sarva-prâṇeçvaram *apunarbhâvâya* punar-utpatty-abhâvâya *kṛitino* yogino *dvaita*-rûpam̃ *dhvântam apâsya yânti* praviçanti, ity arthaḥ.)

P. 108.

Çl. 15. yajñavidyâ sva-siddhântam âviḥ karoti: *pumân* iti. *pumân* âtmâ *akartâ*. kartṛitva-çûnyaḥ *katham îçvaro bhavet?* na katham api, ity arthaḥ. tava mate îçvaratvam̃ kartṛitvâdy-upâdhi-viçishṭam̃ kartṛitvâdy-abhâve tad eva na sidhyati, iti bhâvaḥ. nanu tarhi bhûteçvarârâdhanam̃ vinâ katham̃ sam̃sâra-nirâsaḥ? tatra 'âha: *kriyâ* jyotishṭomâdi-rûpâ saiva *bhavoccheda-karî* sam̃sâra-nâça-karî, "apâma somam amṛitâ abhûma" iti çruteḥ. upanishad-rahasyam̃ nirasyati: *na vastu-dhîḥ*, *vastu* kâla-trayâbâdhyam̃ parabrahma, tad-âkârâ *dhîḥ* tat-sâkshâtkâraḥ *na* bhava-cheda-hetur, ity arthaḥ. karma kurvatâm̃ jîvanam api sundaram, ity âha: *kurvan* iti. ata *eva* hetoḥ *naro* jîvo *bhava-chidaḥ* sam̃sâra-vichedikâḥ *kriyâḥ* karmâṇi *kurvan eva*, *çânta-manâḥ* sâvadhâna-cittaḥ *çatam̃ samâ* varshâṇi *jijîvishet* prâṇân dhartum icchet; karmiṇâm eva jîvanam anyeshâm̃ bhastrâ 'iva niçvasitâdi-bhâvaḥ, iti bhâvaḥ. — (*K.* atra 'akriyatvena 'akartṛitvam̃ buddhvâ, 'advaita-jñâna-sâdhyatvam avadhârya, yajñavidyâ 'âha: *pumân* iti. *akartâ pumân katham̃* bhûteçvaratvena 'ukta *îçvaro bhaved*, ity arthaḥ. advaita-jñânasya mukti-hetutâm̃ khaṇḍ[illegible] *kriyâ* iti. *kriyâ* yajñaḥ, saiva *bhava-chedakarî na vastu-dhîr* na 'ad[illegible]-tattva-jñânam̃, tasmâd yajña-*kriyâ eva bhava-chidaḥ kurvan çatam̃ samâ jîvitum iched*, ity arthaḥ.)

Z. 8. *parigraheṇa* svîkâreṇa. — (*K. tathâpi kartâram* iti. akriyatvena 'akartṛitvam̃, çântatvena vishaya-bhoga-râhityam ity âvaraṇena tam̃ *kartâram̃* pâpâdi-kartâram̃, phala-*bhoktâram̃ ca stuvati* pradipâdayanti, *yadi* [illegible] *tum ichasi*, ity arthaḥ.)

Z. 10. *dhûma eva andhakâraḥ*, tena *çyâmalitâ* malitâ jâtâ *dṛik* dṛishṭir yasyâḥ sâ, tasyâḥ *duḥprajñatvam̃* durbuddhitvam̃. duḥprajñatvam eva 'âha: *yena* iti. *yena* hetunâ *evam̃* pûrvokta-prakâreṇa *kutarkena* asat-tarkeṇa *apahṛitâ* vimohitâ.

Çl. 16. tarkâsattvaṁ vyanakti: *ayaḥ* iti. *îçituḥ* îçvarasya *mâyâ* mûlâvidyâ *jaganti* bhuvanâni *tanoti* utpâdayati. mâyâ-prerakatvena îçvarasyâpi ceshṭâvattvam, ity âçaṅkya mâyâṁ viçinashṭi. kîdṛiçî mâyâ: *viçvekshituḥ* viçva-sâkshiṇaḥ *îkshiteṇa* îkshaṇa-mâtreṇa *îritâ* preritâ; bhagavad-îkshaṇa-prerita-mâyâyâḥ sṛishṭi-kartṛitvaṁ, na tu sisṛikshâdy-upâdhi-viçishṭasya kartṛitvam îçvarasya, iti bhâvaḥ. nanv acetanaṁ cetanâdhishṭhitam eva kâryakaraṁ dṛishṭaṁ, yathâ ca bhûr-âdi-mâyâ tv acetanâ, katham îkshaṇa-mâtreṇa kartrî? iti vadan na lajjase, ity âçaṅkya dṛishṭântena 'upapâdayati: *ayaḥ* iti. *svabhâvâd acetanaṁ* cetanâ-çûnyam, ata eva *acalaṁ* jaḍam *ayo* lohaṁ *cumbaka*-pâshâṇasya *sannidhau* samîpe yathâ *balât calati*, evam acetanâ 'vastubhûtâpi mâyâ viçvekshitur îkshaṇeritâ jagan nirmâti. *iyam* eva *îçvaratâ* îçvarasya bhâvaḥ. — (*K.* tasya 'akartṛitve 'pi tat prerita-mâyâ-kartṛitvâdhînaṁ tasya kartṛitvaṁ Vivekaḥ sâdhayati: *ayaḥ* iti. *viçveçitur* viçveçvarasya *îpsiteritâ* sisṛiksheritâ *mâyâ jaganti tanoti, îçitur* viçveçvarasya *iyam* eva *îçvaratâ* svayam akriyo 'pi mâyâ-viçishṭaḥ sakriya iti 'itthaṁ pratipâdite tatra dṛishṭântam âha: *ayaḥ* iti. *svabhâvâd acalam ayo 'cetanaṁ* lauhaç *cumbakasya* ayaskântamaṇeḥ *sannidhau yathâ* tat-tejo *balâc calati*, ity arthaḥ.)

Z. 16. iha jagati yad-ajñânâd rajju-bhujaṅga âvir bhavati, taj-jñânâd eva tiro bhavati na karmabhir avirodhâd, ity abhipretya 'âha: *aprabodha* iti. *aprabodhâd* ajñânât *prabhavo* janma yasya, tâdṛiçaṁ *saṅsâraṁ karmabhiḥ çamayanti yajñavidyâ nûnaṁ* niçcayena *tamasaiva andhatamasam apanetuṁ* tirodhâtum *ichati*, ity arthaḥ. kâraṇâbhâve 'pi kâryaṁ bhavatu, iti jalpanti mandatamâḥ, iti bhâvaḥ. — (*K. andhatamasam* iti avirodhinor api nâçya-nâçaka-bhâvam ichati, ity arthaḥ.)

P. 109.

Çl. 17. nanu âtmâjñânâd âvir bhûtaṁ viçvam âtma-vijñânâd eva tiro bhavati, jñânâjñânayor eva bâdhya-bâdhaka-bhâvo dṛishṭaḥ çâstre, na karma-jñânayoḥ, yato "jñânam ajñânasya ghâtakaṁ" iti çruteḥ; ato vastu-jñânâd eva ajñâna-nâçaḥ, ity abhipretya râjâ âha: *svabhâva* iti. *svabhâva-lînâni* naçvarâṇi, *tamaḥ* ajñânaṁ, *tanmayâni* tat-pradhânâni etâdṛiçâni *sapta bhuvanâni yaḥ* sva-prakâçena *prakâçayet* prakaṭi-kuryât, *tam eva* sva-prakâçaṁ viçva-sâkshiṇaṁ *vidvân* tam eva jânânaḥ *atimṛityuṁ* mṛityum atikrântaṁ parabrahma *eti* prâpnoti. itara-bhinnâtma-jñânaṁ moksha-hetur iti mataṁ nirasyati: *nânya* iti. *bhavaḥ* saṅsâraḥ, tasmâd yâ *muktiḥ* tad-*hetuḥ panthâḥ* upâyaḥ *na 'anyo 'sti*, ity arthaḥ.

"tam eva viditvâ 'atimṛityum eti,
nânyaḥ panthâ vidyate 'janâya"

iti çruteḥ. — (*K.* Vivekaḥ sva-siddhântaṁ nishkṛishya 'âha: *svabhâva* iti. *tamomayâni* iti, ata eva *svabhâva-nîlâni*, ity arthaḥ. *tam eva vidvân* jânan, *eva*-kârât tu dvitîya-vishaya-jñânasya vyavachedas, tathâ ca 'advitîyatvena taṁ sâkshât kurvan, ity arthaḥ. *atimṛityuṁ* muktiṁ.)

Z. 6. *vimṛiçya* vicârya. *durvâsanopâhataiḥ* durbuddhi-grastaiḥ *antevâsibhiḥ* çishyaiḥ. *çlathâdaraiḥ* mandâdaraiḥ *svasya abhilashitaḥ* ishṭaḥ.

Z. 10. *prasthitâ* nirgatâ.

Çl. 18. mîmâṅsâ-svarûpam âha: *vibhajya* iti. *mîmâṅsâ mayâ dṛishṭâ* iti pûrva-phakkikâ-stha-padeshv anvayaḥ çloke sambadhyate. kîdṛiçî mîmâṅsâ: *adhikâraḥ* karma-phala-bhâgitva-rûpaḥ, taṁ *bhajate;* tâni jyotishṭomâdîni *karmâṇi vibhajya* phala-bhedât karma-bhedaṁ pratipâdya; *aṅgaiḥ* prayâjâ-nuyâjâdibhiḥ *vicitraiḥ* nânâbheda-bhinnaiḥ sannipatya 'ârâd upakâribhiḥ, *prâptopadeçaiḥ* sâkshâd upadishṭaiḥ, *atideçaḥ* anyatra çrutasya anyatra sambandhaḥ, tenâpi pramâṇena *prâptaiḥ abhiyojayantî* upakurvâṇâ. punaḥ kîdṛiçî mîmâṅsâ: *çruty-âdibhiḥ* çruti-liṅga-vâkya-prakaraṇa-sthâna-sâmâkhyâdi-*pramâṇaiḥ* anadhigatârtha-bodhakaiḥ *anugatâ* yuktâ. — (*K. mîmâṅsâ* kîdṛiçî: *vibhidya* iti. idaṁ karma, etad adhikârikam ity evam *adhikâra-bhâñji karmâṇi vibhidya* pṛithak pṛithak kṛitvâ. tattad-arthaiḥ *çruti*-rûpair *âdi*-padât smṛiti-rûpaiç ca *pramâṇair anugatâ*. tâny eva *karmâṇi prâptopadeçair aṅgair atideçanair* atideça-labhyaiç ca *aṅgair abhiyojayantî* sambadhnatî. paurṇa-mâsa-yâgâdishu '*upadeças*, tâny eva liṅgâni yajñântare *atideça*-labhyâni. *atideçanair* ity atra 'atidiçyata ity anyato 'pi ca iti karmâṇi yuṭ.)

Z. 18. *abhyarthitavatî* yâcitavatî.

P. 110.

Z. 4. *pârçva-vartinâṁ* samîpa-vartinâṁ kim abhihitaṁ tad âha: *astu* iti. *lokântara-phalaṁ* svarga-sukhâdi-rûpaṁ, tad-*upabhoge yogyasya purushasya upanayane* pratipâdane *upayogaḥ* prayojanaṁ *asyâḥ* upanishadaḥ *asty eva*, iti yojanâ. tataḥ kim? tatra 'âha: *tad* iti. *tad* tasmâd hetoḥ *eshâ* upanishat *karmaṇi upayuktâ dhiyatâm* kriyatâm, ity arthaḥ. *etat* karmopayuktatvam *anumoditam eva*, "sâdhu, sâdhu!" iti svîkṛitam eva. *prasiddhâ* khyâtâ *pratishṭhâ* yasya, tena *mîmâṅsâ* yâ *hṛidayasya* tâtpâryasya *adhidaivataṁ*, tena, adhishṭhâtṛi-devatayâ, ity arthaḥ. *Kumârila-svâminâ* Bhaṭṭâcâryeṇa *proktaṁ* pratipâditaṁ. kiṁ pratipâditaṁ? tad âha: *devi* iti. *upanayati* pratipâdayati. tarhi kîdṛiçaṁ pratipâdayati? ity âha: *kiṁ tu* iti: nanu akartâ abhoktaiva siddhyatâṁ kâ hâniḥ? tatra 'âha: *na ca 'asau* iti. nanv akartur abhoktur îçvarasya karmopayoge bâdhakâbhâvât tâdṛiçasyâpi karmopayogitâ astu, ity âçaṅkya 'âha: *tato 'pareṇa* iti. *apareṇa* mîmâṅsakaikadeça-matâvalambinâ. kim uktam? ity âha: *atha* iti. *laukikât* loka-prasiddhât *purushât* jîvât *anyo nâma îçvaraḥ kim asti?* nâsti ity arthaḥ. *tena* Kumârila-svaminâ "jîvâd anya îçvaro nâsti" iti çrutvâ, *vihasya* ity *uktaṁ*. kim uktaṁ? tad âha: *asti* iti; jîvâd anya îçvaro nâsti, ity arthaḥ. — (*K.* "yasmâd" ity-âdi pâda-traye yat-padânâṁ yajñapatatâṁ buddhvâ, "yânti kṛitinaḥ" ity-antena sâṅsâryâtmalokântara-phala-bhogârthaṁ yaṁ yajñaṁ yânti iti buddhvâ, *asty eva 'asyâḥ* ity-âdi mîmâṅsâyâ uktiḥ. *upanayanena* pratipâdanena. *tatas tena vihasya* iti, *tena* Kumârila-svâminâ upanishat-siddhântânuvâda-rûpam uktaṁ ity arthaḥ, ata eva sva-siddhânta-viruddha-kathane *vihasya* ity uktaṁ.)

Çl. 19. tad eva 'âha *tathâ 'hi, ekaḥ* iti. *ekaḥ* îçvaraḥ *jagatâṁ ceshṭitâni* karmâṇi *paçyati* viçva-sâkshitvâd, ity arthaḥ; *tu* punaḥ *anyo* jîvo *mohândha-dhiḥ* mohâvṛita-jñânaḥ; tathâ 'uktaṁ Gitâyâṁ:

"ajñânena 'âvṛitaṁ jñânaṁ tena muhyanti jantavaḥ";

iti. *eko* jîvaḥ *karma-phalâni* putra-paçv-âdini *vâñchati* kâmayate; *tu* punaḥ *anyaḥ* îçvaraḥ *tâni* karma-phalâni *arthine* abhilâshavate *dadâti*. *eko* jîvaḥ *karmasu* jyotishṭomâdishu *çishyate* niyojyate âjñapyate, iti yâvat; *aparo devaḥ* îçvaraḥ *tanubhṛitâṁ* prâṇinâṁ *çâstaiva*. evaṁ jîvâd ativilakshaṇa îçvaraḥ laukika-purushâd anyo na, iti kathaṁ sambhâvanâpi? ity âha: *niḥsaṅgaḥ* iti. *niḥsaṅgaḥ* saṅga-rahitaḥ, "asaṅgo hy ayaṁ purushaḥ" iti çruteḥ, *purushaḥ*, pûraṇât pûrṇatvâd vâ *purushaḥ*, paramâtmâ *kriyâsu* karmasu *kartâ, iti kathaṁ sambhâvyate?* na kathañcit sambhâvayitum api çakyate, ity arthaḥ. — (*K. ekaḥ* paramâtmâ *jagatâṁ ceshṭitâni paçyati; anyas tu* pâpâdi-kartâ jîvâtmâ *mohândha-dhiḥ. eko* jîvâtmâ karma-kartṛitvât *phalâni vâñchati; anyas tu* paramâtmâ *tâni* phalâni *arthine* jîvâtmane *dadâti. eko* jîvâtmâ *karmasu* pâpa-karmasu kṛiteshu *çishyate* çâstiṁ prâpyate; *aparo devas tanubhṛitâṁ* jîvâtmanâṁ *çâstaiva*, na tu çâsanîyaḥ; ataḥ param âtmabhinnaṁ jîvâtmânam eva bhoktâraṁ bruvatâṁ mate paramâtmana eva kartṛitvaṁ, yau mîmâṅsayâ sambhâvitaṁ, Kumârilasvâmî caturtha-pâdena tan nirasyati: *niḥsaṅgaḥ*, iti. *kriyâsu niḥsaṅgo 'nâsaktaḥ sa purushaḥ kathaṁ kartâ? iti* tvayâ, mîmâṅse, *sambhâvyate*, ity arthaḥ.)

Z. 17. *râjâ* Vivekaḥ. *sâdhu-prajño 'si* utkṛishṭa-buddhir asi.

Çl. 20. svokte 'rthe sammatitvena 'arthataḥ çrutim avatârayati: *dvau* iti. *tau* prasiddhau *suparṇau sushṭu parṇaṁ* gatir yayos tau, "*parṇam*: gatau, sahâye ca, patatrâṅgaruheshv api" iti Viçvaḥ, avyâhata-jñânau, ity arthaḥ; *sayujau* sahayogavantau; *sakhâyau* parasparânukûlau; *dvau* jîvâtma-paramâtmânau *samânam* ekaṁ *vṛikshaṁ* çarîraṁ *parishasvajâte* âliṅgayataḥ, svîkurvâte, iti yâvat. anayor bhedam âha: *tayor* madhye *ekaḥ* jîvaḥ *pakvaṁ pippalaṁ* karma-phalam *atti* bhuṅkte, *anyaḥ* îçvaraḥ *anaçnan* abhuñjânaḥ *abhicâkaçîti* sâkshitvena paçyati, ity arthaḥ. — (*K.* anyopâdeçena jîvâtma-paramâtmanor eka-çarîrâdhishṭhâtṛitvam ekasya ca bhoktṛitvaṁ Vivekaḥ siddhântayati: *dvau* iti. *dvau dvau* iti vîpsâ, *suparṇau* pakshiṇau, prakṛite jîvâtma paramâtmânau, *sahajau* sahacarau, ata eva *sakhâyau samâna vṛiksham* ekaṁ vṛikshaṁ, pakshe ekaṁ çarîraṁ, *parishasvajâte* âliṅgataḥ. *pakva-pippalaṁ* tad-vṛiksha-phalaṁ, pakshe nishpannaṁ karma-phalaṁ svarga-narakâdi, *anaçnan* abhuñjâno *abhicâkaçîti* dedîpyate, ity arthaḥ.)

P. 111.

Z. 6. *upâsyamânâ* sevyamânâ.

Çl. 21. nyâya-vidyâḥ pâtañjala-nyâya-Kaṇâda-nirmitâḥ çâstra racanâḥ pratipâdayati: *kâcid* iti. *kâcit* Patañjali-nirmitâ *viçvasmâd yo viçesho* jagataḥ kleçâdy-asaṅsṛishṭatvâd etat-*kalpana-parâ* tat-pratipâdane *parâ*, ity arthaḥ "âtmâ nirlepaḥ, kleçair apâmṛishṭaḥ, akartâ, abhoktâ" ity evam âdi kal

payanti pâtañjalâḥ; *kâcid dvitva-viçesha-kalpana-parâ* iti pâṭhe; *dvitvâni* utpatti-vinâça-kshaṇa-gaṇanâ-rûpâ ye *viçeshâs*, tat-*kalpana-parâ* tat-patipâdaṇâ-pârâ, Akshapâda-muni-praṇitâ vidyâ. *parâ* Gautama-praṇitâ nyâyavidyâ, *nyâyaiḥ*, *niyate* prâpyate vivakshito 'rtho yais te *nyâyâḥ* pañcâvayavânumâna-vâkyâni, taiḥ *vâdaṁ* tattva-bubhutsuḥ kathâ, *chalam* arthântareṇa prayuktasya çabdasya 'arthântara-varṇanaṁ, *jâtir* asad-uttaraṁ, *nigrahaḥ* parâhaṅkâra-nirâkaraṇaṁ, *tanmayais* tat-pradhânaiḥ *nyâyaiḥ*; *nyâyair* iti trishv api sambandhanîyaṁ; *jalpaṁ* vijigishu-kathâṁ, *vitaṇḍâm api* parapaksha-dûshaṇâvasânâṁ kathâm api, *nyâyais* tarkaiḥ *tanvati* vistârayati. *anyâ* sâṅkhyâ-nirmitâ vidyâ, *prakṛitiṁ* guṇa-traya-sâmyâvasthâṁ jagat-kâraṇabhûtâṁ *vibhajya* pṛithakkṛitya, *purushasya* âtmano *bhidâṁ* bhedam *udâharanti* kathayanti; *mayâ 'valokitâ*, iti pûrva-phakkikâ-sthena anvayaḥ trishv api yojanîyâ. kîdṛiçî sâṅkhya-vidyâ: *mahad-ahaṅkârâdînâṁ sargaḥ* sṛishṭis, tat-*kramaiḥ tattvânâṁ* pañcaviṅçati-tattvânâṁ *gaṇanâ* saṅkhyâ, tasyâṁ *pârâ* sâvâdhânâ; prakṛiter mahân, mahato 'haṅkâraḥ, ahaṅkârât pañca tanmâtrâṇi, evaṁ-gaṇanâ-parâ, ity arthaḥ. etâvatâ sâṅkhya-pâtañjala-nyâya-vaiçeshika-çâstrâṇâṁ kshaṇa-tattvâdi-gaṇanayaiva 'âyuḥ paryavasânât purushârthopayogitvâbhâvâd anâdaraṇîyatvaṁ eshâm, iti bhâvaḥ. —. (*K. kâcid tarka-vidyâ dvaita-viçeshasya* ghaṭâdeḥ paṭâd itaḥ saṅsâry-âtmanaç ca îçvarâd bheda-rûpasya *kalpana-parâ*. *parâ*-anyâ tarkavidyâ *vâdaṁ*, tathâ *sachala-jâti-nigrahamayair nyâyair jalpaṁ vitaṇḍâm api tanvati;* tattva-bubhutsoḥ kathâ *vâdaḥ*, tatra bala-châda-nyâyena *nigrahaḥ*, *sachala* iti *chala-sahitayâ jâtyâ* yo *nigrahas*, *tanmayair*, ity arthaḥ; kvacij jâtyâ, kvacic chalena vâ nigrahaḥ, iti yâvat; anyâbhiprâyeṇa 'uktasya vâkyasya 'anyârtha-kathanena dûshaṇaṁ *chalaṁ*, yathâ Nepâla-deçâd ayam âgato nava-kambalavattvâd ity ukte, kuto 'sya nava-saṅkhyâḥ kambalâḥ? ity uktvâ dûshaṇaṁ; dûshaṇâsamartham uttaraṁ *jâtiḥ;* svapakshâpekshayâ parapaksha-dûshaṇaṁ *jalpaḥ;* parapaksha-dûshaṇa-mâtraṁ *vitaṇḍâ*. *anyâpi* sâṅkhya-rûpâ tarkavidyâ *purushasya prakṛiter bhidâṁ* bhedam *udâharanti mahad-ahaṅkârâdi-sarga-kramais tattvânâṁ* pañca-tanmâtrâ-rûpa-tattvânâṁ *gaṇanâ-parâ;* sattva-rajas-tamasâṁ sâmyâvasthâ *prakṛitiḥ*, *purusha* âtmâ, *pañca tanmâtrâç* ca rûpa-rasa-gandha-sparça çabdâḥ; prakṛiter mahân, mahato 'haṅkâro, ahaṅkârât pañca tanmâtrâḥ, iti *sṛishṭi-kramaḥ.)*

Z. 13. *tathaiva* iti, mîmâṅsâm iva, ity arthaḥ. *tâḥ* vidyâḥ prati *samupasthitâ* âgatâ. *anuyuktayâ* "kiṁ te kâryaṁ?" iti pṛishṭayâ *karma 'udâhṛitaṁ* kâryam uktaṁ. kiṁ tad? ity âha: *yasmâd* iti. *saprakâçopahâsaṁ* spashṭopahâsa-sahitaṁ, yathâ syât tathâ, ity arthaḥ. sopahâsam uktiṁ prakaṭayati: *âḥ vâcâle* iti. *âḥ* iti kope, *vâcâle* anupayukta bhâshaṇa çîle! *paramâṇubhyaç* caturvidhebhyaḥ *viçvaṁ* jagad *utpadyate*, ta eva 'upâdânî bhûtâḥ, ity arthaḥ. îçvara kartṛitvân nimittaṁ kulâlavad, iti bhâvaḥ. anyayâ dûshaṇa-puraḥsaram evam uttaritam ity âha: *anyayâ* iti. *âḥ pâpe* brahmopâdâna-vâdini! brahmaiva 'upâdânam iti matvâ, upâdânatvâd vikâritvaṁ, yathâ ghaṭa-çarâvâdi-rûpeṇa tathâ brahmaṇa upâdânatve vikâritvaṁ, vikâritvân

naçvaratvam, iti vadanti na 'apatrapase, iti tâtparyârthaḥ. *sâṅkhya-vidyayâ* 'idam uttaram abhâṇi, ity âha: *nanu* iti. *re* iti dhik sambodhane, *pradhânât* prakṛiter eva upâdânât *viçvotpattiḥ*, purushasya tu pushkara-palâçavan nirlepatvâd, iti bhâvaḥ. uktaṁ ca:

"mûlaprakṛitir avikṛitir, mahad-âdyâḥ prakṛiti-vikṛitayaḥ sapta,
shoḍaçakas tu vikâro, na prakṛitir na vikṛitiḥ purushaḥ;"

iti. — (*K.* "yasmâd viçvam udeti" ity atra dugdhaṁ vikṛityâ dadhivad ayaṁ vikṛitya viçvam udeti 'ity-arthaṁ buddhvâ *anyayâ* sâṅkhya-vidyayâ *sakrodham uktam*, ity arthaḥ.)

Z. 18. aneka-kutarkopaplave avaçyâpekshaṇîyo vivekaḥ, ity âha, *râjâ* Viveko durmatitvam upapâdayati: *etad* iti. *paramâṇavaç ca pradhânaṁ* prakṛitiç ca, tayor *upâdâna*-kâraṇaṁ samavâpi-kâraṇaṁ *sarvaṁ prameyaṁ* pramâvishayaḥ pakshaḥ, utpadyate kâryatvât *ghaṭavat* yan naivaṁ, tan naivaṁ yathâ 'âtmâ ity anvayaḥ; vyatirekeṇa paramâṇu-pradhânâdinâm utpattimatve bhâva-kâryatvât sopâdânatvaṁ vâcyaṁ, upâdâna-gaveshaṇâyâm anyasya 'abhâvâd âtmaiva 'upâdânaṁ, na ca vikâritvotpattir, iti vâcyaṁ, adhishṭhâtṛitvâd ity avagantavyaṁ. vistaraḥ çâstrât jñâtavyaḥ. — (*K. paramâṇubhyo viçvam utpadyate* iti vâdinaḥ pratyâha: *sarvaṁ prameya* iti. *sarvaṁ ghaṭâdivat prameya-jâtaṁ kâryam*, ity ataḥ *paramâṇûnâṁ prâdhânyam apy apekshaṇîyam eva*, ity arthas, tathâ ca tad-aṅçe tanmata-svamatayor na vivâdaḥ, ity *etad api na jânanti* ity arthaḥ. kiṁ tu paramâṇu-prâdhânyâpekshâpi 'içvara-tattva-jñânâbhâva-daçâyâṁ.)

P. 112.

Çl. 22. etad eva 'upapâdayati: *tathâ hi, ambhaḥ* iti. *etat* paridṛiçyamânaṁ *jagat kâryam*, ata eva *asatyaṁ* mithyâ anirvacanîyam, ity arthaḥ. kâryatve hetum âha: *meyam* iti, jñâna-gocaraṁ, ity arthaḥ. yataḥ jñânavishayaḥ, ataḥ kâryaṁ, ity arthaḥ. asminn arthe dṛishṭântâḥ: *ambhaḥ çîtakaraḥ* jala-candraḥ; *antariksha-nagaraṁ* gandharva-nagaraṁ; *svapno* loke prasiddhaḥ; *indrajâlaṁ* mantrâdinâ anyathâ vidyamânasya 'anyathâ pratîtiḥ; *âdi*-padâd anye bhramâḥ pîtaçaṅkhâdayaḥ, tadvat; yathâ jala-candrâdayo meyatvât kâryatvâd anirvacanîyâḥ, evaṁ jagad, iti dhvanitaṁ. jagataḥ kâryatvam upapâdayati: *udayaḥ* utpattiḥ, *dhvaṅso* vinâçaḥ, *âdi*-padâd vṛiddhy-apacayau, tad-*yuktaṁ;* jagato jaḍatvâd asvaprakâçatayâ jñâna vishayatvaṁ, âtmanaç tu svaprakâçatayâ na jñâna-vishayatvaṁ, iti bhâvaḥ. nanu anityatve 'pi jagataḥ na kadâcid anidṛiçaṁ jagad ity ukteḥ, jagata eva rûpeṇaiva sarvadâ-satvât kathaṁ muktir? ity âçaṅkya 'âha: *svâtmâvabodha* iti. *svâtmâvabodhe* svâ-prakâçe *Harau*, haraty ajñânaṁ tat-kâryam, iti *Hariḥ* parabrahma, tasmin *ajñâte* sati *jagat prabhavati* utpadyate, *atha* anantaraṁ *tattvâvabodhodayât* tattvâvabodhasya advitîya-brahma sâkshâtkârasya *udayât* utpatteḥ *jagat astamayate* pralîyate. ubhayatra dṛishṭântaḥ: *çuktau rûpyam iva, sraji* mâlâyâṁ *bhujagaḥ* sarpa *iva*, yathâ çukty-ajñâne mâlâjñâne ca rajatam utpadyate, sarpaç ca 'utpadyate, tayoç ca tattvâva

bodhâd ubhayaṁ vilîyate, evam âtmâjñânâj jagad vivartate, tâj-jñânât vilîyate, ity arthaḥ. na kadâcit yuktis tu jagataḥ bahukâlâvasthâyitvena 'upapadyate, anyathâ çruti-virodhaḥ, iti bhâvaḥ. — (*K.* jâgrat-svapnena 'asatyam eva gṙihyate, ity âha: *api ca* iti. *ambhasi* pratibimbitaḥ *çîtakaraç* candraḥ; *antarikshe* tad-bhramena dṙiçyamânaṁ *nagaraṁ; svapna*-darçanam; *indrajâlâdi* ca. yathâ tattat *kâryaṁ*, tathâ *meyam udaya-dhvaṅsâdi-yuktam etad asatyam* eva, tarhi "kathaṁ gṙihyate?" ity atra 'âha: *çuktau* iti. svâtmaiva '*avabodhas*, tat-svarûpe *Harâv ajñâte*, tâdṙiçam asatyam api kâryajâtaṁ, *çuktau rûpyam iva, sraji bhujaga iva prabhavati* jñâna-vishayîbhavati, *atha* 'anantaraṁ *tattva-prabodhodayâd astamayate* jñânâvishayî-bhavati, ity arthaḥ.)

Z. 7. pâtañjala-pûrva-paksham adhikshipati: *vikâra* iti. *mugdha-badhûḥ* pâmara-strî, tasyâḥ *vikalpo* manaso vikâraḥ, tasya *vilâsitam iva* ceshṭitam iva *vikâra-çaṅkâ*, çûkam api nâsty âropyâ, iti bhâvaḥ. — (*K.* "katham îçvaram eva vikâriṇam âpâdayasi?" iti vâdinaṁ sâṅkhyavidyâṁ pratyâha: *vikâraḥ*, iti. *mugdhâyâḥ* sundaryâ *badhvâ* yac ceshṭitaṁ, tattad eva *vilasitam* iti; yathâ kâmopâdikaṁ jñâyate, tathâ sva-vikâreṇa viçvotpâdakatvam îçvarasyâpi mithyâ-vâsanopâdhikam eva jñâyate, ity arthaḥ.)

Çl. 23. vikârâbhâvaṁ prakaṭayati: *tathâ hi, çântam* iti. *çântam* âvikâri *jyotiḥ* prakâçântarânapekshaṁ *niḥkalaṁ* nirañçaṁ, *nirmalam* ajñâna-çûnyaṁ ca; *anuditaḥ* na uditaḥ utpannaḥ, *na astaḥ anastaḥ*, ata eva *nityo* yo *prakâçaḥ* tad-rûpaṁ; etair viçeshaṇaiḥ sarvathâ vikâra-yogyatâpi nâsti, iti sûcitaṁ. îdṙiçaṁ *viçvotpattau vikṙitiṁ* vikâraṁ *kathaṁ vrajati* prâpnoti? na katham api, ity arthaḥ. amum arthaṁ loka-siddha-dṙishṭântena niçcinoti: *çaçvan* nirantaraṁ *nîlotpala-dalavat ruk* kântiḥ yâsâṁ tâs, tâsâm *ambuvâhâḥ* meghâs, teshâm *âvalînâṁ* paṅktînâṁ *prâdurbhâve* sati utpattau satyâṁ *nabhasaḥ* âkâçasya *kîdṙiço vâ* kîdṙiço 'pi *vikâraḥ bhavati?* api tu na, ity arthaḥ. — (*K.* vastutas tu nirvikâra eva 'îçvaraḥ, ity âha: *tathâ hi*, iti, *çântam* ity-âdi. avidyâvṙitatvena '*anudito* 'vijñâta *ânanda*-rûpo *nitya-prakâço* yasya, tâdṙiçaṁ *çântaṁ jyotir* îçvarâkhyaṁ *kathaṁ* viçvotpattau *vikṙitiṁ vrajati?* kîdṙiçaṁ: *nishkalaṁ* niravayavaṁ, *nirmalaṁ* pâpa-rûpa-mala-rahitaṁ dedîpyamânaṁ vâ. nanu tasmâd viçvotpattau kathaṁ tasya na vikâraḥ? ity ata âha: *çaçvad* iti. *nîlotpala-dala-rucâm ambuvâhâvalînâṁ viyataḥ çaçvat prâdurbhâve, viyato kîdṙiço vikâraḥ*, ity arthaḥ.)

Z. 12. *prîṇayati* santoshayati. *vimarço* vicâraḥ.

Z. 14. *nâstika-pathaṁ* veda-nindaka-mârgaṁ. *nigṙihyatâṁ*, badhyatâṁ. *sasaṅrambhaṁ* sakopaṁ. — (*K. aho viçva-vilayena* iti "atha astamayate tattva-prabodhodayâd" ity uktatvât.)

Z. 18. *parikramya* nirgatya. *Mandara-çailasya* parvatasya *upa* samîpe *kalpitasya* nirmitasya. *nâtidûre* nikaṭe.

P. 113.

Z. 5. *devatâyatanât* devagṛihât. *purushaiḥ gadâ-pâṇibhiḥ atikrântâḥ* atikramya ullaṅghya *dig-antaṁ* gatâḥ vidyâḥ *sarvâḥ*.

Z. 7. *atikrâmataḥ* abhibhavataḥ. svâdhyastaṁ viçvaṁ tâdâtmya-sambandhât sâkshâd îkshate, iti *viçva-sâkshî*. *kshamate* soḍhuṁ çaknoti, ity arthaḥ.

Çl. 34. prâktanasya padyasya 'anyad uttarârdhaṁ paṭhati: *chinnâ* iti. *muktâvaliḥ* muktâ-hâraḥ *troṭitaḥ; aṅgât srastaṁ* adhaḥ-patitaṁ *dukûlam apahṛitaṁ* balâd gṛihîtaṁ; *atha* anantaram *ahaṁ bhîtâ* satî *Gîtâçramaṁ pravishṭâ*. kîdṛiçî ahaṁ: *galati* skhalati *nûpure* caraṇa-bhûshaṇe yasyâḥ, sâ. — (*K. devâyatanâd adûre mama bâhu-kaṅkaṇâdi-bhaṅgâdikaṁ kṛitaṁ*, ity arthaḥ. *dukûlam aṅgât srastaṁ* sad *apahṛitaṁ*, ity arthaḥ. aṅgât srastîkṛitya 'apahṛitam, iti paryavasitaṁ. pâda-trayânantaraṁ tad-uttaraṁ saṅskṛita-mâtreṇa kathayitvâ, caturtham âha: *bhîtâ* iti.)

Z. 13. *vatsayâ Gîtayâ* upanishan-mûlatvât vatsayâ ity uktaṁ. *mâtar mâtar* iti "uktvâ" iti çeshaḥ; *mâṁ parirabhya* âliṅgya aham *upaveçitâsmi* iti yojanâ. *vidita-vṛittântayâ* jñâta-samâcârayâ. *asurâṇâṁ* daityânâṁ *sattvavan* manovat *sattvaṁ* ceto yeshâṁ te, nirdaya-hṛidayâḥ, ity arthaḥ. *pravartishyanti* pravartishyante. *çâstâ* daṇḍakartâ. kutra 'uktaṁ? ity âha: *tathâ ca Gîtâ* iti, Gîtâyâm, ity arthaḥ.

Çl. 25. uktam âha. *tân* iti. *ahaṁ tân krûrân*, ata eva *narâdhamân*, tathâ *dvishato* dvesha-yuktân, *açubhân* pâpishṭhân, *saṅsâreshu âsurîshv eva yonishu* daitya-yonishu *ajasram* anavarataṁ *kshipâmi;* teshâṁ kadâpi saṅsârân nistâro nâsti, iti bhâvaḥ. — (*K. tân aham* iti Gîtâ-çlokaḥ. *tân narâdhamân* adhama-narân *âsurîshv eva yonishv ajasram* eva *kshipâmi*, ity arthaḥ.)

P. 114.

Z. 3. *sakopam iva* ity atra vilokya vadati iti çeshaḥ. vahirmukhaṁ prati katham âtma-svarûpaṁ varṇayituṁ çakyate? ity âha: *ko nâma* iti. *ko nâma* janaḥ *âtmânaṁ* sva-svarûpam *ajânantaṁ prati uttaraṁ dâsyati?* na ko 'pi, ity arthaḥ. *andham iva* iti dṛishṭântaḥ, yatha 'andhaṁ na ko 'py uttarayati, tathâ, ity arthaḥ.

Z. 5. (*K. katham âtmâ îçvaraḥ* iti, katham ahaṁ, ity arthaḥ.)

Çl. 26. sva-svarûpâbhedam upapâdayati: *asau* iti. *asau* aparokshaḥ *pumân*, "yat sâkshâd aparokshâd" iti çruteḥ, *tvad-anyas* tvattaḥ anyaḥ bhinno *na* "bhavati" iti çeshaḥ; "udaram antaraṁ kurute, atha tasya bhayaṁ bhavati" iti çruteḥ. *bhavân purushottamât devât* paramâtmanaḥ sva-prakâçât, "uttamaḥ purushaḥ tvad-anyaḥ paramâtmâ 'ity udâhṛitaḥ" iti çruteḥ; *paro* 'nyo *na*, "tattvam asi" iti çruteḥ. kîdṛiçaḥ pumân: *sanâtanaḥ* avinâçî. nanu bâdhitam arthaṁ vedo 'pi kathaṁ bodhayet, sûryo, yûpo, yajamânaḥ, prastaraḥ, ity-âdivat, kiṁ ca, pratyaksha-pariṇâma-gṛihyamâṇe bhede kathaṁ svarûpâdvaitaṁ pratipâdyate? ity âçaṅkya, bhedas tv anyakṛito na vâstavaḥ,

ity âha: *sa eva* iti. *sa eva* îçvarâbhinna eva *tvam anâdi-mâyayâ* anâdy-avidyayâ *bhinno* bhedaṁ gataḥ: nanv âvidyake 'pi bhede sati, katham aham îçvaro bhaveyaṁ? ity âçaṅkya mithyâbhûto bhedaḥ pâramârthikam abhedaṁ na viroddhuṁ çaknoti, ity âha: *salile* jale *vivasvataḥ* sûryasya *bimbaṁ* maṇḍalaṁ *dvidhâ 'iva* dviprakâram iva; tathâ 'uktaṁ:

"eva eva hi bhûtâtmâ bhûte bhûte vyavasthitaḥ,
ekadhâ bahudhâ caiva dṛçyate, jala-candravat;"

iti. adhikaṁ çâstrâd avagantavyam, iha vistara-bhayâd viramâmaḥ. — *(K. asau sanâtano* nityaḥ *pumân na tvad-anyaḥ*, tasmât *purushottamât devât bhavân na paro* na 'anyaḥ. *tad-anâdi-mâyayâ* tadîyayâ anâdi-mâyayâ kâraṇa-bhûtayâ *sa eva bhinnaḥ, salile vivasvato bimbam iva dvidhâ* pratîyate, ity arthaḥ.)

Z. 11. tattvam asya 'âdi-vâkyâd api jâyamânaṁ jñânaṁ vinâ anavadhâraṇam eva, ity âha: *bhagavan* iti.

Çl. 27. asambhâvita eva 'ayam arthaḥ, ity âha: *avachinnasya* iti. *iyaṁ devî* upanishat *avachinnasya* çarîrâvachinnasya parichinnasya, iti yâvat. *bhinnasya* bheda-buddhyâ gṛhîtasya, *jarâ-maraṇe dharmau* yasya, etâdṛçasya *mama* nitya-sukha-jñâna-svarûpatâm *bravîti* nirûpayati; idam asambhâvitaṁ lakshyate, ity arthaḥ.

Z. 14. *padârthânavajñânât* tattva-padârthayoḥ samyag anavabodhât *vâkyârtho na 'avagamyate*, iti; upanishat-pratipâdita-tattvasya âdi-mahâvâkyârthasya akhaṇḍaika-rasasya jîva-parabhedasya 'anirdhâraṇâd, ity arthaḥ.

Z. 16. *tad-avabodhâya* vâkyârtha-jñânâya. *bhavân* Vivekaḥ. *âjñâpayatu* eva, iti kathayatu.

Çl. 28. *cid-âtmani* tat-padârthe niḥkṛishṭeçvara-caitanye, *tvam-arthe* tvaṁ-padârthe niḥkṛishṭa-jîva-caitanye *parijñâte* samyag avabuddhe sati, *punar* anantaraṁ *tattvam asi* iti vâkyaṁ *çrutvâ*, *tad âtma-prabhaṁ* sva-prakâçaṁ *jyotiḥ antar* mano-vṛittau akhaṇḍa-vâkyârtha-rûpaṁ *samuddyotate* prakâçate; tathâ 'uktaṁ Chândogye: "tat satyaṁ, satvam âtmâ, tattvam asi, Çvetaketo!" iti. jyotisho viçeshaṇaṁ: *nirupadravam uditânandam* anastamita-sukha-rûpaṁ. tattva-padârtha-prakâram âha, kasmin sati: *eshaḥ* ahaṁkâraḥ *na asmi, iti cittena sârdhaṁ* manasâ saha *vivicya* pṛithak kṛitvâ, *paritaḥ* samantât sarveshâṁ *tattvânâṁ vilaye* vinâçe *kṛite* sati; arthâd Vivekataḥ tat-tvaṁ-padârtha-çodhanât, asambhâvanâdi-nivṛittau. "tattvam asi" ity-âdi-mahâ-vâkyâvadhâraṇaṁ niçcaya-rûpaṁ bhavati, iti bhâvaḥ. — *(K. cittena sârdhaṁ vivicya* vivecanâṁ kṛitvâ, *paritas tattvânâṁ* ghaṭa-paṭâdi padârthânâṁ *na iti vilaye kṛite*, sarvaṁ na 'iti vijñâte, ity arthaḥ; tata *esho 'smi 'iti cid-âtmani* jnâna-svarûpâtmani *parijñâte* sati, *tattvam asi 'iti* "tat brahma-svarûpam ahaṁ-padârtho 'pi tat tvam asi" iti çruti-vâkyât *çrutvâ*; *tvad-arthe punar jñâte* sati; *âtmani prabhâ* yasya, tâdṛçaṁ *sva-prakâçaṁ*, *nirdhûta-bhavam dhvântaṁ, çântaṁ, taj jyotir antaḥ samuddyotate* prakâçate. kîdṛçaṁ: *anantaṁ* nityam *uditânandaṁ* vyâptânanda-svarûpaṁ.)

P. 115.

Z. 3. *paribhâvayati* cintayati.

Z. 4. çravaṇa-manane nirûpite idânîñ *nididhyâsana*-praveçam âha: *tataḥ* iti. (*K. nididhyâsanañ* carama-yoga-viçeshaḥ.)

Z. 5. *nitarâñ gûḍhañ* guptañ yathâ syât tathâ *vivekena saha upanishad asmad-abhiprâyañ bodhayitavyâ*, iti yojanîyañ, guptâ asmadîya-vârtâ upanishad-vivekayor agre kathanîyâ, ity arthaḥ. kiñ bodhayitavyâ? ity âha: *tvayâ ca* iti. *purushe* viveke. *janântikañ* loka-samakshañ. *samâdishṭam* artham âha: *yathâ* iti. *saṅkalpa-yonayaḥ saṅkalpo* manaso vyâpâraḥ, sa eva *yoniḥ* utpattiḥ kâraṇañ yâsâñ, tâḥ *devatâ bhavanti;* saṅkalpa-mâtrâd eva 'utpattiḥ, na maithunena, ity arthaḥ. "brahma vâ idam agra âsîd" ity ârabhya, "idañ sarvam abhavad" ity antena saṅkalpa-prabhavatvañ darçitañ Vřihadâraṇyake. tvayâ katham etat jñâtam? ity âha: *mayâ* iti. *samâdhânena* yoga-sâmarthya-janya-dhyânena, ity arthaḥ. *âpanna-sattvâ* svîkřita-garbhâ; viveka-saṅkalpâd eva garbhâdhânam, iti bhâvaḥ. *krûra-sattvâ* krûrâbhiprâyâ jagad-vinâçakatvât. *prabodhacandrodayaç ca tatra manasi saṅkarshaṇa-vidyayâ* yogena 'âkarshaṇa-rûpayâ vidyayâ *vidyâm* âtma-sâkshâtkâra-rûpâñ *saṅkrâmayishyati*, iti yojanâ. "çrûyate hi saṅkarshaṇa-vidyayâ Saṅkarshaṇo devo Devakî-jaṭharât Rohiṇî-jaṭharañ prâpitaḥ," iti çrîmad-Bhâgavate çravaṇa-manane nirûpite ity 'uktañ; tatra *çravaṇañ* nâma 'advaite brâhmaṇi upanishad-antât paryavadhâraṇañ, *mananañ nâma* yuktibhiḥ anucintanañ, ete arthân nirûpite; *nididhyâsanañ* nâma vijâtîya-pratyaya-tiraskâreṇa sajâtîya-pratyaya-pravâhîkaraṇañ; tad apy arthâd eva iti jñâtavyañ. vidyâyâḥ antaḥkaraṇa-vřitti-rûpatvân manasi saṅkramaṇañ yuktañ, iti bhâvaḥ. — (*K. nigûḍham* iti *saṅkalpa-yonaya* ity-âdinâ vakshyamâṇam *asmad-abhiprâyañ*. *vivekena saha upanishat prabodhyatâm*, ity arthaḥ. *purushe vastavyañ* purushe vâsaḥ kâryaḥ. *janântikañ* karṇe kathâ.

Z. 18. *dhyânañ nâṭayati* vistârayati.

Z. 19. (*K. nepathye* açarîrâyâḥ Sarasvatyâ bâṇî: *âçcaryam âçcaryañ.)*

P. 116.

Çl. 25. *iyañ kanyâ* vidyâ-rûpâ *sahasâ* akasmâd *antardhânañ bhajati* tirodhânañ prâpnoti. kîdřiçî kanyâ: *manaso vakshaḥ-sthalañ nirbhidya* "nirgatâ" iti çeshaḥ. kîdřiçañ vakshaḥ-sthalañ: *pratyakshañ* samakshañ *sphuṭanti* bhidyante *utkaṭâni* sthûlâni *asthîni* yasmin, tat. punaḥ kîdřiçî kanyâ: *uddâmâ* apratihatâ *dyutayaḥ* prakâçâḥ, teshâñ *dâmabhiḥ* mâlâbhiḥ, *taḍid iva* vidyud iva *diçaḥ pradyotayanti* prakâçayanti. punaḥ kîdřiçî kanyâ: *parikaraiḥ* sevakaiḥ kâmâdibhiḥ *samañ* sârdhañ *mohañ grasanti* gilanti; utpanna-mâtrâ vidyâ mohâdi-sarvañ vinâçya svayam api naçyati, iti bhâvaḥ. *ca* punaḥ eshaḥ *çrîmân prabodhodayaḥ* niratiçaya-brahma-prakâçaḥ *ekañ purushañ* kshetra-sañjñañ saṅkshipya *upaiti* âvir bhavati; *ca*-kâro *bhajaty upaityoḥ* samâna-kâlârthaḥ. — (*K. iyañ kanyâ* vidyâ-rûpâ kanyâ *parikaraiḥ* yogopasargaiḥ *samañ mohañ grasanti sahasâ antardhânañ bhajati*, *esha ca*

çrîmân prabodhodayaḥ purusham upaiti. kanyâ kiṁ kṛitvâ: mohaṁ grasati ity atra 'âha: *pratyagra* iti. *pratyagraṁ* kâlaṁ *sphuṭaṁ* dvidhâ-bhavat *utkaṭam asthi* yasmât, tâdṛiçaṁ yathâ syât tathâ *manaso vakshaḥ-sthalaṁ nirbhidya* vidârya. kîdṛiçî kanyâ: *uddâma-dyutibhir dhâmabhis* tejobhir *diçaḥ pradyotayanti, taḍid iva.)*

Çl. 30. *so 'haṁ prabodhodayo* 'smi. saḥ kaḥ: *yasmin* prabodhe *abhyudite* jâte *trailokyaṁ* jagat *evam* anena prakâreṇa. *vitarka-padavîṁ* tarka-vishayaṁ *na samârohati* na prâpnoti. kîdṛiçaṁ trailokyaṁ: *sahaja-prakâçena* svâbhâvika-prakâçena *dalitaṁ* vinâçitaṁ. tarkam eva prakaṭayati: *kiṁ vyaptaṁ* kim âkrântaṁ? *kim apohitaṁ* durîkṛitaṁ? *kimu hṛitaṁ* nîtaṁ? *kiṁ vâ* kimu *samutsâritaṁ? kiṁ nu syûtaṁ* uccâvaca-vastravat-samîkṛitaṁ? *kim idaṁ nu vilâyitaṁ* syât na ghṛitavat drâvî-kṛitaṁ? *kiñcid* "asti?" iti çeshaḥ. *vâ ity* athavâ *kiñcana* kim api *na* asti? ity arthaḥ. *kim* ity-âdi vitarkârthe. âtmaprabodhe samyag udite sâṁsârika-trailokya-vishayâneka-tarka-karkaça-paribhâvanâ vilîyate, anyathâ tarka-durgama-prâkâra-vikâra-parikhâbhir âvṛito na kañcana gaṇayati, iti bhâvaḥ. nirvikalpaka-rûpatayâ vidyâ-prabodhodayor âkâro nirûpayituṁ na çakyate, iti tayor avasthaiva pâtra-dvârâ nirûpitâ, iti jñeyaṁ. — *(K. so 'haṁ prabodhodaya* udiyamânaḥ prabodhas tattva-jñâna rûpo, *yasminn abhyudite sahaja-prakâçena dalitam* ujjvalî-kṛitaṁ *trailokyaṁ* naiva *vitarka-padavîm ârohati*, vitarkaç ca 'atra sambhâvanâ. utsârite dîpâdinâ 'apasârite 'ndhakârâdau, *kim utsâritam?* iti sambhâvanâ. syûte vastrâdau, *syûtaṁ kiṁ nu?* iti sambhâvanâ. visarpite bâlyâdau, *visarpitaṁ nu kim idaṁ?* iti sambhâvanâ eka-padârthe 'para-padârtha-bhrama-rûpâ. *kiñcin nu? vâ kiñcana?* iti sambhâvanâ, sâ ca sthâṇâ "vayaṁ nu purushaḥ?" ity evam-âdi-rûpâ; trailokyam evaṁ vitarka-padavîṁ na samârohati, sarvapadârthâdvaita-bhâvane kim api kiñcittvena na bhâsate, ity arthaḥ.)*

Z. 13. prabodhasya jâtatvâd *vatsa* iti sambodhanaṁ.

Z. 15. *vighaṭitaṁ timira-paṭalaṁ timiram* ajñânam eva *paṭalam* âcchâdakaṁ *vighaṭitaṁ* vinâçitaṁ yasmin, evaṁ-bhûtaṁ *prabhâtam* iva *saṁjâtaṁ*; sâṁsâraja-râtry-apagamâd bodhaḥ prâtaḥ-kshaṇo mataḥ, ity uktatvâd, iti bhâvaḥ.

Çl. 31. tad eva darçayati: *tathâ hi, moha* iti. *ko 'pi* viçishṭyâ avâkyavacanaḥ, *tushârâ* himâ *raçmayo* yasya, *bodhaç* ca 'asau *tushâra-raçmiç* ca tâdṛiçaḥ prabodhacandraḥ, ity arthaḥ, *ajani* prâdur bhûtaḥ, *yena* prabodhacandreṇa *çraddhâ-viveka-mati-çânti-yamâdi viçvâtmakaṁ* jagad-rûpaṁ *"sa esho 'ham Vishṇur"* iti *sphurati* prakâçate. kim kṛitvâ: *mohaḥ* saṁsâra-hetur ajñânaṁ, tad eva *andhakâram* âvaraṇam *avadhûya* nirasya; *vikalpo* bhrama eva *nidrâ*, tâm *unmathya* tyaktvâ. *yamâdikena* iti pâṭho, *yamâdikena bodhatushâra-raçmir ajani*, ity anvayaḥ. — *(K. ko 'pi* mama *bodha*-rûpas *tushâraraçmiç* candro *ajani*. kiṁ kṛitvâ: *moha*-rûpam *andhakâram avadhûya*, svasahajayâ vidyayâ tad-grasanam eva tad-avadhûnanaṁ bodhyaṁ; *vikalpas* tattat padârtheshu tattad-viçishṭa-jñânaṁ jâgrat-svarûpaṁ, tâdṛiçîṁ *nidrâṁ*

svapnam *unmathya*, anena bodhodayena hetunà *çraddhâdikam* Vishṇv-âtmakam *sphurati: aham* api, *sa esha Vishṇuḥ.)*

P. 117.

Çl. 32. utpanna-brahma-sâkshâtkârasya vartamâna-prârabdhasya 'avasthâm âha: *sañgam* iti. *so 'ham sâyañgṛihaḥ sâyam-kâlena* viçishṭam sthânam eva *gṛiham* yasya sa sâyañgṛihaḥ, *munir* manana-çilaḥ *sadyo bhavitâ* idânim bhavishyâmi, ity arthaḥ. *sañgam kenacid* kenacid *api na upetya* aprâpya. *kim api apṛichan* na pṛishṭavân. tathà *diçam vidiçam vâ* âgreyâdi *na tarkita-phalam* prayojanam yathâ syât tathà *gachan* paribhraman. *çânto* râga-dveshâdi-çûnyaḥ, *vyapetâh* gatâḥ *bhayam* ca, *çokaç* ca, *kashâyaç* ca prârabdhâtirikta-karma-phala-bhogaḥ, *mohaç* ca yasmât, tâdṛiçaḥ. — *(K. so 'ham idânîm kenacit* saha *sañgam na upetya; kam apy apṛichan; atarkita-phalâm* asambhâvita-phalàm *diçam vidiçam vâ gachan; çânto* vyapeta-bhayâdiḥ *sâyañgṛihaḥ* sâyaṅkâla-gṛihita-nivâsa-sthâno *munir aham bhavitâsmi,* ity arthaḥ. *kashâyaḥ* ity atra krodhaḥ.*)*

Z. 11. *praçântârâtim* nirdalita-moham. *bhavantam* Vivekam.

Z. 16. *ataḥ param ato* 'smât *param* utkṛishṭam.

Çl. 33. "ataḥ param" ity uktasya 'artham vadan phalitam artham âha: *praçânta* iti. *vivekaḥ kṛita-kṛityatâm agamat* parinishpanna-kâryo 'bhût. kîdṛiçaḥ vivekaḥ: *praçânto* dhvastaḥ *arâtiḥ* moha-rûpo çatrur yena saḥ; yad và: *prakarsheṇa çânto arâtiḥ* shaḍvargo yena; vidyâ-prabodhau çrimatyà Vishṇubhaktyâḥ prasâdât mahâmoham sasainyam vinâçya çrimatà vivekena samutpâditau, iti dhvanitam. bho *nîrajâkshi* kamala-nayane! *sad-ânande pade* avinâçi-parabrahma-pade jîvanmukti-lakshaṇe *aham niveçitaḥ* sthâpitaḥ; ito 'nyaḥ purushârtho nâsti, iti bhâvaḥ. *nîrajaske* iti pâṭhe, *nirgatam rajaḥ* âvaraṇa-rûpam yasmât, tasmin nirâvaraṇe *pade* ity asya viçeshaṇam. — *(K. nîrajaske* nirmale *sve pade* sthâne *niveçito* 'bhishikti-kṛitaḥ bheda-buddhi-vyudâsâd, iti bhâvaḥ.*)*

P. 118.

Çl. 33. sakala-çâstra-rahasyam Prabodhacandrodayâkhya-nâṭaka-chalena âpâtataḥ pradarçya, sthale sthale pûrvapakshâparapakshau kṛitvà, vedânta siddhântân api pradarçya, viveka-puraḥsaram kâma-krodhâdi-pâkhaṇḍâgama-parâjaya-dvârà ca sarvân api saṁsâra-nirâkaraṇa-paripanthinaḥ parâbhûya, antevâsinam api dayâ-pâtram samyag avabodhya, Vishṇubhaktim prârthayantaḥ çrì-Kṛishṇa-Miçrâḥ granthânte âçir-lakshaṇam mañgalam âcaranti: *parjanyaḥ* iti. *parjanyo* jala-pûrṇo meghaḥ *asmin jagati asyâm* bhûmau *mahatîm vṛishṭim*, samaye yâvad apekshitâm *ishṭâm* iti-padena 'ati-vṛishṭim nivârayati, *vidhattâm* karotu. *galito* nashṭaḥ *upaplavo* deça-râjyâdy-upadravo yebhyas, te *râjânaḥ kshmâm* pṛithvim *pâlayantu*. *saṁsâribhya* âçisho datvà, jñanibhyo 'pi dadâti: *mahântaḥ* jñâninaḥ *tvat-prasâdât* Vishṇubhakti-prasâdât *saṁsâra* eva *abdhiḥ* samudraḥ, tam *tarantu; samudra*-sâmyam âha:

vishayâḥ sraj-âdayaḥ *mamatâ* mamatvâbhimâninaḥ, *âtanko* bhayaṁ, etâny eva *pankaḥ* kardamo yasmin, taṁ. kîdṛiçâḥ mahântaḥ: *tattvânâm unmeshaḥ* sâkshâtkâraḥ, tasmâd *upahataṁ* vinâçitaṁ *tamaḥ* ajñânaṁ yeshâṁ, te; Vishṇubhakteḥ prasâdât sarvaṁ prâpyate, iti bhâvaḥ. —. *(K. tathâpy etad astu* iti. etac ca sarva-nâṭakânâm ante prakṛita-vaktr-uktam api naṭa-kriyamâṇa-sabhâçîrvâda-rûpaṁ bodhyaṁ. *asmin jagati parjanyo* megha *ishṭâṁ mahatîṁ vṛishṭiṁ vidhattâṁ* janayatu. *çamito* nâçito lokânâṁ *vividha upaplavo* yais, tâdṛiçâ *râjânaḥ kshmâṁ* pṛithivîṁ *pâlayantu. mahânto* yoginas *tvat-prasâdât* tattvonmeshâd *apahata-tamo* yathâ syât tathâ *sansârâbdhiṁ tarantu.* kîdṛiçaṁ: *mamatâtankâv* eva *panko* yatra, tâdṛiçaṁ.*)*

Saprâkṛitaṁ sanskṛitam atra kiñcid
vyâkhyâta-tâtparyam avarṇikaṁ cet,
tatrâpy açuddhaṁ yadi kiñcid asti,
tac chodhanîyaṁ vibudhair, na mûrkhaiḥ.

Mangalaṁ lekhakânâṁ ca, pâṭhakânâṁ ca mangalaṁ,
mangalaṁ sarva-devânâṁ, mangalâya sa no Hariḥ.

Samâpto 'yaṁ granthaḥ.

Çubham astu.

VARIANTEN.

Prolog.

P. 2.

Z. 3. *cakra* fehlt in *K.*
„ 4. statt puñja *A. T. C. K. nivaha.* — *K. kabâṭa.*
„ 5. nach mahârṇava ist einzuschieben *magna.*
„ 6. *latâ* fehlt in *K.*
„ 7. *A. bahala. K. bahulatara.*
„ 8. *C. Gopâla-devena.* — *yathâ* fehlt in *A.* — *sahaja* fehlt in *A.*
„ 9. *çrî* fehlt in *K.* — *B. T. K. brahmânandair.* — *K. parama.*
„ 10. *sparça* fehlt in *K.*
„ 11. *tu* fehlt in *A.*
„ 16. *C. K. çânti.* — *prâya* fehlt in *K.*
„ 17. *K. yad apûrvaṁ.* — *K. çrî-*Kṛishṇa. — *nâma* fehlt in *A.* — *K. candrodaya-nâma.*
„ 18. *K. abhinirmâya.* — *râjñaḥ* fehlt in *K.*
„ 19. *K. saparishadas tâd-âlokana.*

P. 3.

Z. 2. *K. saṅgîtam avatârayâmi.*
„ 3. *K.* avalokya *ca.*
„ 4. *K. ajja*, esamhi; âṇabedu *ajjo.*
„ 8. *C. vikhyâta*-kîrtiḥ.
Z. 9. *C. K. mâtra-mitreṇa.*
„ 15. *C. K. kshauṇayaḥ.*
„ 16. *K. çanti.* — *C. pathi.* — *A. B. K. âtmano.* — *C. vinodanârthaṁ.* — *K. candrodayaṁ nâma.*
„ 17. statt *adiçyantâṁ* zu lesen *âdiçyantâṁ.*

P. 4.

Z. 1. *ajjaütta* fehlt in *K.* — *tadhâ* fehlt in *K.*
„ 2. *vikkamekka* fehlt in *K.*
„ 3. *daṇḍa* fehlt in *K.* — *K. varisanta-santaḍa-sara-ṇiara-jajjaria.*
„ 4. *K. vikkhitta-sahattha-satthapajjâsiduttuṅga.*
„ 6. statt *ghummanta* (ghûrmat) zu lesen *ghuṇṇanta* (ghûrṇat).
„ 7. *K. Mahumahaṇṇa via cchirasamuddaṁ samâsâdidâ.*
„ 8. *vîra* fehlt in *K.*
„ 10. *K. brâhmaṁ.*
„ 11. *K. kâraṇa-vaçât.* — *K. svabhâve avatishṭhate.*
„ 12. *kâlâgni* fehlt in *C.*
„ 13. statt yathâ *T. C. tathâ. K.* zieht *tathâ* mit zum folgen-

den Verse, und lässt dafür das Wort *váta* aus.

P. 5.

Z. 4. *purusháḥ* fehlt in *K.* — *K. kshititalam.*
„ 5. *T. pratipadyante.* — *K. tathá Paraçurámam eva távad ákalayatu bhavatí.*
„ 7. *C. bahula.*
„ 8. *K. prág-háre.*

Z. 10. *K. añça.*
„ 15. *K.* kṛita-*kṛityaḥ.*
„ 16. *K. vivekenaiva nirjitya.*
„ 17. statt *-daya'* zu lesen *-dayaḥ.*
„ 19. *C. paránubhavam.*

P. 6.

Z. 3. *K. ratyá.*
„ 6. *B. mad-vacanác copajáta.* — *K. núnaṁ mad-vacanác copajáta-krodha ivásau lakshyate.*

Erster Akt.

P. 7.

Z. 1. *K. yathá-nirdishṭaḥ.*
„ 2. *K. nanv are.*
„ 5. *K.* verbindet die beiden Verse durch *api ca.*
„ 6. *K. pronmílan-navamáliká-surabhayo.*
„ „ statt niçáḥ *K. C. T. kshapáḥ.*
„ 8. *A. B. C. bho.*
„ 12. *K.* liest nur einmal *paçya.*
„ 16. *K. abhilañghya.*

P. 8.

Z. 2. *B. C. Ahalyáyáṁ.*
„ 4. *K. apade*
„ 5. *K.* ka *iha.* — statt *vidishu* zu lesen *vidhishu.*
„ 8. in *K.* fehlt *mahábalá.*
„ 10. nach yamádin fügt *K.* hinzu *ashṭau távad.*
„ „ *C. niyamitam* asmábhir.
„ 15. *K. nirvikára-cittaika.*
„ 16. *K. tena te.*

P. 9.

Z. 3. *K. mada-mána-mátsarya-dambha-lobhádibhir.*
„ 4. *C. áçrayishyante.*
„ 5. *ajjaütta* fehlt in *A. B. C.* — *A. jama*-dama. — *vivea* fehlt in *K.*
„ 7. *áḥ* fehlt in *K.*
„ 13. *ca* fehlt in *K.*
„ 14. *ekam* fehlt in *T.* — *ca* fehlt in *K.* — *K. utpannaṁ* dvitíyaṁ.
„ 15. u. 16. *K. ajjaütta! jaï evaṁ, tá kiṁtti soaráṇaṁ tuhmáṇaṁ eárisaṁ vairaṁ?*

P. 10.

Z. 5. *C. K. eva caitaj.* — statt asmatpitopárjitam zu lesen *asmatpitrupárjitaṁ.* — *K. asmákaṁ pitr-upárjitaṁ.* — st. távad zu lesen *táta.*
„ 6. *A. T. K. virala.* — *K. tena te.* — *sámpratam* fehlt in *K.*

Z. 8. *K. Ratiḥ (karṇau pidhâya).* — liest nur einmal *santaṁ pâbaṁ.*
„ 9. *K.* mattakeṇa *jjevva.* — *K. adha vâ bhodu, ettha ko ubâyo mantidabbo.*
„ 11. in *K.* beginnt die Rede mit: *priye.*
„ 12. in *K.* beginnt die Rede mit: *priye.* — *K.* dâruṇaṁ *karma* pâ.

P. 11.

Z. 1. *K.* nur einmal *na bhetavyaṁ.*
„ 4. *K.* nur einmal *haddhî.* — *K. kadhaṁ tuhmâṇaṁ.*
„ 6. in *K.* fehlt *na bhetavyaṁ na bhetavyaṁ.*
„ 7. *K.* rakkhasie *uppaṇṇâe.*
„ 8. *K.* leitet den Vers ein mit: *yathâ.*
„ 12. statt bhakshyaṁ liest *A. nakshyaṁ* (?).
„ 13. *satrâsotkampaṁ* fehlt in *A.*

P. 12.

Z. 3. *K.* nur einmal *na bhetavyaṁ.*
„ 5. *K.* leitet die Worte ein mit: *'ajjaütta.*
„ 7. *C. viveko ca upanishad.*
„ 8. *K. tatra caite sarva eva.*
„ 10. st. edehiṁ liest *K. uṇa.*
„ 12. *K.* leitet die Worte ein mit: *priye.* — *pâpânâṁ* fehlt in *T. C. K.* — *A. pâpacâriṇâṁ.*
„ 13. *K. sva*-pratyavâya.
„ 19. st. *çâghyate* zu lesen *çlâghyate.*

P. 13.

Z. 2. *K. nanv are.*
„ 5. *K. purâvida.* — *ca* fehlt in *A.*
„ 6. *tâvat* fehlt in *K.*
„ 7. *K. mahâmohâdibhiç. K. baddhaḥ.*
„ 8. *A. B. C. K. kula.*

Z. 10. *K.* sva-*vaça*-câ.
„ 14. *C. tad ayuktaṁ.* — *K. tan na yuktam asmâkam iha sthâtuṁ.*
„ 17. *vicintya* fehlt in *K.*
„ 18. *K. visphûrjitaṁ.* — *K. yad ayam asmân.*

P. 14.

Z. 1. *priye* fehlt in *A. B. K.*
„ 5. *K.* jagat-*patir.*
„ 6. *K.* vayaṁ *tu.* — *K.* ity *aho.*
„ 9. *K. ṇicca-ppakâsa-pphuranta-sakala-tihuaṇa-ppahâvo.*
„ 14. *K. svaccho* 'pi.
„ 16. st. iha liest *A. iva* und *K. iti.*

P. 15.

Z. 1. *T. vipphuranta. C. papphuranta.*
„ 2. *bi* fehlt in *K.*
„ 3. *K. veçavilâsini.*
„ 4. *'pi* fehlt in *A.* — *C. paramapurushaṁ.*
„ 8. st. vâdhaṁ *K. puṁso.*
„ 11. *C. tathâ* kâraṇaṁ. — *vâ* fehlt in *A. C.*
„ 13. 14. 15. *K.*:

sammohayanti *madayanti viḍambayanti*
vikshobhayanti ramayanti vishâdayanti
etâḥ praviçya *hṛidayaṁ sadayaṁ* n.

(*Bhartṛihari.* ed. Bohlen. I, 21.)

P. 16.

Z. 2. *K. kiṁ ṇâma taṁ kâraṇaṁ.*
„ 4. *A. purâṇa.*
„ 5. st. tataḥ *K. ataḥ.* — *K. pârameçvara.* — *K. niçcayâmiti.*
„ 6. st. âsâdya *K. viditvâ.* — *B.* tad-*rûpatâm.*

Z. 7. st. iva *C. eva.* — st. nirmâya *K. racayitvâ.*
„ 10. *ajjaütta* fehlt in *K.* — *K. putto.*
„ 12. *jyeshṭha-putreṇa* fehlt in *A.*
„ 13. *tataç câsâv îçvaraḥ* fehlt in *K.*
„ 16. *K. anubhavan mâyâm* avi.

P. 17.

Z. 4. *K.* ṇamida-*muho.*
„ 6. *K. hṛidayaṁ bhavati.*
„ 8. *tâo* fehlt in *A.* — *K.* übersetzt sarasa mit *sarasa.*
„ 9. st. dhammattha *K. dhamma.* — *K.* bhattuṇo *hiaa-ṭṭhidaṁ vihaḍenti* (vighaṭayanti).

Z. 15. *jâgrat* muss mit svapna- zu Einem Worte verbunden werden.

P. 18.

Z. 1. *K. badhassa.*
„ 2. *K.* tadâ *etâe.* — ajjaütto fehlt in *K.*
„ 4. st. cirakâlam *T. C. B. ciraṁ.* — *K. tat siddhâç câsmâkaṁ manorathâḥ.*
„ 6. *K. paramo* mṛityoḥ.
„ 9. *prabodhotpattaye* fehlt in *K.* — *K. niyojayâmi.* — *K. iti Saṁsârâvatâro nâma* p. a.

Zweiter Akt.

P. 19.

Z. 4. *vatsa dambha* fehlt in *K.*
„ 5. *K. prabodhacandrodayâya.* — *A. praveçitâç* ca teshu.
„ 6. *A. utpannaḥ* kula.
„ 7. *K. kshayaḥ çrîmadbhir.*
„ 8. *A. tatraiva.*
„ 9. *K. vighnâya* pra.
„ 10. *K.* vârâṇasî *nâma nagarî.* — *K. sampâdita-nirdishṭaç ca svâmino yathâ nirdeçaḥ.*
„ 14. st. cira- *A. K. cirât. B. ciraṁ.*

P. 20.

Z. 2. *K. yathâ câyaṁ.*
„ 5. *A. dakshiṇa-râshṭra-deçâd.*
„ 6. *K. âryasya pitâmahasyâhaṅkârasya.* — *K.* ohne *iti* blos anusarishyâmi.
„ 7. *yathâ-nirdishṭaḥ* fehlt in *K.*
„ 9. st. tautânitaṁ zu lesen *tautâtitaṁ. C. K. tautâtikaṁ.*
„ 10. *K. sâlika-.*
„ 11. *K. naiva.*
„ 12. *K. susthaiḥ.*
„ 13. *vilokya* fehlt in *A. B.*
„ 15. *K.* bhikshâ-*mâtrârthaṁ.*
„ 17. *C. vilokya* vihasya *ca.*
„ 19. *K. etaiḥ saha.* — *B.* duritodayâya *bhavati.*

P. 21.

Z. 1. *K. pâshaṇḍâḥ.*
„ 2. *K. sandarçanâd* api.
„ 4. *K. saṅgata*-çilâ. *K. ṛishi.*
„ 8. *A. C. tridaṇḍa.* — *K. tridaṇḍopajîvino.*
„ 9. *K. paribhrashṭâ bhrântâ eva.* — *vilokya* fehlt in *K.*

Z. 11. *A. B. C. cakḥâlo-.* — *K. dṛiçad.* — *K. camashoḍûkhala.*

„ 12. *K. mushalaṁ.* — *K. hutâjyâgnidhûma-çyâmalita-gagaṇa.*

„ 13. *nâtidûrato* fehlt in *A.* *K. nâtidûre.* — *K.* nûnam *idaṁ.*

„ 14. *K. tad bhavatu.* — *K.* yuktam *idam* asmâkam.

„ 15. *iti* fehlt in *A. B. C.*

„ 17. *K. kaṇṭhyaushṭha.*

P. 22.

Z. 1. *K. tad bhavatûpasarpâmi tâvad enaṁ.* — st. kalyânaṁ zu lesen kalyâṇaṁ. — *B. K.* kalyâṇaṁ *bhavatu.*

„ 2. In *K.* fehlt *eva.*

„ 3. *sasambhramaṁ* fehlt in *K.* — *K.* yataḥ *pâda-çaucaṁ vidhâya* etad.

„ 5. *pâpa* fehlt in *K.* — *A. ushara. T. B. turashka.*

„ 6. *âsana* fehlt in *K.* — *K. agre* gṛi.

„ 9. *K.* pâdâ *âdiçanti.* — *K.* âgatasya *bhavataḥ.*

„ 10. *K. samyag asmâbhir na viditam asti.*

„ 11. *K.* âḥ *pâpa.*

„ 12. *K.* çrûyatâṁ *tâvat.*

„ 13. st. purî *K. tato.*

„ 14. *K. çreshṭhaka.*

„ 15. *K.* mahâ-*guṇâ.* — *B. tatrâpi* teshâm.

„ 18. *K.* tâmra-ghaṭîm *âdâya, praviçya.*

„ 19. *prakâçaṁ* fehlt in *A. B.* — *A. etat* kri. — *K.* Ahaṅkâraḥ *(vaṭu-hastât tâmra-ghaṭîm âdâya) bhavatu, ko doshaḥ?*

P. 23.

Z. 1. *K. iti* tathâ.

Z. 2. *K. brahman* dûre. — *B. kadâcid* vâtâ-.

„ 5. *B.* brâhmaṇa *evam eva tat. K. evam evaitad brahman.*

„ 6. st. hy asya *C. yasya. K. kasya.*

„ 8. *aye* fehlt in *K.* — *K. bhavatu* asmin.

„ 9. *K. samupaviçâmi. (ity upaveshṭum i.)*

„ 10. *K.* Vaṭuḥ *(vârayan) maivaṁ maivaṁ* â. — *B. nâkramaṇîyaṁ. A. asaṅkramaṇîyaṁ.*

„ 13. st. punar *K. yathâ.*

„ 15. st. châlaka zu lesen *chyâlaka. K. chyâla-vimâtṛi.* — *K. C. B. abhiçastâ.* — *K. tatas.*

„ 16. *K.* tat-*sambandha.*

„ 17. *K.* Dambhaḥ: *yady evaṁ, tathâpi nâsmâkaṁ vidita-*vṛi.

P. 24.

Z. 3. *K.* saçapatham *anunâthya.*

„ 5. *svagataṁ* fehlt in *K.* — *K. dâmbhikasya* brâ. — *A. brâhmaṇa-dâmbhikasya.*

„ 6. *vicintya* fehlt in *B.* — *K.* athavâ *dambho 'yaṁ svayaṁ.* — *prakâçaṁ* fehlt in *A.* und *K.*

„ 8. *K.* ka *iha.*

„ 12. *A. K. T. âryaḥ.* — *B. 'yam* asmâ. — *K.* Ahaṅkara *esha prâptaḥ.*

„ 13. *K.* ârya, *Lobhâtmajo Dambho 'ham abhivâdaye.*

„ 14. *K. âgaccha* va.

„ 15. *cira* fehlt in *A.*

„ 16. *K.* tvat-*putrasya.*

„ 17. und 18. liest *C.*: *(Dambhaḥ) atha kiṁ. (Ahaṅkâraḥ) so 'py atraiva vartate.* (*K.* eben so, nur giebt er die Worte *so vartate* ebenfalls dem Dambha) *(Dambhaḥ) na hi tena vinâ.*

muhûrtam api bhavâmi; so 'py atraiva ma. va. Diese letzten Worte *so — va.* fehlen in K. (Man muss daher wohl am besten so lesen: *(Dambhaḥ)* atha kiṁ; na hi—jîvàmi; so—vartate.)

Z. 19. *atha* fehlt in *K.* — *K. apy atraivâ* kuçalau.

P. 25.

Z. 1. K. *(Dambhaḥ) atha kiṁ; tâv api Mahâmohasya râjña âjñayâ atraiva vartete.* Die Worte *tayor — tishṭhâmi* fehlen in *K.*

„ 2. *atra* fehlt in *K.* — *K. prayojanenâtrâgamana*-pra.

„ 5. *K.* yato *Mahâmohasyâpi*-.

„ 6. *K.* lokâd *atrâbhyâgamaḥ.* — *K. caishâ* kiṁ-. — *B.* devena *Mahâmohena.*

„ 7. *nagarî* fehlt in *K.* — *K. nirûpitavyeti.*

„ 10. *nanu* fehlt in *K.* — *K. Vivekâparodha.*

„ 12. *K. atas tad-uccheda*-vidhiṁ. — *K.* eva *saḥ.*

„ 19. st. *tathâtyud*- zu lesen *tathâ hy ud*-. *tairthikâḥ* fehlt in *K.*

P. 26.

Z. 3. *K. bho janâḥ paurâ esha khalv ayaṁ* sam.

„ 4. *K. tena hi.*

„ 5. *K. niḥsyandaiç.* — Man trenne *sphaṭika-çilâ* von *vedikâḥ.*

„ 6. *K. mucyantâṁ.*

„ 9. *K. 'yaṁ* mahâ. — *tat* fehlt in *K.*

„ 10. 11. *K. iti nishkrântâḥ sarve. Vishkambhakaḥ.*

P. 27

Z. 1. *K. parivâraḥ.*

„ 6. *K. prathîyasaḥ.*

„ 7. *kapola* fehlt in *C. kalpanâ* muss mit *vinirmita* verbunden werden. — st. avastambhena zu lesen *avashṭambhena. K. avashṭambhair.* — *K.* jagad *eva.*

„ 11. st. *punaḥ* zu lesen *punaç.* — *K.* chinnâd *ito.*

„ 12. *K.* pariṇâma-*râshita-citer* jîvaḥ.

„ 13. *api ca* fehlt in *K.* — *K. âtmâpy evaṁ* tâ.

„ 14. 15. *K. kîdṛiço yosheyaṁ* vasu.

„ 17. *K. nishpaurushâḥ.*

„ 19. *K. kâmâv eva.*

P. 28.

Z. 1. *K. cetayanti.*

„ 1. 2. *K. ity etad asmâkam abhiprâyânuvartinâ. C. anurodhena.*

„ 3. *âsît* fehlt in *K.*

„ 6. *K.* Cârvâkaḥ *(çishyaṁ prati).* — *K. yatreyaṁ* vârtâ.

„ 7. *A.* vârtântar *eva* bhavati. — st. paçya *K. tathâ hi.*

„ 8. *C. K.* dravya-*nâçe 'pi.*

„ 10. *T. C.* verbinden diesen 20. Çloka mit *api ca.* — Dieser 20. Çloka fehlt in *K.* und auch der Commentar des Râmadâsa hat ihn nicht gekannt.

„ 12. *api ca* fehlt in *T. C.* — *K.* tṛipti-*kârakaṁ:*

„ 13. *T. tarhi nirvâṇa-dîpasya.* — *A. kiṁ* vardhayec. — Hierauf folgt in *A. B.* noch ein Çloka, der in *T. C.* und *K.* fehlt, und den auch der Commentator Râmadâsa nicht gekannt hat.

triptaye jâyate 'nyeshâm̃ bhuktam anyena cet, tadâ dadyâc chrâddham̃ hi, patheyam̃ na ca, hanta pravâsinâm̃.

Z. 14. *K.* eso jjevva *pulisattho* jam̃.

„ 15. vor *pijjae* muss *jam̃* (yat) eingeschoben werden. — *ity* fehlt in *A. K.*

„ 16. *santâpana* fehlt in *K.*

„ 17. st. dukkhehim̃ *K. vvadehim̃.*

P. 29.

Z. 1. *vatsa* fehlt in *A. C. T. K.* — *K. modakais triptir iyam̃.*

„ 4. *K. bhugnonnata.*

„ 7. *khu* fehlt in *K.* — *jam̃* fehlt in *K.*

„ 9. *nara* fehlt in *K.*

„ 11. *K. T. B. upasrishtam̃.*

„ 15. st. *hanta B.* tat. — *K. suhrid asmâkam̃.*

„ 17. *K. B. mahârâjo.* — *K. jayati.*

P. 30.

Z. 1. *A. B. C. K.* svâgatam̃ *te.* — *bho* fehlt in *A. B. C. K.*

„ 2. *K. deva* ka. — *K. sâshṭânga-pâtaḥ.*

„ 3. *K.* kaler *bhavyam̃.*

„ 4. *K.* prasâdât *sarvam avyâhatam̃.* — *A. K. nivartita.*

„ 5. *K. devasya* pâ.

„ 6. *K. nipâtât.*

„ 7. st. mukha *A. B. C. K. sukha.*

„ 9. *K. dhanye.*

„ 10. *K.* atha *tatra* kiyat.

„ 13. *K.* prabhu-*prabhâvo.*

„ 14. *A. B. C. tatrottarâḥ.* — *K.* -âdinâm̃ *tu* kaiva *cintâ.*

„ 17. *T. B. gundhanam̃ K. gunṭhanam̃.*

„ 18. *K. buddhi*-paurusha.

P. 31.

Z. 1. *K.* 'pi *na* vidyâprabodhodayaḥ çankanîyaḥ.

„ 3. *tat* fehlt in *K.*

„ 4. *deva* fehlt in *K.*

„ 7. *K.* sâ *ca.* — *K. yady api kalinâ.* — *K. anugrihitân na vayam avalokayitum api prabhavâmaḥ.*

„ 8. st. tad atra *K. tatra.*

„ 9. *iti* fehlt in *K.*

„ 10. *B. K. prasiddhâ.* — *sâ* fehlt in *A.*

„ 11. *K. durucchedâ.*

„ 12. *bhadram̃* fehlt in *K.* — *A. çankanayâ.* — *K. kâma-krodhâdishu.*

„ 14. *K.* nimmt diese Rede des Càrvâka noch als Worte des Mahâmoha. — st. *jighîshunâ* zu lesen *jigîshuṇâ.*

„ 15. *K. bhâvyam̃.*

„ 18. *nepathyâbhimukham̃ vilokya* fehlt in *A. B. C. K.*

P. 32.

Z. 1. *A. B. C. T. bhoḥ.* — Die Worte *bho asatsanga* fehlen in *K.* — *lobha* fehlt in *K.*

„ 2. *mâna* fehlt in *A.* — *A. B. C. T. âdayaḥ* — *K.* yathâ *Vishnubhaktir nâma* yoginî. — *eva* fehlt in *K.*

„ 3. *K.* avahitaiḥ *pratikartavyeti.*

„ 5. *K. patrahastaḥ.*

„ 6. *K. âgade.*

„ 8. *K. bhaṭṭârakerakaéhim̃* (bhaṭṭârâdhînâbhyâm̃).

„ 10. *K. praviçya vilokya ca.* — *K. saha kim̃ pi.*

„ 11. *K. edam̃ pattam̃ ṇilâbidu bhaṭṭake. (iti patram̃ samarpayati.)*

Z. 14. *hagge* fehlt in *K.* — *âgado mhi* fehlt in *A. B. C. K.*

P. 33.

Z. 2. *K. kâryeshv* ava.
„ 4. *K. patram̃ gṙihîtvâ vâcayati.* — *çrî* fehlt in *K. C.* hat es dagegen dreimal.
„ 5. *K.* parameçvara-*parama-bhaṭṭâraka-çrîman*-mahâmoha.
„ 6. *K. bhavyam̃* avyâhatam̃.
„ 7. st. anyac ca *K. anyat.*
„ 9. *K. sahacaro dharmo 'pi.*
„ 10. *K. nigûḍham̃.*
„ 11. *T.* etad *uktârtham̃* jñâtvâ. — *patram̃ vâcayitvâ* fehlt in *A. B. C. K.*
„ 12. *K. atimûrkhâḥ.* — *K. mayi jîvati* kuto.
„ 15. *K. dhvan̄sa-kṙit.*
„ 16. st. *lekhâṅkito- K. patrâṅkito-.*
„ 18. *K. gaccha jâlma.*

P. 34.

Z. 1. *K.* asmâbhir *adhigatam̃.*
„ 2. *K.* muhûrta-*mâtram* api.
„ 5. *svagatam̃* fehlt in *K.* — *K. ko 'bhyupâyaḥ.*
„ 6. *atra* fehlt in *K.*
„ 7. *prakâçam̃* fehlt in *K.*
„ 8. *T. âjñâpayantu devâḥ. K. praviçya Purushaḥ: esahmi âṇabedu mahârâo.*
„ 9. *tâvad* fehlt in *K.*
„ 10. *K. Purushaḥ: jam̃ devo âṇabedi.*
„ 13. *K. sakhe* çrutam̃. — *yathâ* fehlt in *K.* — *K. mahârâja-Mahâmohasya pratikûlatâm.*
„ 14. st. pratipaksha-bhâvam̃ *A. B. C. pratipaksham̃.* — *K. âḥ jîvati mayi.* — *âsâm* fehlt in *B. C.*
„ 15. *K. nirapeksham̃.*

P. 35.

Z. 1. *K. aye* mad. — *tâvan* fehlt in *K.*
„ 2. *A. B. C. çântyâdiç.* — *K. çântyâdîn vicintayishyati.*
„ 3. *K. mada*-dantino.
„ 4. *K. 'parân.*
„ 5. st. *labdhâdikam̃* lies *labdhâdhikam̃.*
„ 8. *K.* tvâshṭram̃ *Vṙitram aghâtayat.*
„ 9. Die Handschriften fügen zwischen Z. 9. und 10 noch ein *api ca* ein, *K.* aber *api câham̃.*
„ 11. *B. purushâ*-bhû.
„ 12. *K.* Lobhaḥ *(nepathyâbhimukham avalokya) priye* Tṙishṇe.
„ 15. *K. pura.*

P. 36.

Z. 2. *K.* sampadam̃ *uṇa.*
„ 4. st. ita âgamyatâm̃ *K. itas tâvat.*
„ 5. *K.* ajjaütta esahmi.
„ 6. *K. mâtâ-pitṙ-âdi-badho 'pi.*
„ 8. *K. iha sa* janako. — *A. C.* ke *ca.*
„ 11. *K. nishpeshayâmi.*
„ 12. *K. sphûrjantaḥ.*
„ 13. *K. avalokya.*
„ 14. *K. Sarve (upasṙitya): jayati jayati devaḥ.*
„ 15. *K.* Mahâmohaḥ *(vilokya).* — *A. C.* asmad-*vidveshiṇî. K. asmat-kula-dveshiṇî.*

P. 37.

Z. 3. C. Mahâmohaḥ *(svagatam̃).*
„ 4. *K.* çânter *nâma* çraddhâ. — *sâ ca* fehlt in *K.* — *C.* sâ ca *çântiḥ* pa.
„ 5. *tâvac* fehlt in *K.* — *K. çraddhâkarshaṇam̃.*

Z. 6. *K. mṛidutayâ.*
„ 7. *A. avasîdati vinaçyati. T. avasîdanti vinaçyati. C. B. avasîdanti câciraṁ vinaçyati. K. avasîdanti vâciraṁ vinaṅkshyati.* — *K. câkrashṭuṁ.*
„ 8. *K. vâravilâsinî.* — *K. pragalbhâ.* — *A. B. C. K. niyujyatâṁ.*
„ 9. *B. he* Vi. — *A. B. C. T. Vibhramâvati* (und so stets).
„ 10. *K. praviçya* Vi.
„ 12. *K. cileṇa* di. — *K. muhaṁ kadhaṁ.*
„ 13. *maṁ* fehlt in *K.*
„ 14. *K. sahi tuhá daṅçaṇeṇa mahârâo appaṇaṁ jjevva jaï cedissadi, tado ubâlahissadi.*
„ 16. st. kiṁ *K. kisaṁ.*

P. 38.

Z. 1. *K.* pekkhissaṁ *tuha sohaggassa aliattaṇaṁ.*
„ 2. *K.* aṇṇaṁ ca *ghummâṇaṁ via* piya.
„ 3. *K. kiṁ uṇa.* — *K.* sahie *uṇṇiddâe* kâraṇaṁ.
„ 5. *K.* sahi, ekka-*vallahâo yâo itthiâo honti, tâṇaṁ* bi.
„ 6. *K.* saala-*jaṇa.* Zeile 5. u. 6. scheinen ursprünglich einen Âryâ-Vers gebildet zu haben, der ungefähr so lauten dürfte:
sahi, ekka-vallahâ jâ,
etâe hodi dullahâ ṇiddâ;
saala-jaṇa-vallahâṇaṁ
kiṁ uṇa, muddhe, tu amhâṇaṁ.
„ 7. *K.* nur einmal *ke.*
„ 9. *ti* fehlt in *A.*, in *K.* fehlt *ahaṅâro tti.* — *K. ettha ule je jâdâ, te jjeva hiaa-ṇihidâe mae ahiramenti, mae viṇâ bâlo yvâ tthaviro vâ ṇa ciṭṭhadi.* Z. 9—11 scheinen ebenfalls einen Âryâ-Vers gebildet zu haben, etwa in folgender Gestalt:
ettha kule je jâdâ
ṇa mae viṇâ thaviro juvâṇo vâ
te hiae ṇihidâe
ranti-divasâiṁ ahiramanti.
Z. 12. st. nanv iha *K. sakhi.*

P. 39.

Z. 1. *A. K. suṇíadi.* — *kahaṁ* jaṁ fehlt in *K.*
„ 2. *ṇiccaṁ* fehlt in *K.*
„ 3. st. sahi issa tti *K. ettha.* — *ṇa* fehlt in *K.*
„ 4. *K. ṇa* ci.
„ 5. *sahi* fehlt in *K.* — *suhagâ* fehlt in *K.*
„ 6. *K.* itthiâ *iha.* — *K.* jâe sohagga-*mahâppa-viddâvida-hiaesâo sapattíâo bi âṇṇâṁ* padîchandi. — Bilden Zeile 7—9 etwa auch einen Âryâ-Vers? wie z. B.:
tuha sarisî suhagâ iha
puhavîe itthiâ tu ṇatthi tti,
jâe mahaddhi-vihuria-
hiaâ âṇaṁ padichanti.
„ 9. *K. taṁ* karissaï.
„ 12. (st. evaisha avinayaḥ zu lesen *evaisho 'vinayaḥ.*) *K. eriso* aviṇayo. — *abi ca* fehlt in *K.*

P. 40.

Z. 1. *aye* fehlt in *K.* — *B. K. prâptaiva.* — *K. priyatamâ.*
„ 3. *K. mâlyâpavṛitti.*
„ 6. *K. dorâ-.* — *K. jhanat*-kâ.
„ 10. *K. aṅkapâṇiṁ.*
„ 13. *A. T. lakshmîḥ.*
„ 16. *K. C.* nava-*yauvanena.* (Die

Verse müssen eingeführt werden mit *tathâ hi.)*

P. 41.

Z. 2. *A. vividha*-vishayo-.
„ 3. *K. ântas.*
„ 6. *K. bhâvâṇubaddho ppemo kâle bi vihaledi, tá* â.
„ 7. *bhaṭṭiṇâ* fehlt in *K.*
„ 9. *K. C. sthito yo hṛidayâd.*
„ 11. *K. mahappasâdo eso.* (das Übrige fehlt).
„ 12. Die Worte des Mahâmoha: *yathaiva—pravartitavyaṁ* fehlen in *K.*
„ 15. *ataḥ* fehlt in *C.*
„ 17. *K. pâshaṇḍeshu.*

P. 42.

Z. 1. *bi* fehlt in *A. K.*
„ 2. *saddhâ dâsi vva.*
„ 3. *mitthâ vea-maggo* fehlt in *K.*
„ 4. *K. sokkha-. K. palabidâiṁ tti.*
„ 5. *mitthâ sagga-phala-vijjetti* fehlt in *K.*

Die Worte nach *abi a* sind sicher ein Vers im Metrum Âryâ, obgleich keine Handschrift ihn als solchen bezeichnet:

visaâṇanda-vimukke
mokkhe dosâṇa daṅsaantìe
ubaṇisado bi virattâ
karissadi aciraṁ mae saddhâ.

*) आर्यपुत्र एवमेतत् । तथापि महाराजपरिग्रहः शङ्कितव्यो ऽरातिः । यतो ऽस्य यमनियमप्रमुखा अमात्या महाबलाः श्रूयन्ते ।

सन्तु विलोकनभाषणविलासपरिहासकेलिपरिरम्भाः ।
स्मरणमपि कामिनीनामलमिह मनसो विकाराय ॥ १६ ॥

विशेषतश्चैते मदमात्सर्यदम्भादिभिरस्मत्स्वामिवल्लभैरभियुज्यमाना नरपतिमन्त्रिणमधर्ममेवाश्रयिष्यन्ति ।

रतिः ॥ अज्जउत्त सुदं मए तुह्माणं समदमविवेअप्पहुदीणं च एक्कं उप्पत्तित्थाणं त्ति । *)

कामः ॥ आः प्रिये किमुच्यते एकमुत्पत्तिस्थानमिति । ननु जनक एवास्माकमभिन्नः । तथा हि

संभूतः प्रथममिहेश्वरस्य संगान्
मायायां मन इति विश्रुतस्तनूजः ।
त्रैलोक्यं सकलमिदं विसृज्य भूयस्
तेनाथो जनितमिदं कुलद्वयं नः ॥ १७ ॥

तस्य च प्रवृत्तिनिवृत्ती द्वे धर्मपत्न्यौ । तयोः प्रवृत्त्यामुत्पन्नं महामोहप्रधानमेकं कुलं निवृत्त्यां च द्वितीयं विवेकप्रधानमिति ।

रतिः ॥ अज्जउत्त जइ एव्वं ता किं णिमित्तं तुह्माणं सोअराणं वि परोप्परं एआरिसं वेरं । **)

कामः ॥ प्रिये

*) आर्यपुत्र श्रुतं मया युष्माकं शमदमविवेकप्रभृतीनां चैकमुत्पत्तिस्थानमिति ।

**) आर्यपुत्र यद्येवं तत् किं निमित्तं युष्माकं सोदराणामपि परस्परमेतादृशं वैरं ।

एकामिषप्रभवमेव सहोदराणां
उज्जृम्भते जगति वैरमिति प्रसिद्धं ।
पृथ्वीनिमित्तमभवत् कुरुपाण्डवानां
तीव्रस्तथा हि भुवनत्रयकृद्विरोधः ॥ १८ ॥

सर्वमेवैतज्जगदस्मत्पितोपार्जितं । तच्चास्माभिस्तावद्बलभतया सर्वमेवाक्रान्तं तेषां तु विरलः प्रचारः । तेनैते पापाः साम्प्रतं पितरमस्मांश्चोन्मूलयितुमुद्यताः ।

रतिः ॥ सन्तं पावं सन्तं पावं । अज्जउत्त किं एदं पावं विद्देसमत्तकेण तेहिं आरद्धं अह वा अत्थि उवाओ को वि एत्थं मन्तिदो । *)

कामः ॥ अस्त्यत्र किंचिन्निगूढं बीजं ।

रतिः ॥ अज्जउत्त ता किं ण उग्घाडीअदि । **)

कामः ॥ स्त्रीस्वभावाद्भवती भीरुरिति न तद्दारुणं पापीयसामुदाह्रियते ।

रतिः ॥ सभयं ॥ अज्जउत्त केरिशं तं । ***)

*) शान्तं पापं शान्तं पापं । आर्यपुत्र किमिदं पाप निमेषमात्रकेण तैरारब्ध अथ वास्त्युपायः कोऽप्यत्र मन्त्रितः ।

**) आर्यपुत्र तत् किं नोद्घाट्यते ।

***) आर्यपुत्र कीदृशं तत् ।

कामः ॥ प्रिये न भेतव्यं न भेतव्यं हताशानामाशामात्रमेतत् । अस्ति किलैषा किंवदन्ती अत्रास्माकं कुले कालरात्रिकल्पा विद्या नाम राक्षसी समुत्पत्स्यत इति ।

रतिः ॥ सभयं ॥ हद्धी हद्धी कहं अह्माणं कुले रक्खसी त्ति वेवदि मे हिअअं । *)

कामः ॥ प्रिये न भेतव्यं न भेतव्यं किंवदन्तीमात्रमेतत् ।

रतिः ॥ अध ताए रक्खसीए किं कादव्वं । **)

कामः ॥ प्रिये अस्ति किल तत्र प्राजापत्या सरस्वती

पुंसः संगसमुज्झितस्य गृहिणी मायेति तेनाप्यसाव्
अस्पृष्टापि मनः प्रसूय तनयं लोकान् असूत क्रमात् ।
तस्मादेव जनिष्यते पुनरसौ विद्येति कन्या यया
तातस्ते च सहोदराश्च जननी सर्वं च भक्ष्यं कुलं ॥ ११ ॥

रतिः ॥ सत्रासोत्कम्पं ॥ अज्जउत्त परित्ताहि परित्ताहि ***)

॥ इति भर्तारमालिङ्गति ॥

कामः ॥ स्पर्शसुखमभिनीय स्वगतं ॥

स्फुरद्रोमोद्भेदस्तरलतरताराकुलदृशो
भयोत्कम्पोत्तुङ्गस्तनयुगभरासंगसुभगः ।

*) हाधिक् हाधिक् कथमस्माकं कुले राक्षसीति वेपते मे हृदयं ।

**) अथ तया राक्षस्या किं कर्तव्यं ।

***) आर्यपुत्र परित्रायस्व परित्रायस्व ।

अंधीराक्ष्या गुञ्जन्मणिवलयदोर्वल्लिरचितः
परीरम्भो मोदं जनयति च संमोहयति च ॥ २० ॥

॥ प्रकाशं दृढं परिष्वज्य ॥ प्रिये न भेतव्यं न भेतव्यं अस्मासु जीवत्सु कुतो विद्योत्पत्तिः ।

रतिः ॥ अध किं ताए रक्खसीए उप्पत्ती तुह्माणं पांडवक्खाणं संमदा । *)

कामः ॥ वाढं । सा खलु विवेकेनोपनिषद्देव्यां प्रबोधचन्द्रेण भ्रात्रा समं जनयितव्या । तत्र सर्वे एते शमदमादयः प्रतिपन्नोद्योगाः ।

रतिः ॥ अज्ज‌उत्त कहं एदेहिं आपणो विणासकारिणीए विज्जाए उप्पत्ती तेहिं दुव्विणीदेहिं सलाहिज्जदि । **)

कामः ॥ कुलक्षयप्रवृत्तानां पापानां पापकारिणां कुतः प्रत्यवायगणना । पश्य

सहजमलिनवक्रभावभाजां
भवति भवः प्रभवात्मनाशहेतुः ।
जलधरपदवीमवाप्य धूमो
ज्वलनविनाशमनु प्रयाति नाशं ॥ २१ ॥

*) अथ किं तस्या राक्षस्या उत्पत्तिर्युष्माकं प्रतिपक्षाणां संमता ।

**) आर्यपुत्र कथमेतैरात्मनो विनाशकारिण्या विद्याया उत्पत्तिरेतैर्दुर्विनीतैः श्लाघ्यते ।

॥ नेपथ्ये ॥ आः पाप दुरात्मन् कथमस्मान् एव पापकारिण इत्याक्षिपसि । ननु रे

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथप्रतिपन्नस्य परित्यागो विधीयते ॥ २२ ॥

इति पौराणिकीं गाथां पुराणविद उदाहरन्ति । अनेन चास्माकं जनकेनाहंकारानुवर्तिना जगत्पतिस्तावत् पितेव बद्धः । मोहादिभिश्च स एव बन्धः सुदृढतां नीतः ।

कामः ॥ विलोक्य ॥ प्रिये अयमस्माकं कुले ज्यायान् देव्या मत्या सह विवेक इत एवाभिवर्तते । य एषः

रागादिभिः स्वरसचारिभिरात्तकान्तिर्
निर्भर्त्स्यमान इव मानधनः कृशाङ्गः ।
मत्या नितान्तकलुषीकृतया शशाङ्कः
कान्त्येव सान्द्रतुहिनान्तरितो विभाति ॥ २३ ॥

तन्न युक्तमिहास्माकमवस्थातुं ॥ ॥ इति निष्क्रान्तौ ॥

॥ विष्कम्भकः ॥

॥ ततः प्रविशति राजा मतिश्च ॥

राजा ॥ विचिन्त्य ॥ प्रिये श्रुतं वयस्य दुर्विनीतस्य वटोर्मदविस्फुर्जितं वचो यदस्मान् एव पापकारिण इत्याक्षिपति ।

मतिः ॥ अज्जउत्त किं आपणो दोसं लोओ विआणादि *)

*) आर्यपुत्र किमात्मनो दोषं लोको विजानाति ।

राजा ॥ प्रिये पश्य

असावहंकारपरैर्दुरात्मभिर्
निबध्य तैः पाशशतैर्मदादिभिः ।
चिरं चिदानन्दमयो निरञ्जनो
जगत्प्रभुर्दीनदशामनीयत ॥ २४ ॥

त एते पुण्यकारिणो वयं तन्मुक्तये प्रवृत्ताः पापकारिण इति जितं दुरात्मभिः ।

मतिः ॥ अज्जउत्त जदो सो सहजआनन्दसुन्दरसहाओ णिच्चप्पआसो विप्फुरन्तसअलतिहुअणप्पआरो परमेसुरो सुणीअदि ता कधं एदेहिं दुव्विणीदेहिं बन्धिअ महामोहसाअरे णिक्खित्तो । *)

राजा ॥ प्रिये

सततधृतिरप्युच्चैः शान्तो ऽप्यवाप्तमहोदयो ऽप्य्
अधिगतनयो ऽप्यन्तःस्वस्थो ऽप्युदारितधीरपि ।
त्यजति सहजं धैर्यं स्त्रीभिः प्रतारितमानसः
स्वमपि यदयं मायासंगात् पुमान् इह विस्मृतः ॥ २५ ॥

मतिः ॥ अज्जउत्त ण क्खु अन्धआरलेहाए सहस्सरस्सिणो

*) आर्यपुत्र यतो ऽसौ सहजानन्दसुन्दरस्वभावो नित्यप्रकाशो विस्फुरत्सकलत्रिभुवनप्रचारः परमेश्वरः श्रूयते तत् कथमेतैर्दुर्विनीतैर्बद्ध्वा महामोहसागरे निक्षिप्तः ।

तिरक्कारो जं माग्राए तधाप्फुरन्तमहापग्रासमाग्ररस्स देवस्स वि ग्रहिहवो । *)

राजा ॥ प्रिये अविचारसिद्धेयं वारविलासिनीव माया असतोऽपि भावान् उपदर्शयन्ती परपुरुषं वञ्चयति । पश्य

स्फटिकमणिवद्भास्वान् देवः प्रगाढमनार्यया
विकृतिमनया नीतः काममसंगतविक्रियः ।
न खलु तदुपश्लेषादस्य व्यपैति रुचिर्मनाक्
प्रभवति तथाप्येषा वाढं विधातुमधीरतां ॥ २६ ॥

मतिः ॥ किं उण कारणं जेण सा तधाउदारचरिदं दुव्विदद्धा पग्रारेदि । **)

राजा ॥ न खलु प्रयोजनं कारणं वा विलोक्य माया प्रवर्तते । स्वभावः खल्वयं स्त्रीपिशाचीनां । पश्य

संमोहयन्ति रमयन्ति विषादयन्ति
निर्भर्त्सयन्ति मदयन्ति विडम्बयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां
किं नाम वामनयना न समाचरन्ति ॥ २७ ॥

*) आर्यपुत्र न खल्वन्धकारलेखया सहसमर्थस्तिरस्कारो यन्मायया तथास्फुरन्महाप्रकाशसागरस्य देवस्याप्यभिभवः ।

**) किं पुनः कारणं येन सा तथोदारचरितं दुर्विदग्धा प्रतारयति ।

अस्ति चापरमपि कारणं ।

मतिः ॥ अज्जउत्त किं तं । *)

राजा ॥ एवमनया दुराचारया चिन्तितं । अहं तावद्गतयौवना वर्षीयसी अयं च पुराणः पुरुषः स्वभावादेव विषयरसविमुखः । ततः स्वतनयमेव पारमेश्वरे पदे निवेशयामि । तमेव च मातुरभिप्रायमासाद्य नितान्तप्रत्यासन्नतया तद्रूपमिवापन्नेन मनसा नवद्वाराणि पुराणि निर्माय

एको ऽपि बहुधा तेषु विच्छिन्नेव निवेशितः ।
स्वचेष्टितमथो तस्मिन् विदधाति मणाविव ॥ २८ ॥

मतिः ॥ विचिन्त्य ॥. अज्जउत्त जादिसी मादा पुत्तको वि तादिसो जेव्व जादो । **)

राजा ॥ ततो ऽसावहंकारेण चित्तस्य ज्येष्ठपुत्रेण नप्त्रा परिष्वक्तः । ततश्चासावीश्वरः

जातो ऽहं जनको ममैष जननी क्षेत्रं कलत्रं कुलं
पुत्रो मित्रमारातयो वसु बलं विद्या सुहृद्बान्धवाः ।
चित्तस्पन्दितकल्पनामनुपतन् विद्वान् अविद्यामयीं
निद्रामेत्य विघूर्णितो बहुविधान् स्वप्नान् इमान् पश्यति ॥

*) आर्यपुत्र किं तत् ।

**) आर्यपुत्र यादृशी माता पुत्रको ऽपि तादृश एव जातः

मतिः ॥ अज्जउत्त एव्वं दीहदीहतरणिद्दाविद्दाविअप्पबोहे परमेसरे कधं पबोहोप्पत्ती भविस्सदि । *)

राजा ॥ सलज्जमधोमुखस्तिष्ठति ॥

मतिः ॥ अज्जउत्त किं त्ति गुरुअरलज्जाभरणमिदसेहरो तुण्हीभूदो सि । **)

राजा ॥ प्रिये सर्वं प्रायेण योषितां भवति हृदयं तेन सापराधमिवात्मानं शङ्के ।

मतिः ॥ अज्जउत्त अण्णाओ ताओ त्थिआओ जाओ सरसण्णबुत्तस्स धम्मात्थवावारप्पत्थिदस्स वा भत्तुणो हिअअअहिण्णं विहण्णन्ति । ***)

राजा ॥ प्रिये

मानिन्याश्चिरविप्रयोगजनितासूयाकुलाया भवेत्
शान्त्यादेरनुकूलनादुपनिषद्देव्या मया संगमः ।
तूष्णीं चेद्विपयान् अपास्य भवती तिष्ठेन्मुहूर्तं ततो
जायेत् स्वप्नसुषुप्तिधामविरहात् प्रातः प्रबोधोदयः ॥ ३० ॥

*) आर्यपुत्रैवं दीर्घदीर्घतरनिद्राविद्रावितप्रबोधे परमेश्वरे कथं प्रबोधोत्पत्तिर्भविष्यति ।

**) आर्यपुत्र किमिति गुरुतरलज्जाभरनमितशेखरस्तूष्णीभूतोऽसि ।

***) आर्यपुत्रान्यास्ताः स्त्रियो याः स्वरसप्रवृत्तस्य धर्मार्थव्यापारप्रस्थितस्य वा भर्तुर्हृदयेप्सितं विघ्नन्ति ।

मतिः ॥ अज्जउत्त जइ एव्वं कुलप्पहुणो दिढगण्ठिणिबद्धस्स वि बन्धमोक्खो भोदि तदा ताए णिच्चअणुबन्धो जेव्व अज्ज-उत्तो भोदु त्ति सुट्ठु मे पिअं । *)

राजा ॥ प्रिये यद्येवं प्रसन्नासि सिद्धास्तर्हि चिरकालमस्माकं मनोरथाः । तथा हि

* यथैको बहुधा विभज्य जगतामादिः प्रभुः शाश्वतः
क्षिप्त्वा यैः पुरुषः पुरेषु परमं मृत्योः पदं प्रापितः ।
तेषां ब्रह्मभिदां विधाय विधिवत् प्राणान्तिकं विद्यया
प्रायश्चित्तमिदं मया पुनरसौ ब्रह्मैकतां नीयते ॥ ३१ ॥

तद्भवतु । प्रस्तुतविधानाय प्रबोधोत्पत्तये शमदमादीन् यो-जयामः ।

॥ इति निष्क्रान्तौ

। इति प्रथमोऽङ्कः ॥

*) आर्यपुत्र यद्ययं कुलप्रभोर्दृढग्रन्थिनिबद्धस्यापि बन्धमोक्षो भवति तदा तया नित्यानुबन्ध इत्यार्यपुत्रो भवत्विति सुष्ठु मे प्रियं ।

॥ अथ ॥

॥ द्वितीयोऽङ्कः ॥

॥ ततः प्रविशति दम्भः ॥

दम्भः ॥ आदिष्टोऽस्मि महाराजमहामोहेन यथा वत्स दम्भ प्रतिज्ञातं सामात्येन विवेकेन प्रबोधोदयाय प्रेषिताश्च तेषु तेषु तीर्थेषु शमदमादयः । स चायमस्माकमुपस्थितः कुलक्षयो भवद्भिरवहितैः प्रतिकर्तव्यः । तत्र पृथिव्यां परमं मुक्तिक्षेत्रं वाराणसी नाम नगरी । तद्भवांस्तत्र गत्वा चतुर्णामप्याश्रमाणां निःश्रेयसविघ्नार्थं प्रयततामिति । तदिदानीं वशीकृतभूयिष्ठा मया वाराणसी । संपादितश्च स्वामिनो मया यथानिर्दिष्ट आदेशः । तथा हि मदधिष्ठितैरिदानीं

वेश्यावेश्मसु सीधुगन्धिललनावक्त्रासवामोदितैर्
नीत्वा निर्भरमन्मथोत्सवरसैरुन्निद्रचन्द्राः क्षपाः ।
सर्वज्ञा इति दीक्षिता इति चिरप्राप्ताग्निहोत्रा इति
ब्रह्मज्ञा इति तापसा इति दिवा धूर्तैर्जगद्वञ्च्यते ॥ १ ॥

॥ विलोक्य ॥ कोऽयं पान्थो भागीरथीमुत्तीर्य साम्प्रतमित एवाभिवर्तते । यथैषः

ज्वलन्निवाभिमानेन ग्रसन्निव जगत्त्रयं ।
भर्त्सयन्निव वाग्जालैः प्रश्रयोपहसन्निव ॥ २ ॥

तथा तर्कयामि । नूनमयं दक्षिणराढप्रदेशादागतो भविष्यति । तदेतस्मादर्थस्याहंकारस्य वृत्तान्तमनुसरिष्यामीति ।

॥ ततः प्रविशत्यहंकारो यथानिर्दिष्टः ॥

अहंकारः ॥ अहो मूर्खबहुलं जगत् । तथा हि

नैवाश्रावि गुरोर्मतं न विदितं तौतातितं दर्शनं
तत्त्वं ज्ञातमहो न शालिकगिरां वाचस्पतेः का कथा ।
सूक्तं नापि महोदधेरधिगतं माहाव्रती नेक्षिता
सूक्ष्मा वस्तुविचारणा नृपशुभिः स्वस्थैः कथं स्थीयते ॥ ३ ॥

॥ विलोक्य ॥ एते तावदर्थावधारणविधुराः स्वाध्यायाध्ययनमात्रनिरता वेदविप्लावका एव । ॥ पुनरन्यतो गत्वा ॥ एते च भिक्षामात्रगृहीतयतिव्रता मुण्डितमुण्डाः पण्डितंमन्या वेदान्तशास्त्रं व्याकुलयन्ति । ॥ विहस्य ॥

प्रत्यक्षादिप्रमासिद्धविरुद्धार्थाभिधायिनः ।
वेदान्ता यदि शास्त्राणि बौद्धैः किमपराध्यते ॥ ४ ॥

तदेतैर्वाङ्मिश्रणमपि गुरुतरदुरितोदयाय । ॥ पुनरन्यतो गत्वा ॥

एते च शैवपाशुपतादयो दुरभ्यस्तान्नपादमताः पशवः पाखण्डा एव । अमीषां संभाषणादपि नरा नरकं प्रयान्ति । तदेते दर्शनपथाद्दूरं परिहरणीयाः । ॥ पुनरन्यतो गत्वा ॥ एते च

गङ्गातीरतरङ्गशीतलशिलाविन्यस्तभास्वद्वृशी-
संविष्टाः कुशमुष्टिमण्डितमहादण्डाः करण्डोज्ज्वलाः ।
पर्यायग्रथिताक्षसूत्रवलयप्रत्येकबीजग्रह-
व्यग्राग्राङ्गुलयो हरन्ति धनिनां वित्तान्यहो दाम्भिकाः ॥

॥ पुनरन्यतो गत्वा ॥ एते च त्रिदण्डिव्यपदेशजीविनो द्वैताद्वैतमार्गपरिभ्रष्टाः । ॥ पुनरन्यतो गत्वा । विलोक्य ॥ अये कस्येदं द्वारोपान्तनिखातातिप्रांशुवंशकाण्डताण्डवितधौतसितसूक्ष्माम्बरसहस्रमितस्ततो विन्यस्तकृष्णाजिनदृषदुपलचमसचषालोलूखलमुशलमनवरतहुताज्यगन्धिधूमश्यामलीकृतगगनमण्डलममरसरितो नातिदूरतो विभात्याश्रमपदं । नूनमदः कस्यापि गृहमेधिनो गृहं भविष्यति । भवतु । युक्तमस्माकमतिपवित्रमेतद्द्वित्रिदिवसनिवासाय स्थानं । इति प्रवेशं नाटयति ॥ विलोक्य ॥ अये

मृद्बिन्दुलाञ्छितललाटभुजोदरोरः-
कण्ठोष्ठपृष्ठचिबुकोरुकपोलजानुः ।
चूडाग्रकर्णकटिपाणिविराजमान-
दर्भाङ्कुरः स्फुरति मूर्त इवैष दम्भः ॥ ६ ॥

भवतु । उपसर्पाम्येनं । ॥ उपसृत्य ॥ कल्यानं भवतां ।

दम्भः ॥ हूंकारेणैव तं वारयति ॥

प्रविश्य वटुः ससंभ्रमं ॥ ब्रह्मन् दूरत एव स्थीयतां । यतः पादौ प्रक्षाल्य एतदाश्रमपदं प्रवेष्टव्यं ।

अहंकारः ॥ सक्रोधं ॥ आः पाप तुरुष्कदेशं प्राप्ताः स्मः । यत्र श्रोत्रियान् अतिथीन् आसनपाद्यादिभिरपि गृहिणो नोपतिष्ठन्ति ।

दम्भः ॥ हस्तसंज्ञया समाश्वासयति ॥

वटुः ॥ एवमाराध्यपादा आज्ञापयन्ति । दूरदेशादागतस्यार्यस्य कुलशीलादिकं न सम्यगस्माकं विदितं ।

अहंकारः ॥ आः कथमस्माकमपि कुलशीलादिकमिदानीं परीक्षितव्यं । श्रूयतां

गौडं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढा पुरी
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता ।
तत्पुत्राश्च महाकुला न विदिताः कस्यात्र तेषामपि
प्रज्ञाशीलविवेकधैर्यविनयाचारैरहं चोत्तमः ॥ ७ ॥

दम्भः ॥ वटुं पश्यति ॥

वटुः ॥ ताम्रघटीं गृहीत्वा ॥ भगवन् पादशौचं विधीयतां ।

अहंकारः ॥ स्वगतं ॥ भवतु को विरोधः । ॥ प्रकाशं ॥ एवं क्रियते ।

॥ तथा कृत्वोपसर्पति ॥

दम्भः ॥ दन्तान् पीडयित्वा ॥ दूरे तावत् स्थीयतां । वाताहृताः प्रस्वेदकणिकाः प्रसरन्ति ।

अहंकारः ॥ अहो अपूर्वमिदं ब्राह्मण्यं ।

बटुः ॥ ब्रह्मन्नेवमेतत् । तथा हि

अस्पृष्टचरणा ह्यस्य चूडामणिमरीचिभिः ।
नीराजयन्ति भूपालाः पादपीठान्तभूतलं ॥ ८ ॥

अहंकारः ॥ स्वगतं ॥ अये दम्भग्रामो ऽयं देशः । भवत्वस्मिन्नासन उपविशामि । ॥ तथा कर्तुमिच्छति ॥

बटुः ॥ नैवमाराध्यपादानामासनमन्यैराक्रम्यते ।

अहंकारः ॥ आः पाप अस्माभिरपि दक्षिणराढाप्रसिद्धविशुद्धिभिरिदमासनमनाक्रमणीयं । शृणु रे मूर्ख

नास्माकं जननी तथोज्ज्वलकुला सच्छ्रोत्रियाणां पुनर्
व्यूढा काचन कन्यका खलु मया तेनास्मि ताताधिकः ।
अस्मच्छ्यालकमित्रमातुलसुता मिथ्याभिशप्ता यतस्
तत्संपर्कवशान्मया स्वगृहिणी प्रेयस्यपि प्रोज्झिता ॥ ९ ॥

दम्भः ॥ ब्रह्मन् यद्यप्येवं तथाप्यस्माकमविदितवृत्तान्तो भवान् । तथा हि

सदनमुपगतोऽहं पूर्वमम्भोजयोनेः
सपदि मुनिभिरुच्चैरासनेषूज्झितेषु ।
सशपथमनुनीय ब्रह्मणा गोमयाम्भः-
परिमृजितनिजोरावाशु संवेशितोऽस्मि ॥ १० ॥

अहंकारः ॥ स्वगतं ॥ अहो दाम्भिकब्राह्मणस्यात्युक्तिः । ॥ विचिन्त्य ॥ अथ वा दम्भस्यैव भवत्येवं तावत् । सक्रोधं प्रकाशं ॥ आः किमेवं गर्वायसे ।

अरे क इव वासवः कथय कोऽत्र पद्मोद्भवो
वद प्रभवभूमयो जगति का ऋषीणामपि ।
अवेहि तपसो बलं मम पुरंदराणां शतं
शतं च परमेष्ठिनां पततु वा मुनीनां शतं ॥ ११ ॥

दम्भः ॥ विलोक्य सानन्दं ॥ अये आर्यपितामहोऽस्माकमहंकारः । आर्य दम्भो लोभात्मजोऽहं भो अभिवादये ।

अहंकारः ॥ वत्स आयुष्मान् भव । बालः खल्वसि मया द्वापरान्ते दृष्टः । संप्रति चिरकालविप्रकर्षाद्वार्धक्यग्रस्ततया च न सम्यक् प्रत्यभिजानामि । अथ त्वत्कुमारस्यानृतस्य कुशलं ।

दम्भः ॥ न हि तेन विना मुहूर्तमप्यहं जीवामि । अथ किं सोऽप्यत्रैव महामोहस्याज्ञया वर्तते ।

अहंकारः ॥ अथ तव मातापितरौ तृष्णालोभावपि कुशलौ ।

दम्भः ॥ तावप्यत्रैव वर्तेते। तयोर्विना क्षणमपि न तिष्ठामि। आर्यमिश्रैः पुनरत्र केन प्रयोजनेन प्रसादः कृतः।

अहंकारः ॥ वत्स मया महामोहस्य विवेकसकाशादत्याहितं श्रुतं। तेन तद्वृत्तान्तं प्रत्येतुमागतोऽस्मि।

दम्भः ॥ तर्हि स्वागतमिवार्यस्य यतो महाराजस्यापीन्द्रलोकादागमनं श्रूयते। अस्ति च किंवदन्ती यद्देवेन वाराणसी नाम नगरी राजधानी निरूपितेति।

अहंकारः ॥ किं पुनः कारणं वाराणस्यां सर्वात्मना महामोहस्यावस्थाने।

दम्भः ॥ आर्य ननु विवेकोपरोध एव। तथा हि

विद्याप्रबोधोदयजन्मभूमिर्वाराणसी ब्रह्मपुरी निरत्यया।
अतः कुलोच्छेदविधिं विधित्सुर्निवस्तुमत्रेच्छति नित्यमेव ॥

अहंकारः ॥ सभयं ॥ यद्येवमशक्यप्रतीकार एवायमर्थः। यतः

परममविदुषां पदं नराणां
पुरविजयी करुणाविधेयचेताः।
कथयति भगवान् इहान्तकाले
भवभयकातरतारकं प्रबोधं ॥ १३ ॥

दम्भः ॥ सत्यमेतत् तथापि नैतत् कामक्रोधाद्यभिभूतानां संभाव्यते। तथात्युदाहरन्ति तैर्थिकाः

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतं ।
विद्या तपश्च कीर्त्तिश्च स तीर्थफलमश्नुते ॥ १४ ॥

॥ नेपथ्ये ॥ भो भो जना एष खलु संप्राप्तो देवो महामोहः । तेन

निष्यन्दैश्चन्दनानां स्फटिकमणिशिलावेदिकाः संस्क्रियन्तां
मोच्यन्तां यन्त्रमार्गाः प्रसरतु परितो वारिधारा गृहेषु ।
उच्छ्रीयन्तां समन्तात् स्फुरदुरुमणयः श्रेणयस्तोरणानां
धूप्यन्तां सौधमूर्धस्वमरपतिधनुर्धामचित्राः पताकाः ॥ १५ ॥

दम्भः ॥ आर्य प्रत्यासन्नो महाराजः । तत् प्रत्युद्गमनेन संभाव्यतामार्येण ।

अहंकारः ॥ एवं भवतु ।

॥ इति निष्क्रान्तौ ॥

॥ प्रवेशकः

॥ ततः प्रविशति महामोहो विभवतश्च परिवारः ॥

महामोहः ॥ विहस्य ॥ अहो निरङ्कुशा जडधियः । तथा हि

आत्मास्ति देहाद्यतिरिक्तमूर्तिर्
भोक्ता स लोकान्तरितः फलानां ।
आशेयमाकाशतरोः प्रसूनात्
प्रथीयसी स्वादुफलप्रसूतौ ॥ १६ ॥

इदं च स्वकपोलकल्पना विनिर्मितपदार्थावस्तम्भेन जगदेतै-र्विदग्धैर्वंच्यते । तथा हि

यन्नास्त्येव तदस्ति वस्त्विति मृषाजल्पद्भिरेवास्तिकैर्
वाचालैर्बहुभिस्तु सत्यवचसो निन्द्याः कृता नास्तिकाः ।
देहो पश्यत तत्त्वतो यदि पुनः छिन्नादतो वर्ष्मणो
दृष्टः किं परिणामरूपितचितिर्जीवः पृथक् कैरपि ॥ १७ ॥

अपि च न केवलं जगदात्मैव तावदमीभिर्वंच्यते । तथा हि

तुल्यत्वे वपुषां मुखाद्यवयवैर्वर्णक्रमः कीदृशः
स्त्री चेयं वसु वा परस्य यदमुं भेदं न विद्मो वयं ।
हिंसायामथ वा यथेष्टगमने स्त्रीणां परस्वग्रहे
कार्याकार्यकथास्तथापि यदमी निःपौरुषाः कुर्वते ॥ १८ ॥

॥ विचिन्त्य सश्लाघं ॥ सर्वथा लोकायतमेव शास्त्रं । यत्र प्रत्यक्षमेव प्रमाणं । पृथिव्यप्तेजोवायवस्तत्त्वानि । अर्थकामौ पुरुषार्थौ

भूतान्येव चेतयन्ते । नास्ति परलोकः । मृत्युरेवापवर्ग इति । तदेतदस्मदभिप्रायानुरोधिना वाचस्पतिना प्रणीय चार्वाकाय समर्पितमासीत् । तेन च शिष्योपशिष्यद्वारेणास्मिन् लोके बहुलीकृतं तन्त्रं ।

॥ ततः प्रविशति चार्वाकः शिष्यश्च ॥

चार्वाकः ॥ वत्स जानासि दण्डनीतिरेव विद्या । अत्रैव वार्तान्तर्भवति । धूर्तप्रलापस्त्रयी । पश्य

स्वर्गः कर्तृक्रियाद्रव्यविनाशे यदि यज्वनां ।
ततो दावाग्निदग्धानां फलं स्याद्भूरि भूरुहां ॥ १९ ॥
निहतस्य पशोर्यज्ञे स्वर्गप्राप्तिर्यदीष्यते ।
स्वपिता यजमानेन किं न तस्मान्निहन्यते ॥ २० ॥

अपि च । मृतानामपि जन्तूनां श्राद्धं चेत् तृप्तिकारणं ।
निर्वाणस्य प्रदीपस्य स्नेहः संवर्धयेच्छिखां ॥२१॥

शिष्यः ॥ आचालिअ जइ एसो जेव्व पलमत्थो पुलिसस्स जं खज्जइ पिज्जइ ता किं त्ति एदेहिं नित्थिएहिं संसालसोक्खं पलिहलिअ आपा घोलघोलेहिं पलाअसान्तअणसट्ठआलपहुदिहिं दुक्खेहिं खविज्जदि । *)

*) आचार्य यद्येष एव परमार्थः पुरुषस्य यत् खाद्यते पीयते तत् किमित्येतैस्तैर्थिकैः संसारसौख्यं परिहृत्यात्मा घोरघोरैः पराकसान्तपनषष्ठकालप्रभृतिभिर्दुःखैः खप्यते ।

चार्वाकः ॥ वत्स धूर्तप्रणीतागमप्रतारितानामाशामोदकैरियं तृप्तिर्मूर्खाणां । पश्य

आलिङ्गनं भुजनिपीडितबाहुमूल-
भग्नोन्नतिस्तनमनोहरमायताक्ष्याः ।
भिक्षोपवासनियमार्कमरीचिदाहैर्
देहोपशोषणविधिः कुधियां क्व चैषः ॥ २२ ॥

शिष्यः ॥ आचालिअ एव्वं खु तित्थिआ आलवन्ति जं दुक्ख-मिस्सिदं संसालसुखं पलिहलणिज्जं त्ति । *)

चार्वाकः ॥ विहस्य ॥ आः दुर्बुद्धिविलसितं नरपशूनां ।

त्याज्यं सुखं विषयसंगमजन्म पुंसां
दुःखोपसृष्टमिति मूर्खविचारणैषा ।
व्रीहीन् जिहासति सितोत्तमतण्डुलाढ्यान्
को नाम भोस्तुषकणोपहितान् हितार्थी ॥ २३ ॥

महामोहः ॥ अये चिरेण खलु प्रमाणवन्ति वचनानि कर्णसुखमुपजनयन्ति । ॥ विलोक्य सानन्दं ॥ हन्त प्रियसुहृन्मे चार्वाकः ।

चार्वाकः ॥ विलोक्य ॥ एष महाराजमहामोहः ॥ उपसृत्य ॥ जयतु जयतु महाराजः । एष चार्वाकः प्रणमति ।

*) आचार्य एवं खलु तैर्थिका आलपन्ति यद् दुःखमिश्रितं संसारसुखं परिहरणीयमिति ।

महामोहः ॥ चार्वाक स्वागतं । भो इहोपविश्यतां ।

चार्वाकः ॥ उपविश्य ॥ एष कलेः साष्टाङ्गः प्रणामः ।

महामोहः ॥ अथ कलेर्भद्रमव्याहतं ।

चार्वाकः ॥ देवस्य प्रसादात् सर्वत्र भद्रं । निर्वर्तितकर्तव्यशेषश्च देवपादमूलं द्रष्टुमिच्छति । यतः

आज्ञामवाप्य महतीं द्विषतां निपाते
निर्वर्त्य तां सपदि लब्धमुखप्रसादः ।
उच्चैःप्रमोदमनुमोदितदर्शनः सन्
धन्यो नमस्यति पदाम्बुरुहं प्रभूणां ॥ २४ ॥

महामोहः ॥ अथ तस्मिन् कलौ कियत् संपन्नं ।

चार्वाकः ॥ देव

व्यतीतवेदार्थपथः प्रथीयसीं यथेष्टचेष्टां गमितो महाजनः ।
तदत्र हेतुर्न कलिर्न चाप्यहं प्रभुप्रसादो हि तनोति पौरुषं ॥

तत्रोत्तरपथिकाः पाश्चात्याश्च त्रयीमेव त्याजिताः शमदमादीनां कैव कथा । अन्यत्रापि प्रायशो जीविकामात्रफलैव त्रयी । यथाहाचार्यः

अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनं ।
प्रज्ञापौरुषहीनानां जीविकेति बृहस्पतिः ॥ २६ ॥

तेन कुरुक्षेत्रादिषु तावद्देवेन स्वप्नेऽपि विद्याप्रबोधोदयो न शङ्कनीयः ।

महामोहः ॥ साधु संपादितं महत् खलु तत्तीर्थं व्यर्थीकृतं ।

चार्वाकः ॥ देवान्यच्च विज्ञाप्यमस्ति ।

महामोहः ॥ किं तत् ।

चार्वाकः ॥ अस्ति विष्णुभक्तिर्नाम महाप्रभावा योगिनी । सा तु कलिना यद्यपि विरलप्रचारा कृता तथापि तदनुगृहीतान्वयमालोकयितुमपि न प्रभवामः । तदत्र देवेनावधातव्यमिति ।

महामोहः ॥ सभयमात्मगतं ॥ आः प्रसिद्धमहाप्रभावा सा योगिनी स्वभावाद्विद्वेषिणी चास्माकं दुरुच्छेद्या । भवतु । ॥ प्रकाशं ॥ भद्र । अलमनया शङ्कया । कामक्रोधादिप्रतिपक्षेषु कुत्रेयमुदेष्यति ।

चार्वाकः ॥ तथापि लघीयस्यपि रिपौ नानवहितेन जिगीषुणा भवितव्यं । यतः

विपाकदारुणो राज्ञां रिपुरल्पोऽप्यरुंतुदः ।
उद्वेजयति सूक्ष्मोऽपि चरणं कण्टकाङ्कुरः ॥ २७ ॥

महामोहः ॥ नेपथ्याभिमुखं विलोक्य ॥ कः कोऽत्र भोः ।

प्रविश्य दौवारिकः ॥ आज्ञापयतु देवः ।

महामोहः ॥ भो असत्संग आदिश्यन्तां कामक्रोधलोभमदमानमात्सर्यादयो यथा योगिनी विष्णुभक्तिर्भवद्भिरेवावहितैर्विहन्तव्येति ।

दौवारिकः ॥ यदाज्ञापयति देवः । ॥ इति निष्क्रान्तः ॥

॥ ततः प्रविशति पत्रहस्तपुरुषः ॥

पुरुषः ॥ हग्गे उक्कलदेशादो आगदो म्हि । अत्थि तत्थ साअलतीलसण्णिवेसे पुलिसोत्तमसण्णिअं देवदाअदणं । तस्सिं महमाणेहिं भट्टकेहिं महालाअसआसं पेसिदो म्हि ॥ ॥ विलोक्य ॥ एसा वाराणसी । एदं लाअउलं । जाव पविसामि ॥ प्रविश्य ॥ एसे भट्टके चावाकेण सह्नं किं वि मन्तअं चिट्ठदि । ता उपसप्पामि णं ॥ उपसृत्य ॥ जेदु जेदु भट्टके । एदं पत्तं णिलूपमाणं पेक्खेदु भट्टकेहिं । *)

महामोहः ॥ पत्रं गृहीत्वा ॥ कुतो भवान्.

पुरुषः ॥ हग्गे पुलिसोत्तमादो आगदो म्हि **) ।

*) अहमुत्कलदेशादागतोऽस्मि । अस्ति तत्र सागरतीरसंनिवेशे पुरुषोत्तमसंज्ञितं देवायतनं । तस्मिन् महमानाभ्यां भट्टारकाभ्यां महाराजसकाशं प्रेषितोऽस्मि । एषा वाराणसी । इदं राजकुलं । यावत् प्रविशामि । एष भट्टारकश्चार्वाकेण सार्धं किमिति मन्त्रयंस्तिष्ठति । तदुपसर्पाम्येनं । जयतु जयतु भट्टारकः । एतत् पत्रं निरूप्यमाणं प्रेक्ष्यतां भट्टारकैः ।

**) अहं पुरुषोत्तमादागतोऽस्मि ।

महामोहः ॥ स्वगतं ॥ कार्यमत्याहितं भविष्यति ॥ प्रकाशं ॥ चार्वाक गच्छ कर्तव्येष्ववहितेन भवता भवितव्यं ।

चार्वाकः ॥ यदाज्ञापयति देवः । ॥ इति निष्क्रान्तः ॥

महामोहः ॥ पत्रं वाचयति ॥ स्वस्ति श्रीवाराणस्यां महाराजाधिराजपरमेश्वरमहामोहपादान् पुरुषोत्तमायतनान्मदमानौ साष्टाङ्गपातं प्रणम्य विज्ञापयतः । यथा भद्रमव्याहतं । अन्यच्च । देवी शान्तिर्मात्रा श्रद्धया सह विवेकस्य दौत्यमापन्ना विवेकसंगमाय देवीमुपनिषदमहर्निशं प्रबोधयति । अपि च । कामसहचरोऽपि धर्मो वैराग्यादिभिरुपजाप्त इव लक्ष्यते । यतः । कामाद्विछिद्य क्वचिन्निगूढः प्रचरति । तदेतज् ज्ञात्वा देवः प्रमाणमिति ॥ पत्रं वाचयित्वा सक्रोधं ॥ आः किमेवमतिमुग्धाः शान्तेरपि बिभ्यति । कुतोऽस्याः संभवः । तथा हि

धाता विश्वविसृष्टिमात्रनिरतो देवोऽपि गौरीभुजा-
श्लेषानन्दविघूर्णमाननयनो दक्षाध्वरध्वंसनः ।
दैत्यारिः कमलाकपोलमकरीलेखाङ्कितोरःस्थलः
शेतेऽन्धावितरेषु जन्तुषु पुनः का नाम शान्तेः कथा ॥ २८ ॥

॥ पुरुषं प्रति ॥ जाल्म गच्छ कामं सत्वरमुपेत्यादेशमस्माकं प्रति-

पादय । यथा दुराशयो धर्म इत्यस्माभिरवगतं । तदस्मिन्
मुहूर्तमपि न विश्वसितव्यं दृढं बद्धा धारयितव्य इति ।

पुरुषः ॥ जं देवो आणवेदि । *)

॥ इति निष्क्रान्तः ॥

महामोहः ॥ स्वगतं विचिन्त्य ॥ शान्तेः को ऽप्युपायः ॥ अथवा-
लमुपायान्तरेण क्रोधलोभावेव तावदत्र पर्याप्तौ ।

॥ प्रकाशं ॥ कः को ऽत्र भोः ।

॥ प्रविश्य दौवारिकः ॥ आज्ञापयतु देवः ।

महामोहः । तावदाहूयतां क्रोधो लोभश्च ।

दौवारिकः ॥ यदादिशति देवः ।

॥ इति निष्क्रान्तः ॥

॥ ततः प्रविशति क्रोधो लोभश्च ॥

क्रोधः ॥ श्रुतं मया यथा शान्तिश्रद्धाविष्णुभक्तयो महाराजेन
प्रतिपक्षभावमाचरन्तीति । अहो मयि जीवति कथमासामा-
त्मनिरपेक्षितं चेष्टितं । तथा हि

अन्धीकरोमि भुवनं बधिरीकरोमि
धीरं सचेतनमचेतनतां नयामि ।
कृत्यं न पश्यति न येन हितं शृणोति
धीमान् अधीतमपि न प्रतिसंदधाति ॥ २१ ॥

*) यद्देव आज्ञापयति ।

लोभः ॥ अरे मदुपगृहीता मनोरथसरित्परंपरैव तावन्न तरिष्यन्ति । किं पुनः शान्त्यादींश्चिन्तयिष्यन्ति । पश्य सखे

सन्त्येते मम दन्तिनो मदजलप्रम्लानगण्डस्थला
वातव्यायतपातिनश्च तुरगा भूयोऽपि लप्स्ये परान् ।
एतल्लब्धमिदं लभे पुनरिदं लब्धाधिकं ध्यायतां
चिन्ताजर्जरचेतसां बत नृणां का नाम शान्तेः कथा ॥ ३० ॥

क्रोधः ॥ सखे विदितस्त्वया मत्प्रभावः ।

त्वाष्ट्रं पुत्रमपातयत् सुरपतिश्चन्द्रार्धचूडोऽच्छिनद्
देवो ब्रह्मशिरो वशिष्ठतनयान् आघातयत् कौशिकः ।
विद्यावन्त्यपि कीर्तिमन्त्यपि सदाचारावदातान्यपि
प्रोच्चैःपौरुषभूषणान्यपि कुलान्युद्धर्तुमीशः क्षणात् ॥ ३१ ॥

लोभः ॥ तृष्णे इतस्तावत् ।

प्रविश्य तृष्णा ॥ किं आणवेदि अज्जउत्तो । *)

लोभः ॥ प्रिये श्रूयतां

क्षेत्रग्रामवनाद्रिपत्तनपुरीद्वीपक्ष्मामण्डल-
प्रत्याशाघनसूत्रबद्धमनसां लब्धाधिकं ध्यायतां ।
तृष्णे देवि यदि प्रसीदसि तनोष्यङ्गानि तुङ्गानि चेत्
तद्भोः प्राणभृतां कुतः शमकथा ब्रह्माण्डलब्धैरपि ॥ ३२ ॥

*) किमाज्ञापयत्यार्यपुत्रः ।

तृष्णा ॥ अज्जउत्त सव्वं जव्व दाव अहं एदस्सिं अत्थे णिच्चं
अहिजुत्ता संपदं अज्जउत्तस्स आणाए बम्हण्डकोडिहिं वि ण
मे उअरं पूरइस्सदि । *)

क्रोधः ॥ हिंसे इत आगम्यतां ।

प्रविश्य हिंसा ॥ एसम्हि आणवेदु अज्जउत्तो । **)

क्रोधः ॥ प्रिये त्वया सह धर्मचारिण्या मातृपितृवधो ममेष-
त्कार एव । तथा हि

केयं माता पिशाची क इव च जनको भ्रातरः केऽत्र कीटा
वध्योऽयं बन्धुवर्गः कुटिलविटसुहृच्चेष्टिता ज्ञातयोऽमी ।

॥ एतौ निष्पीड्य ॥

आगर्भं यावदेषां कुलमिदमखिलं नैव निःशेषयामि
स्फुरन्तः क्रोधवह्नेर्न दधति विरतिं तावदङ्गे स्फुलिङ्गाः ॥

॥ विलोक्य ॥ एष स्वामी । तदुपसर्पामः ।

॥ उपसृत्य सर्वे ॥ जयतु जयतु देवः ।

महामोहः ॥ श्रद्धायास्तनया शान्तिरस्मद्द्वेषिणी सा भव-
द्भिर्ग्राह्येति ।

*) आर्यपुत्र स्वयमेव तावदहमेतस्मिन्नर्थे नित्यमभियुक्ता साम्प्रतमार्यपुत्रस्याज्ञया ब्रह्माण्ड-
कोटिभिरपि न मे उदरं पूरयिष्यते ।

**) एषास्मि आज्ञापयत्वार्यपुत्रः ।

सर्वे ॥ यदादिशति देवः ।

॥ इति निष्क्रान्ताः ॥

महामोहः ॥ श्रद्धायास्तनयेत्युपक्षेपेणोपायान्तरमपि हृदयमारूढं । तथा हि शान्तेर्माता श्रद्धा सा च परतन्त्रा । तत् केनाप्युपायेनोपनिषत्सकाशात् तावच्छ्रद्धापकर्षणं कर्तव्यं । ततो मातृवियोगदुःखादतिमृदुलतया शान्तिरुपरता भविष्यति । अवसीदन्ती च विनश्यति । श्रद्धां व्याकर्तुं मिथ्यादृष्टिरेव विलासिनी परं प्रगल्भेति । तदस्मिन् विषये सैव नियोज्यतां ॥ पार्श्वतो विलोक्य ॥ विभ्रमवति सत्वरमाहूयतां मिथ्यादृष्टिः ।

विभ्रमवती ॥ जं देवो आणवेदि । *)

॥ इति निष्क्रम्य मिथ्यादृष्ट्या सह प्रविशति ॥

मिथ्यादृष्टिः ॥ सहि चिरदिट्ठस्स महाराअस्स कहं मुहं पेक्खिस्सं ण क्खु मं महाराओ उवालहिस्सदि । **)

विभ्रमवती ॥ सहि तुव मुहदंसणेण अप्पाणं जेव्व महाराओ ण वेदिस्सदि कुदो उवालहिस्सदि । ***)

मिथ्यादृष्टिः ॥ सहि किं मं अलीअं सोहग्गं संभाविअ विलम्बेसि । †)

*) यद्देव आज्ञापयति ।

**) सखि चिरदृष्टस्य महाराजस्य कथं मुखं प्रेक्षिष्ये न खलु मां महाराज उपालप्स्यति ।

***) सखि तव मुखदर्शनेनात्मानमेव महाराजो न वेत्स्यति कुत उपालप्स्यति ।

†) सखि किं मामलीकं सौभाग्यं संभाव्य विडम्बयसि ।

विभ्रमवती ॥ सहि संपदं जेव्व पेक्खिस्सं अलिअत्तणं सोहग्गस्स । अण्णं च । णिद्दाघुण्णाउलं पिअसहीए लोअणं पेक्खेमि । ता किं खु पिअसहीए लोअणस्स विणिद्ददाए कारणं । *)

मिथ्यादृष्टिः ॥ सहि एक्कवल्लहा वि जा इत्थिआ भोदि ताए वि णिद्दा दुल्लहा किं उण अम्हाणं सअललोअवल्लहाणं । **)

विभ्रमवती ॥ के के उण पिअसहीए वल्लहा । ***)

मिथ्यादृष्टिः ॥ महाराओ अदो उवरि कामो कोहो लोहो अहंआरो त्ति । अह वा अलं विसेसेण । एत्थ कुले जो जादो ण मए विणा वालो त्थविरो जुवाणो वा हिअअणिहिदए रत्तिदिणाइं अहिरमदि । †)

विभ्रमवती ॥ णं एत्थं कामस्स रदी कोहस्स हिंसा लो-

*) सखि साम्प्रतमेव प्रेक्षिष्येऽलीकत्वं सौभाग्यस्य । अन्यच्च । निद्राघूर्णाकुलं प्रियसख्या लोचनं प्रेक्षयामि । तत् किं खलु प्रियसख्या लोचनस्य विनिद्रतायाः कारणं ।

**) सखि एकवल्लभापि या स्त्री भवति तस्या अपि निद्रा दुर्लभा किं पुनरस्माकं सकललोकवल्लभानां ।

***) के के पुनः प्रियसख्या वल्लभाः ।

†) महाराज अत उपरि कामः क्रोधो लोभोऽहंकार इति । अथ वालं विशेषेण । अत्र कुले यो जातो न मया विना वालः स्थविरो युवा वा हृदयनिहितया रात्रिदिनान्यभिरमते ।

हस्स तिण्हा परमपिआ । त्ति सुणीअन्दि ताणं कहं जं पिअदमं णिच्चं रमन्दी इस्सं ण जणेसि । *)

मिथ्यादिट्ठिः ॥ सहि इस्स त्ति किं भणीअदि ण ता वि मए विणा मुहुत्तं वि चिट्ठन्ति । **)

विभ्रमवती ॥ सहि अदो ज्जेव्व भणामि तुव सरिसी सुहगा इत्थिआ पुहवीए णत्थि जाए सोहग्गमहड्ढिविहुरिदहिअआ सवत्तीआ पसाअं पडीच्छन्ति । सहि अण्णच्च भणामि । एव्वं णिद्दाउलहिअआ विसंठुलक्खलन्तचलणणेउलझंकालमुहलाए गदीए महाराअं संभावअन्दी सङ्किदहिअअं करिस्सदि पिअसही त्ति तक्केमि । ***)

मिथ्यादृष्टिः ॥ किं एत्थं सङ्किदव्वं । णं अम्हाणं महाराअणिउत्ताणं ज्जेव्व एसो अविणओ । अवि अ । सहीदंसणमत्तपसण्णाणं पुरिसाणं केरिसं भअं । †)

*) नन्वहं कामस्य रतिः क्रोधस्य हिंसा लोभस्य तृष्णा परमप्रिया । इति श्रूयन्ते तासां कथं यत् प्रियतमं नित्यं रमयन्ती ईर्ष्यां न जनयसि ।

**) सखि ईर्ष्येति किं भण्यते न ता अपि मया विना मुहूर्तमपि तिष्ठन्ति ।

***) सखि अत एव भणामि तव सदृशी सुभगा स्त्री पृथिव्यां नास्ति यस्याः सौभाग्यमहर्द्धिविधुरितहृदयाः सपत्न्यः प्रसादं प्रतीच्छन्ति । सखि अन्यच्च भणामि । एवं निद्राकुलहृदया विसंष्ठुलस्खलच्चरणनूपुरझंकारमुखरया गत्या महाराजं संभावयन्ती शङ्कितहृदयं करिष्यति प्रियसखीति तर्कयामि ।

†) किमत्र शङ्कितव्यं । नन्वस्माकं महाराजनियुक्तानामेवैष अविनयः । अपि च । सखीदर्शनमात्रप्रसन्नानां पुरुषाणां कीदृशं भयं ।

महामोहः ॥ विलोक्य ॥ अये संप्राप्तैव प्रिया मिथ्यादृष्टिः ।
या एषा

श्रोणीभारभरालसादरगलन्माल्योपवृत्तिछलाल्-
लीलोत्क्षिप्तभुजोपदर्शितकुचोन्मीलन्नखाङ्कावलिः ।
नीलेन्दीवरदामदीर्घतरया दृष्या धयन्ती मनो
दोलान्दोलनलोलकङ्कणरणत्कारोत्तरं सर्पति ॥ ३४ ॥

विभ्रमवती ॥ एसो महाराओ उवसप्पदु पिअसही । *)
मिथ्यादृष्टिः ॥ उपसृत्य ॥ जअदु जअदु महाराओ । **)
महामोहः ॥ प्रिये

दलितकुचनखाङ्कमङ्कपालीं
रचय ममाङ्कमुपेत्य पीवरोरु ।
अनुकुरु हरिणाक्षि शङ्कराङ्क-
स्थितहिमशैलसुताविलासलक्ष्मीं ॥ ३५ ॥

मिथ्यादृष्टिः ॥ सस्मितं तथा करोति ॥
महामोहः ॥ आलिङ्गनसुखमभिनीय ॥ अहो प्रियायाः परिष्वङ्गात्
परावृत्तं नवयौवनं ।

*) एष महाराज उपसर्पतु प्रियसखी ।
**) जयतु जयतु महाराजः ।

यः प्रागासीदभिनववयोविभ्रमात्रातजन्मा
चित्तोन्माथी विगतविषयोपप्लवानन्दसान्द्रः ।
वृत्तीस्तास्तिरयति तवाश्लेषजन्मा स कोऽपि
प्रौढप्रेमा नव इव पुनर्मान्मथो मे विकारः ॥ ३६ ॥

मिथ्यादृष्टिः ॥ महाराअ अहं वि संपदं णवजोव्वणा विअ संवुत्ता ण खु भावाणुबद्धं पेम कालेणावि विलीअदि । आणवेदु भट्टा किं णिमित्तं भट्टिणा सुमरिदम्हि । *)

महामोहः ॥ प्रिये

स्मर्यते स हि वामोरु यो भवेद्धृदयाद्बहिः ।
मच्चित्तभित्तौ भवती शालभञ्जीव राजते ॥ ३७ ॥

मिथ्यादृष्टिः ॥ महापसादो तधावि आणवेदु महाराओ । **)

महामोहः ॥ यथैव प्रकाशितैरङ्गैः सर्वत्र विचरसि तथैव प्रवर्तितव्यं । अन्यच्च । दास्याः पुत्री श्रद्धा विवेकेन सहोपनिषदं योजयितुं कुट्टिनीभावमापन्ना ।

अतः

प्रतिकूलामकुलजां पापां पापानुवर्तिनीं ।
केशेष्वाकृष्य तां रण्डां पाखण्डेषु नियोजय ॥ ३८ ॥

*) महाराजाहमपि साम्प्रतं नवयौवनेव संवृत्ता न खलु भावानुबद्धं प्रेम कालेनापि विलीयते । आज्ञापयतु भट्टारकः किं निमित्तं भट्टारकेण स्मारितास्मि ।

**) महाप्रसादस्तथाप्याज्ञापयतु महाराजः ।

मिथ्यादृष्टिः ॥ एदाव मत्तके वि विसए अलं भट्टिणो अहि-णिवेसेण । वअणमत्तकेण भट्टिणो दासी सद्धा आणं करिस्सदि । स खु मए मित्था धम्मो मित्था मोक्खो मित्था वेअमग्गो मित्था सुहविग्घआइं मित्था सत्थप्पलविदाइं मित्था सग्गफलविज्जेत्ति भणिज्जन्दी वेअमग्गं ज्जेव्व पलिहलिस्सदि किं उण उवणिसदं । अवि अ । विसआणन्द-विमुक्के मोक्खे दोसाणो दंसअन्दीए उवणिसदो वि विरत्ता करइस्सदि अचिरं मए सद्धा । *)

महामोहः ॥ यद्येवं सुष्ठु मे प्रियं संपादितं प्रियया ॥ पुनरालिङ्गय चुम्बति ॥

मिथ्यादृष्टिः ॥ भट्टिणा पआसे त्रि प्पवुत्ते ण लज्जेमि । **)

महामोहः ॥ तद्भवतु । वासागारमेव प्रविशावः ।

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति ॥

॥ द्वितीयोऽङ्कः ॥

*) एतावन्मात्रकेऽपि विषयेऽलं भर्तुरभिनिवेशेन । वचनमात्रकेणैव भर्तुर्दासी श्रद्धाज्ञां करिष्यति । सा खलु मया मिथ्या धर्मो मिथ्या मोक्षो मिथ्या वेदमार्गो मिथ्या सुखविघ्नकराणि मिथ्या शास्त्रप्रलपितानि मिथ्या स्वर्गफलविधेति भण्यमाना वेद-मार्गमेव परिहरिष्यति किं पुनरुपनिषदं । अपि च । विषयानन्दविमुक्ते मोक्षे दोषान् दर्शयन्त्योपनिषदोऽपि विरक्ता करिष्यतेऽचिरं मया श्रद्धा ।

**) भर्त्रा प्रकाशेऽपि प्रवृत्ते न लज्जामि ।

॥ अथ ॥

॥ तृतीयोऽङ्कः ॥

॥ ततः प्रविशति शान्तिः करुणा च ॥

शान्तिः ॥ सास्रं ॥ मातर्मातः क्वासि देहि मे प्रियदर्शनं । ततः

मुक्तातङ्ककुरङ्गकाननभुवः शैलाः स्खलद्वारयः
पुण्यान्यायतनानि संततपोनिष्ठाश्च वैखानसाः ।
यस्याः प्रीतिरमीषु सात्रभवती चाण्डालवेश्मोदरं
प्राप्ता गौः कपिलेव जीवति कथं पाखण्डहस्तं गता ॥ १ ॥

अथवा अलं जीवितसंभावनया । यतः

मामनालोक्य न स्नाति न भुङ्क्ते न पिबत्यपः ।
न मया रहिता श्रद्धा मुहूर्तमपि जीवति ॥ २ ॥

तद्विना श्रद्धया मुहूर्तमपि शान्तेर्जीवनं विडम्बनमेव । तत् सखि करुणे मदर्थं चिन्ता मा रचय यावदचिरमेव हुताशनप्रवेशनेन तस्याः सहचरी भवामि ।

करुणा ॥ सास्रं ॥ सहि एव्वं विसमज्जलणजालाउलकुण्ड-

दुस्सहाइं अक्खराइं जप्पन्दी सव्वधा विलुत्तजीविदं मं करोसि । ता पसीद मुहुत्तं धारेदु जीविदं पिअसही जाव इदो तदो पुण्णेसु आसमेसु मुणिअणसमाउलेसु भागीरहीतीरेसु णिउणं णिरूवम्ह । कआवि महामोहभीदा कहिं विप्पच्छण्णा णिवसदि । *)

शान्तिः ॥ सखि किमन्विष्यते ।

नीवाराङ्कितसैकतानि सरितां कूलानि वैखानसैर्
आक्रान्तानि समिद्धबालचमसव्याप्ता गृहा यज्वनां ।
प्रत्येकं च निरूपिताः प्रतिपदं चत्वार एवाश्रमाः
श्रद्धायाः क्वचिदप्यहो खलु मया वार्तापि नाकर्णिता ॥३॥

करुणा ॥ सहि एव्वं भणामि जइ सा जेव्व सत्ताई सद्धा तदा ताए ण एरिसीं दुग्गदिं संभावेमि । ण खु तारिसीए पुण्णमईए एतारिसीं अणुहवन्ति असंभावणिज्जं विवत्तिं । **)

शान्तिः ॥ सखि किमु प्रतिकूले विधातरि न संभाव्यते ।

*) सखि एवं विषमज्वलनज्वालाकुलकर्णकटुदुःसहान्यक्षराणि जल्पन्ती सर्वथा विलुप्तजीवितां मां करोषि । तत् प्रसीद मुहूर्तकं धारयतु जीवितं प्रियसखी यावदितस्ततः पुण्येष्वाश्रमेषु मुनिजनसमाकुलेषु भागीरथीतीरेषु निपुणं निरूपयामः । कदाचिन्महामोहभीता कुत्रापि प्रच्छन्ना निवसति ।

**) सखि एवं भणामि यदि सैव सात्त्विकी श्रद्धा तदा तस्या नेदृशीं दुर्गतिं संभावयामि । न खलु तादृश्यः पुण्यमय्य एतादृशीमनुभवन्त्यसंभावनीयां विपत्तिं ।

देवी धर्णिजनकात्मजा दशमुखस्यासीद्गृहे रक्षसो
नीता चैव रसातलं भगवती वेदत्रयी दानवैः ।
गन्धर्वस्य मदालसां च तनयां पातालकेतुश्छलाद्
दैत्येन्द्रोऽपजहार हन्त विषमा वामा विधेर्वृत्तयः ॥४॥

तद्भवतु पाखण्डालयेष्वेव तावदनुसरावः ।

करुणा ॥ एव्वं भोदु । *)

॥ इति परिक्रामतः ॥

करुणा ॥ सत्रासं ॥ सहि रक्खसो रक्खसो । **)

शान्तिः ॥ कोऽसौ राक्षसः ।

करुणा ॥ सहि पेक्ख पेक्ख जो एसो गलन्तमलप-ङ्कपिच्छिलवीहच्छदुप्पेक्खदेहच्छवीउल्लुञ्चिअचिउरमुक्कवसणदुद्द-सणो सिहिसिहण्डपिच्छहत्थो इदो जेव्व अहिवट्टदि । ***)

शान्तिः ॥ सखि नायं राक्षसः । निर्वीर्यः खल्वयं ।

करुणा ॥ ता को एसो भविस्सदि । †)

शान्तिः ॥ सखि पिशाच इति शङ्के ।

*) एवं भवतु ।

**) सखि राक्षसो राक्षसः ।

***) सखि प्रेक्षस्व प्रेक्षस्व य एष गलन्मलपङ्कपिच्छिलबीभत्सदुःप्रेक्ष्यदेहच्छव्युल्लुञ्छितचिकुरमुक्तवसनदुर्दर्शनः शिखिशिखण्डपिच्छहस्त इत एवाभिवर्तते ।

†) तत् क एष भविष्यति ।

करुणा ॥ सहि पप्फुरन्तमहामऊहमालुब्भासिअभुअणन्तरे जलदि पचण्डमत्तण्डमण्डले कधं पिसाआणं अवआसो । *)

शान्तिः ॥ तदनन्तरमेव नरकविवरादुत्तीर्णः कोऽपि नारकी भविष्यति ॥ विलोक्य विचिन्त्य ॥ आ ज्ञातं । महामोहप्रवर्तितोऽयं दिगम्बरसिद्धान्तः । तत् सर्वथा दूरे परिहरणीयमस्य दर्शनं ।

॥ इति पराङ्मुखी भवति ॥

करुणा ॥ सहि मुहुत्तकं चिट्ठ जाव एत्थ सहं अण्णेसामि । **)

॥ उभे तथा स्थिते ॥

॥ ततः प्रविशति यथानिर्दिष्टो दिगम्बरसिद्धान्तः ॥

दिगम्बरः ॥ णमो अलिहन्ताणं णमो अलिहन्ताणं । णवदुवालघलमज्झे अप्पा दीव इअ मन्तव्वे । एसे जिणवलभासिदे पलमत्थे मोक्खसुक्खदे ॥ परिक्रामति आकाशे ॥ ले ले सावका सुणाध सुणाध । मलमयपुग्गलपिण्डे संअलजलेहिं वि केलिसी सुद्धी । अप्पा विमलसहाए लिसिपलिचलणेहिं जाणिव्वे । किं भणाध केलिसं लिसिपलिचलणं ति । ता सुणाध । दूले चलणपणामे किरसक्कालं च भोअणं मिट्ठं ।

*) सखि प्रस्फुरन्महामयूखमालोद्भासितभुवनान्तरे ज्वलति प्रचण्डमार्तण्डमण्डले कथं पिशाचानामवकाशः ।

**) सखि मुहूर्तकं तिष्ठ यावदत्र अहमन्वेषयामि ।

इस्सामलं ण कळ्ळं लिसीणं दालं णमत्ताणं ॥ नेपथ्याभिमुखमवलोक्य सद्धे इदो दाव इदो दाव । *)

॥ उभौ सभयमवलोकयतः ॥

॥ ततः प्रविशति तदनुरूपवेशा श्रद्धा ॥

श्रद्धा ॥ किं आणावेदि लाउले । **)

॥ भ्रान्तिर्मूर्छिता पतति ॥

दिगम्बरः ॥ सावकाणं कुलं मुहुत्तं एक्कं वि मा पलिहलिस्सदि । ***)

श्रद्धा ॥ जं आणावेदि लाउले । †)

॥ इति निष्क्रान्ता ॥

करुणा ॥ समस्ससदु समस्ससदु पिअसही । ण क्खु णाममत्तकेणावि पिअसहीए भेदव्वं जदो सुदं मए अहिंसासआसादो

*) नमोऽर्हद्भ्यः नमोऽर्हद्भ्यः । नवद्वारगृहमध्ये आत्मा दीप इव मन्तव्यः । एष जिनवरभाषितः परमार्थो मोक्षसुखदः । रे रे श्रावकाः शृणुत शृणुत । मलमयपुद्गलपिण्डे सकलजलैरपि कीदृशी शुद्धिः । आत्मा विमलस्वभाव ऋषिपरिचरणेन ज्ञातव्यः । किं भणथ कीदृगृषिपरिचरणमिति । तच्छृणुत । दूरे चरणप्रणामः कृतसत्कारं च भोजनं मृष्टं । ईर्ष्यामलं न कार्यमृषीणां दारान् नमगमानानां । श्रद्धे इतस्तावत् ।

**) किमाज्ञापयति राजकुलं ।

***) श्रावकाणां कुलं मुहूर्तमेकमपि मा परिहास्यति ।

†) यदाज्ञापयति राजकुलं ।

दं, ग्रत्थि पाखण्डाणं वि तमस्स सुदा सद्धेति । तेण एसा तामसी सद्धा भविस्सदि । *)

शान्तिः ॥ समाश्वस्य ॥ सखि एवमेतत् । तथा हि

दुराचारा सदाचारां दुर्दर्शा प्रियदर्शनां ।
ग्रम्बामनुसरत्येषा दुराशा न कथंचन ॥ ५ ॥

तद्भवतु तावत् सौगतेष्वसावन्विष्यतां ।

॥ शान्तिकरुणे परिक्रामतः

॥ ततः प्रविशति भिक्षुरूपः पुस्तकहस्तो बुद्धागमः ॥

भिक्षुः ॥ विचिन्त्य ॥ भो भो उपासकाः

साक्षात् क्षणक्षयिण एव निरात्मकाश्च
यत्रार्पिता बहिरिव प्रतिभान्ति भावाः
सैवाधुना विगलिताखिलवासनत्वाद्
धीसंततिः स्फुरति निर्विषयोपरागा ॥ ६ ॥

॥ परिक्रम्य पुनः सश्लाघं ॥ ग्रहो साधुरयं सौगतधर्मः यत्र सौख्यं च मोक्षश्च । तथा हि

ग्रावासो लयनं मनोहरमभिप्रायानुरूपा वणिग्-
भार्या वाञ्छितकालमिष्टमशनं शय्या मृदुप्रस्तराः ।

*) समाश्वासयतु समाश्वासयतु प्रियसखी । न खलु मात्रकेणापि प्रियसख्या भेतव्यं यतः श्रुतं मया ग्रहिंसासकाशात् यदस्ति पाषण्डानामपि तमसः सुता श्रद्धेति । तेनैषा तामसी श्रद्धा भविष्यति ।

श्रद्धापूर्वमुपासिता युवतिभिः क्लृप्ताङ्गरागोत्सव-
क्रीडानन्दभरैर्व्रजन्ति विलसज्ज्योत्स्नोज्ज्वला रात्रयः ॥७॥

करुणा ॥ सहि को एसो तरुणतालतरुप्पलम्बो लम्बन्त-कसाअपिसङ्गचीवरो मुण्डिअसचूडमुण्डपिण्डो इदो ज्जेव्व आ-अच्छदि । *)

शान्तिः ॥ सखि बुद्धागम एषः ।

भिक्षुः ॥ प्रकाशे ॥ भो भो उपासका भिक्षवश्च श्रूयतां भगवतः सुगतस्य वाक्यामृतं ॥ पुस्तकं वाचयति ॥ पश्याम्यहं भिक्षवो दिव्येन चक्षुषा लोकानां सुगतिं दुर्गतिं च । संस्क्रियन्ते क्षणिकाः सर्वसंस्काराः । नास्त्यात्मा स्थायी तस्माद्भिक्षुषु दारान् आक्रामत्सु नेर्षितव्यं चित्तमलं हि तद्यदीर्ष्यानाम ॥ नेपथ्याभिमुखमवलोक्य ॥ श्रद्धे इतस्तावत् ।

प्रविश्य श्रद्धा ॥ आणवेदु लाउले । **)

भिक्षुः ॥ उपासकान् भिक्षूंश्च चिरमालिंग्य स्थीयतां ।

श्रद्धा ॥ जं आणावेदि लाउले । ***)

॥ इति निष्क्रान्ता ॥

*) सखि क एष तरुणतालतरुप्रलम्बो लम्बत्कषायपिशङ्गचीवरो मुण्डितसचूडमुण्डपिण्ड इत एवागच्छति ।

**) आज्ञापयतु राजकुलं ।

***) यदाज्ञापयति राजकुलं

शान्तिः ॥ सखि इयमपि तामसी श्रद्धा ।

करुणा ॥ एव्वं णेदं । *)

क्षपणकः ॥ भिक्षुमालोक्य उच्चैःशब्दं ॥ अले अले भिकखुआ इदो दाव किं वि पुच्छिस्सं । **)

भिक्षुः ॥ सक्रोधं ॥ आः पाप पिशाचाकृते किमेवं प्रलपसि ।

क्षपणकः ॥ अले मुञ्च कोहं सत्थगदं पुच्छिस्सं । ***)

भिक्षुः ॥ अरे क्षपणक शास्त्रकथामपि वेत्सि । भवतु प्रतीमस्तावत् ॥ उपसृत्य ॥ किं पृच्छसि ।

क्षपणकः ॥ भण दाव खणविणासिणा तुए कस्स कए वदं धलीअदि । †)

भिक्षुः ॥ अरे श्रूयतां । अस्मत्संततिपतितः कश्चिद् विज्ञानक्षणः समुच्छिन्नवासनो मोक्ष्यते ।

क्षपणकः ॥ अले मुक्खा जइ कस्सिं वि मणन्तले कोवि मुक्के भविस्सदि तदो दे संपदं पणट्ठस्स कदे केलिसं उव-

*) एवमेतत् ।

**) अरेऽरे भिक्षुक इतस्तावत् किमपि पृच्छामि ।

***) अरे मुञ्च क्रोधं शास्त्रगतं पृच्छामि ।

†) भण तावत् क्षणविनाशिना त्वया कस्य कृते व्रतं धार्यते ।

अलं कलिस्सदि । अण्णं च पुछामि । केण वा ईलिसे धम्मे उवदिट्ठे । *)

भिक्षुः ॥ ननु सर्वज्ञेन भगवता बुद्धेनोक्तः अयमेव धर्मः ।

क्षपणकः ॥ अले सव्वण्णो बुद्धे अत्थि त्ति कधं तुए णादं । **)

भिक्षुः ॥ ननु रे तदागमैरेव प्रसिद्धो बुद्धः सर्वज्ञ इति ।

क्षपणकः ॥ अले लिज्जुअबुद्धिआ जइ तस्स भासिदेण सव्वण्णत्तणं पडिवज्जेसि ता अहं वि सव्वं जाणामि तुमं वि पिदुपिदामहेहिं सद्धं सत्तपुलिसेहिं दासे त्ति । ***)

भिक्षुः ॥ सक्रोधं ॥ आः पाप पिशाचमलपङ्कधर तवाहं दासः ।

क्षपणकः ॥ अले विहालदासीभुअङ्गा दुट्ठप्पव्वजिआ दिट्ठान्दे मए एसे दंसिदे । ता पिअं दे विसद्धं भणामि । बुद्धाणुसासणं पलिहलिअ अलिहन्ताणुसासणं अणुसलिअ दिअम्बलव्वदं जेव्व धालेदु भवं । †)

*) अरे मूर्ख यदि कस्मिन्नपि मन्वन्तरे कोऽपि गुणो भविष्यति तदा ते सांप्रतं प्राणस्य कृते कीदृशमुपकारं करिष्यति । अन्यच्च पृछामि । केन वेदृशो धर्म उपदिष्टः ।

**) अरे सर्वज्ञो बुद्धोऽस्तीति कथं त्वया ज्ञातं ।

***) अरे ऋजुबुद्धे यदि तस्य भाषितेन सर्वज्ञत्वं प्रतिपद्यसे तदाहमपि सर्वं जानामि त्वमपि पितृपितामहैः सार्द्धं सप्तपुरुषैर्दास इति ।

†) अरे विहारदासीभुजङ्ग दुष्टप्रव्रजित दृष्टान्तो मयैष दर्शितः । तत् प्रियं ते विश्रब्धं भणामि । बुद्धानुशासनं परिहृत्य अर्हदनुशासनमनुसृत्य दिगम्बरव्रतमेव धारयतु भवान् ।

भिक्षुः ॥ आः पाप स्वयं नष्टः परान् अपि नाशयितुमिच्छसि ।

स्वाराज्यं प्राज्यमुत्सृज्य लोके निन्द्यामनिन्दितः ।
अभिवाञ्छति को नाम भवान् इव पिशाचतां ॥ ८ ॥

अपि च । आर्हतमपि धर्मवेदनं कः श्रद्धत्ते ।

क्षपणकः ॥ गहणाकखत्तवालचन्दसूलोपलाग्गसुक्कलाकुप-लमत्थग्गाणां संवाददंसणेण णिलूविदं भग्गवदो सव्वणात्तणं अलिहन्तस्स । *)

भिक्षुः ॥ विहस्य ॥ अरे अनादिप्रवृत्तज्योतिपातीन्द्रियज्ञानप्रतारितेन भवतेदमतिकष्टं व्रतमाश्रितं । तथा हि

ज्ञातुं वपुः परिमितः क्षमते त्रिलोकीं
जीवः कथं कथय संगतिमन्तरेण ।
शक्नोति कुम्भनिहितः सुशिखोऽपि दीपो
भावान् प्रकाशयितुमप्युदरे गृहस्य ॥ ९ ॥

तस्माल्लोकद्वयविरुद्धादार्हतमताद्वरं सुगतदर्शनमेव साक्षात् सुखावहमतिरमणीयं पश्यामः ।

शान्तिः ॥ सखि अन्यतो गच्छावः ।

*) ग्रहनक्षत्रवारचन्द्रसूर्योपरागशुक्रराहुपरमार्थज्ञानं संवाददर्शनेन निरूपितं भगवतः सर्वज्ञत्वमर्हतः ।

करुणा ॥ एव्वं भोदु । *)

॥ इति परिक्रामत

शान्तिः ॥ पुरो विलोक्य ॥ एष पुरस्तात् सोमसिद्धान्तः भवत्व-त्रापि तावदनुसराव: ।

॥ ततः प्रविशति कापालिकरूपधारी सोमसिद्धान्तः ॥

कापालिकः ॥ परिक्रम्य ॥

नरास्थिमालाकृतभूरिभूषणः
श्मशानवासी नृकपालभोजनः ।
पश्यामि योगाञ्जनशुद्धदर्शनो
जगन्मिथो भिन्नमभिन्नमीश्वरात् ॥

क्षपणकः ॥ अले एसे कावालिअव्वदं पुलिसे धालेदि । ता णं वि पुछिस्सं ॥ उपसृत्य ॥

अले अले कावालिआ
णलट्ठिमुण्डधालिआ ।
केलिसे तुम्ह धम्मके
केलिसे तुम्ह मोक्खके ॥ ११ ॥ **)

कापालिकः ॥ अरे क्षपणक धर्मं तावदस्माकमवधारय ।

*) एवं भवतु ।

**) अरे एष कापालिकव्रतं पुरुषो धारयति तदेनमपि पृच्छामि ।
अरे ऽरे कापालिक नरास्थिमुण्डधारक ।
कीदृशस्तव धर्मः कीदृशस्तव मोक्षः

मस्तिष्कान्त्रवसाभिघारितमहामांसाहुतीर्जुह्वतां
वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा ।
सद्यःकृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलैर्
अर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः ॥ १२ ॥

भिक्षुः ॥ कर्णौ पिधाय ॥ बुद्ध बुद्ध अहो दारुणाधर्मचर्याः ।

क्षपणकः ॥ अलिहन्त अलिहन्त घोलपावकालिणा केणावि विप्पलद्धे वलाए । *)

कापालिकः ॥ सक्रोधं ॥ आः पाप पाखण्डापसद मुण्डितमुण्ड चूडालवेश केशलुञ्चक अरे विप्रलम्भकः किल चतुर्दशभुवनोत्पत्तिस्थितिप्रलयप्रवर्तको वेदान्तसिद्धान्तप्रसिद्धविभवो भगवान् भवानीपतिः । दर्शयामस्तर्हि धर्मस्यास्य महिमानं ।

हरिहरसुरज्येष्ठश्रेष्ठान् सुरान् अहमाहरे
वियति वहतां नक्षत्राणां रुणध्मि गतीरपि ।
सनगनगरामम्भःपूर्णां विधाय महीमिमां
कलशशकलैर्भूयस्तोयं क्षणेन पिबामि तत् ॥ १३ ॥

क्षपणकः ॥ अले कावालिआ अदो ज्जेव्व भणामि केणावि इन्दिआलिणा मायं दंसिअ विप्पलद्धे सि त्ति । **)

*) अर्हन् अर्हन् घोरपापकारिणा केनापि विप्रलब्धो वराकः ।

**) अरे कापालिक अत एव भणामि केनापीन्द्रजालिना मायां दर्शयित्वा विप्रलब्धोऽसीति ।

कापालिकः ॥ आः पाप पुनरपि परमेश्वरमैन्द्रजालिकमित्याक्षिपसि । तन्न मर्षणीयमस्य दौरात्म्यं ॥ खड्गमाकृष्य ॥ तद्-हमस्य

एतत्करालकरवालनिकृत्तकण्ठ-
नालोच्छलद्बहलफेनिलबुद्बुदौघैः ।
सार्धं डमड्डमरुडांकृतिहूतभूत-
वर्गेण भर्गगृहिणीं रुधिरैर्धिनोमि ॥ १४ ॥

॥ इति खड्गमुद्यम्य गच्छति ॥

क्षपणकः ॥ सभयं ॥ महाभाआ अहिंसा पलमे धम्मे त्थि । *)

॥ इति भिक्षोरङ्कं प्रविशति ॥

भिक्षुः ॥ कापालिकं वारयन् ॥ भो भो महाभाग कौतुकप्रयुक्ते वाक्कलहे न युक्तमेतस्मिंस्तपस्विनि प्रहर्तुं ।

कापालिकः ॥ खड्गं प्रतिसंहरति ॥

क्षपणकः ॥ समाश्वस्य ॥ महाभाआ जइ संहलिअघोललोसावेसे संवुत्ते तदो हग्गे किं वि पुच्छिदुं इच्छामि । **)

कापालिकः ॥ पृच्छ ।

*) महाभाग अहिंसा परमो धर्मोऽस्ति ।

**) महाभाग यदि संहृतघोररोषावेशः संवृत्तस्ततोऽहं किमपि प्रष्टुमिच्छामि ।

क्षपणकः ॥ सुदे तुम्हाणं पलमे धम्मे । अध केलिसे मो॰ कखसोकखे । *)

कापालिकः ॥ शृणु

दृष्टं क्वापि सुखं विना न विषयैरानन्दबोधोज्झिता
जीवस्य स्थितिरेव मुक्तिरुपलावस्था कथं प्रार्थ्यते ।
पार्वत्याः प्रतिरूपया दयितया सानन्दमालिङ्गितो
मुक्तः क्रीडति चन्द्रचूडवपुरित्यूचे मृडानीपतिः ॥ १५ ॥

भिक्षुः ॥ महाभाग अश्रद्धेयमेतद्वीतरागस्य मुक्तिरिति ।

क्षपणकः ॥ अले कावालिआ जइ ण लूससि तदो भणामि । सलीली सलागी मुक्के त्ति वेअविलुद्धं **)

कापालिकः ॥ स्वगतं ॥ अये अश्रद्धालितमनयोरन्तःकरणं । भव- त्वेवं तावत् ॥ प्रकाशं ॥ श्रद्धे इतस्तावत् ।

॥ ततः प्रविशति कपालिनीरूपधारिणी श्रद्धा ॥

करुणा ॥ सहि पेक्खस्स पेक्खस्स रजस्स सुदं सद्धं । जा एसा

विणिद्दणीलुप्पललोअलोअणा
णरत्थिमालाकिदचालुभूसणा ।

*) श्रुतो युष्माकं परमो धर्मः । अथ कीदृशं मोक्षसौख्यं ।

**) अरे कापालिक यदि न रुष्यसि तदा भणामि । शरीरी सरागो मुक्त इति वेदविरुद्धं ।

णिअम्बपोणत्थणभालमन्थला
विहादि पुण्णेन्दुमुही विलासिणी ॥ १६ ॥ *)

श्रद्धा ॥ परिक्रम्य ॥ एसम्हि आणवेदु सामी । **)

कापालिकः ॥ प्रिये एनं दुरभिमानिनं भिक्षुं तावद्गृहाण ।

श्रद्धा ॥ भिक्षुमालिङ्गति ॥

भिक्षुः ॥ जनान्तिकं सानन्दं परिष्वज्य रोमाञ्चमभिनाय ॥ अहो सुखस्पर्शा कपालिनी । तथा हि

रण्डा पीनपयोधराः कति मया चण्डानुरागाद्भुज-
द्वन्द्वापीडितपीवरस्तनभरं नो गाढमालिङ्गिताः ।
बुद्धेभ्यः शतशः शपे यदि पुनः कुत्रापि कापालिकी-
पीनोत्तुङ्गकुचावगूहनभवः प्राप्तः प्रमोदोदयः ॥ १७ ॥

अहो पुण्यं कापालिकं चरितं । अहो श्लाघ्यः सोमसिद्धान्तः । आश्चर्यो ऽयं धर्मः । भो महाभाग सर्वथा बुद्धानुशासनमस्माभिरुत्सृष्टं । प्रविष्टाः स्मः पारमेश्वरं सिद्धान्तं । तदाचार्यस्त्वं शिष्यो ऽहं प्रवेशय मां पारमेश्वरीं दीक्षां ।

*) सखि प्रेक्षस्व प्रेक्षस्व रजसः सुतां श्रद्धां । यैषा
विनिद्रनीलोत्पललोललोचना नरास्थिमालाकृतचारुभूषणा ।
नितम्बपीनस्तनभारमन्थरा विभाति पूर्णेन्दुमुखी विलासिनी ॥

**) एषास्मि आज्ञापयतु स्वामी ।

क्षपणकः ॥ अले भिक्खुआ कवालिणीफलसदूसिदे तुमं ता दूलं अपसल । *)

भिक्षुः ॥ आः, पाप वञ्चितोऽसि रे कपालिन्याः परिरम्भमहामहोत्सवेन ।

कापालिकः ॥ प्रिये क्षपणकं गृहाण ।

कपालिनी ॥ क्षपणकमालिङ्गति ॥

क्षपणकः ॥ सरोमाञ्चं ॥ अहो अलिहन्त अलिहन्त कवालिणीफंससुहं । सुन्दलि देस्सु दाव पुणो अङ्कवालिं ।
॥ स्वगतं ॥ अले महन्ते खु इन्दिअविआले उवत्थिदे ता अत्थि को वि उवायो किं एत्थ जुत्तं भोदु पिछआए ठङ्किस्सं ॥ तथा कृत्वा ॥

अयि पीणघणत्थणसोहणा
पलिनत्थकुलङ्गविलोअणा ।
जइ लमसि कवालिणि भावही
ता किं कालिस्सदि सावही ॥ १८ ॥

अहो कावालिआ एक्कं दंसणं सोक्खमोक्खसाहणं । भो आचालिआ हग्गो उस्स किङ्कले संपदं संवुत्ते । मं वि महाभैरवाणुसासणे दिक्खस्सु धाणेण । **)

*) अरे भिक्षुक कपालिनीस्पर्शदूषितस्त्वं तद्दूरमपसर ।

**) अहो अर्हन् अर्हन् कपालिनीस्पर्शसुखं । सुन्दरि देहि तावत् पुनरङ्कपालीं । अरे

कापालिकः ॥ उपविश्यतां ।

॥ उभौ तथा कुरुतः ॥

कापालिकः ॥ भाजनं समादाय ध्यानं नाटयति ॥

श्रद्धा ॥ भअवं पूरिदं सुराए भाअणं । *)

कापालिकः ॥ विलोक्य पीत्वा शेषं भिक्षुक्षपणयोरर्पयति ॥

इदं पवित्रममृतं पीयतां भवभेषजं ।
पशुपाशसमुच्छेदकारणं भैरवोदितं ॥ १२ ॥

॥ उभौ विमृशतः ॥

क्षपणकः ॥ अम्हाणं अलिहन्ताणुसासणे सुलापाणं णत्थि । **)

भिक्षुः ॥ कथं कापालिकोच्छिष्टां सुरां पास्यामि ।

कापालिकः ॥ किं विमृशसि । श्रद्धे पशुत्वमनयोर्नाद्याप्यपनीयते । नास्मद्वदनसंसर्गदोषादपवित्रां सुरामेतौ मन्येते । तद्भवती स्ववक्त्रासवपूतां कृत्वा अनयोरुपनयतु । यतस्तीर्थिका अपि वदन्ति स्त्रीमुखं तु सदा शुचीति ।

महान् खल्विन्द्रियविकार उपस्थितः तदस्ति कोऽप्युपायः किमत्र युक्तं भवतु पिच्छिकया छादयिष्यामि ।

अयि पीनघनस्तनशोभना परित्रस्तकुरङ्गविलोचना ।
यदि रमसे कपालिनि भावकी किं करिष्यति श्रावकी ॥

अहो कापालिकैकं दर्शनं सौख्यमोक्षसाधनं । भो आचार्याहं तव किंकरः सांप्रतं संवृत्तः । मामपि महाभैरवानुशासने दीक्षस्व ध्यानेन ।

*) भगवन् पूरितं सुरया भाजनं ।

**) अस्माकमर्हदनुशासने सुरापानं नास्ति ।

श्रद्धा ॥ जं भवं आणवेदि । *)

॥ इति पानपात्रं गृहीत्वा पीतशेषमुपनयति ॥

भिक्षुः ॥ महाप्रसादः ॥ इति चषकं गृहीत्वा पिबति ॥ अहो सुरायाः सौन्दर्यं ।

निपीता वेश्याभिः सह न कतिवारान् सुवदना-
मुखोच्छिष्टास्माभिर्विकचवकुलामोदमधुरा ।
कपालिन्या वक्त्रासवसुरभिमितां तु मदिरां
अलब्धा ज्ञानीमः स्पृहयति सुधायै सुरगणः ॥ २० ॥

क्षपणकः ॥ अले भिक्खुआ मा सव्वं पिब । कवालिणी-वअणासलसं मदिलं मम वि धालेसु । **)

भिक्षुः ॥ क्षपणकाय चषकमुपनयति ॥

क्षपणकः ॥ पीत्वा ॥ अहो सुलाए महुलत्तणं अहो सादे अहो गन्धे अहो सुलहित्तणं । चिलं खु अलिहन्ताणुसासणे पदिदे पडिवञ्चिदेम्हि ईलिसेण सुलालसेण । अले भिक्खुआ घोणन्ति मं अङ्गाइं ता सुविस्सं । ***)

॥ तथा कुरुतः ॥

*) यद्भवान् आज्ञापयति ।

**) अरे भिक्षुक मा सर्वं पिब । कपालिनीवदनरसां मदिरां ममापि धारयस्व ।

***) अहो सुराया मधुरत्वं अहो स्वादः अहो गन्धः अहो सुरभित्वं । चिरं खल्वर्हदनुशासने पतितः प्रतिवञ्चितोऽस्मीदृशेन सुरारसेन । अरे भिक्षुक घूर्णन्ति ममाङ्गानि तत् स्वप्स्यामि ।

भिक्षुः ॥ एवं कुर्वः ।

कापालिकः ॥ प्रिये अमू अल्पक्रीतं दासद्वयं लब्धं । तन्नृत्यावस्तावत् ।

॥ उभे नृत्यतः ॥

क्षपणकः ॥ अले भिक्खुआ एसे कावालिए अह्ह वा अचालिए कवालिणीए सह्ढं सोहणं णच्चेदि । ता एदाए सह्ढं अम्हे वि णच्चामो । *)

भिक्षुः ॥ एवं कुर्वः ।

॥ मदस्खलितं नृत्यतः ॥

क्षपणकः ॥ अयि पाणाघपोत्यादि गायति ॥

भिक्षुः ॥ आचार्य महाश्चर्यमेतद्दर्शनं यत्राक्लेशमभिमतार्थसिद्धयः संपद्यन्ते ।

कापालिकः ॥ कियदेतदाश्चर्यं पश्यसि ।

अत्रानुज्झितचक्षुरादिविषयासंगेऽपि सिध्यत्यमू-
अत्यासन्नमहोदयप्रणयिनामष्टौ महासिद्धयः ।
वश्याकर्षविमोहनप्रशमनप्रक्षोभणोच्चाटन-
प्रायाः प्राकृतसिद्धयस्तु विदुषां योगान्तरायाः परं ॥२१॥

*) अरे भिक्षुक एष कापालिकोऽथवाचार्यः कपालिन्या सार्द्धं शोभनं नृत्यति । तदेतया सार्द्धमावामपि नृत्यावः ।

क्षपणकः ॥ अले कावालिआ ॥ विमृश्य ॥ अले आचालिआ अहवा आचालिआ लाअउला आचालिआ । *)

भिक्षुः ॥ अयमनयातिशयपीतया मदिरया दूरमुन्मनीकृतस्तपस्वी । तत् क्रियतामस्य मदापनयनं ।

कापालिकः ॥ एवं भवतु ॥ इति स्वमुखोच्छिष्टताम्बूलं क्षपणकाय ददाति ॥

क्षपणकः ॥ स्वस्थीभूय ॥ आचालिआ एव्वं पुच्छामि । जादिसी तुम्हाणं सुलाए आहलणसिद्धी किं तादिशी इत्थिआपुलिसेसु वि अत्थि । **)

कापालिकः ॥ किं विशेषेण पृच्छसि । पश्य

विद्याधरीं वाथ सुराङ्गनां वा
नागाङ्गनां वाप्यथ यक्षकन्यां ।
यद्यन्ममेष्टं भुवनत्रयेऽपि
विद्याबलात् तत्तदुपाहरामि ॥ २२ ॥

क्षपणकः ॥ भो एदं मए गणिदेण णादं जं सव्वे अम्हे महामोहस्स किंकले त्ति । ***)

*) अरे कापालिक । अरे आचार्य अथवा आचार्य राजकुलाचार्य ।

**) आचार्यैवं पृच्छामि । यादृशी युष्माकं सुरायामाहरणसिद्धिः किं तादृशी स्त्रीपुरुषेष्वप्यस्ति ।

***) भो एतन्मया गणितेन ज्ञातं यत् सर्वे वयं महामोहस्य किंकरा इति ।

उभौ ॥ यथा ज्ञातमायुष्मता एवमेतत् ।

क्षपणकः ॥ ता लाअकज्जं किं वि मन्तीअन्दु । *)

कापालिकः ॥ किं तत् ।

क्षपणकः ॥ धम्मस्स सुदा सद्धा महालाअस्स आणाए आ-हलीअदु त्ति । **)

कापालिकः ॥ कथय क्वासौ दास्याः पुत्री । एष तामचिरमेव विद्यया बलादुपाहरामि ।

क्षपणकः ॥ खटिकामादाय गणयति ॥

शान्तिः ॥ सखि अभ्यागतमिह हुताशानामालापं शृणोमि । तदवधानेन तावदाकर्णयावः ।

करुणा ॥ सहि एव्वं करेम्ह । ***)

॥ उभे तथा कुरुतः ॥

क्षपणकः ॥

णत्थि जले णत्थि थले णत्थि गिलिवले णत्थि पदाले ।
विण्हुभत्तीए सहिदा वसइ हिदए महाप्पाणाणं ॥ २३ ॥ †)

*) तद्राजकार्यं किमपि मन्त्रयन्तु ।

**) धर्मस्य सुता श्रद्धा महाराजस्याज्ञयाहूयतामिति ।

***) सखि एवं कुर्वः ॥

†) नास्ति जले नास्ति स्थले नास्ति गिरिवरे नास्ति पाताले ।
विष्णुभक्त्या सहिता वसति हृदये महात्मनां ॥

करुणा ॥ सानन्दं ॥ सहि दिट्ठिआ वड्ढसि विण्हुभत्तीए देवीए पासपरिवत्तिणी सड्ढेत्ति । *)

शान्तिः ॥ हर्षं नाटयति ॥

भिक्षुः ॥ अथ धर्मस्य कामादपक्रान्तस्य कुत्र वृत्तिः ।

क्षपणकः ॥ पुनर्गणयित्वा पालिय अत्ते इति पठति ॥

कापालिकः ॥ सविषादं ॥ अहो महत् कष्टमापतितं महाराजस्य । तथा हि

मूलं देवी सिद्धये विष्णुभक्तिस्
तां च श्रद्धानुव्रता सत्त्वकन्या ।
कामान्मुक्तस्तत्र धर्मो ऽप्यभूच्चेत्
सिद्धं मन्ये तद्विवेकस्य कृत्यं ॥ २४ ॥

तथापि तावदसुव्ययेनापि स्वामिनः प्रयोजनमनुष्ठेयं । तन्महाभैरवीं विद्यां धर्मश्रद्धयोराहरणाय प्रस्थापयामः ।

॥ इति निष्क्रान्ताः ॥

शान्तिः ॥ सहि आवामपि एवं हताशानां व्यवसायं देव्यै विष्णुभक्त्यै निवेदयावः ।

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति ॥

॥ तृतीयो ऽङ्कः ॥

*) सखि दिष्ट्या वर्धसे विष्णुभक्त्या देव्याः पार्श्वपरिवर्तिनी श्रद्धेति ।

॥ अथ ॥

॥ चतुर्थोऽङ्कः ॥

॥ ततः प्रविशति मैत्री ॥

मैत्री ॥ सुदं मए मुदिताए साअसादो जधा महाभैरवीगसणासंभमादो भअवदीए विण्हुभत्तीए परित्तादा पिअसही सद्धेत्ति । ता उक्कण्ठिदेण हिअएण पिअसहीं कहिं पेक्खिस्सं *)
॥ परिक्रामति ॥

॥ ततः प्रविशति श्रद्धा ॥

श्रद्धा ॥ सभयोत्कम्पं पठति ॥

घोरां नारकपालकुण्डलवतीं विद्युच्छटां दृष्टिभिर्
मुञ्चन्तीं विकरालमूर्तिमनलज्वालापिशङ्गैः कचैः ।
दंष्ट्राचन्द्रकलाङ्कुरान्तरलसज्जिह्वां महाभैरवीं
पश्यन्त्या इव मे मनः कदलिकेवाद्याप्यहो वेपते ॥ १ ॥

*) श्रुतं मया मुदितायाः सकाशात् यथा महाभैरवीग्रसनसंभ्रमाद्भगवत्या विष्णुभक्त्या परित्राता प्रियसखी श्रद्धेति तदुत्कण्ठितेन हृदयेन प्रियसखीं कदा प्रेक्षिष्ये ।

मैत्री ॥ अये एसा मे पिअसही सद्धा भअसमुब्भन्तहिअआ कदलिआकम्पतरलेहिं अङ्गेहिं किं वि मन्तअन्दी संमुहागदं वि मं ण पेक्खदि । ता आलविस्सं दाव ॥ प्रकाशं ॥ पिअसहि सद्धे किं ति तुअं उत्ताविदहिअआ मं वि ण विलोएसि । *)

श्रद्धा ॥ विलोक्य सोच्छ्वासं ॥ अये मे प्रियसखी मैत्री ।

कालरात्रिकरालास्यदन्तान्तर्गतया मया ।
दृष्टासि सखि सैव त्वं पुनरत्रैव जन्मनि ॥ २ ॥

तदेहि परिष्वजस्व ।

मैत्री ॥ तथा कृत्वा ॥ सहि तधा विण्हुभत्तिणिब्भच्छिदप्पहावाए महाभइरवीए कहं दे अज्ज वि वेवन्ति अङ्गाइं । **)

श्रद्धा ॥ घोरामित्यादि पठति ॥

मैत्री ॥ सत्रासं ॥ अहो हदासा घोलदंसणा । अध ताए आअदाए किं किदं । ***)

श्रद्धा ॥ श्येनावपातमवपत्य पदद्वये मां
आदाय धर्ममपरेण करेण घोरा ।

*) अये एषा मे प्रियसखी श्रद्धा भयसमुद्भ्रान्तहृदया कदलीकम्पतरलैरङ्गैः किमपि मन्त्रयन्ती संमुखागतामपि मां न प्रेक्षते । तदालपिष्यामि तावत् । प्रियसखि श्रद्धे किमिति त्वमुत्तापितहृदया मामपि न विलोकयसि ।

**) सखि तथा विष्णुभक्तिनिर्भर्त्सितप्रभावाया महाभैरव्याः कथं ते अद्यापि वेपन्तेऽङ्गानि ।

***) अहो हताशा घोरदर्शना । अथ तयागतया किं कृतं ।

वेगेन सा गगणमुत्पतिता नखाग्र-
कोटिस्फुरत्पिशितपिण्डयुगेव गृध्री ॥ ३ ॥

मैत्री ॥ हद्धी हद्धी । *)

॥ इति मूर्च्छति ॥

श्रद्धा ॥ सखि समाश्वसिहि समाश्वसिहि ।

मैत्री ॥ समाश्वस्य ॥ तदो तदो । **)

श्रद्धा ॥ ततःपरमस्मदीयार्तनादोपजातदयार्द्रया देव्या

भ्रूभङ्गभीमपरिपाटलदृष्टिपातं
उद्गाढकोपकुटिलं च तया व्यलोकि ।
सा वज्रपातकृतशैलशिलेव भूमौ
व्याभग्नजर्जरशिरोऽस्थि यथा पपात ॥ ४ ॥

मैत्री ॥ दिट्ठिआ मई विअ सद्दूलमुहादो विब्भट्ठा खेमेण संजीविदा पिअसही । तदो तदो । ***)

श्रद्धा ॥ ततो देव्या समुपजाताभिनिवेशमुक्तमेवं यदस्य दुरात्मनो महामोहहतकस्य मामप्यवज्ञाय वर्तमानस्य समूलमुन्मूलनं करिष्यामीति । आदिष्टा चाहं देव्या यथा गच्छ श्रद्धे

*) हाधिक् हाधिक् ।

**) ततस्ततः ।

***) दिष्ट्या मृगीव शार्दूलमुखतो विभ्रष्टा क्षेमेण संजीविता प्रियसखी । ततस्ततः ।

ब्रूहि विवेकं कामक्रोधादीनां निर्जयायोद्योगः क्रियतां ततो वैराग्यं प्रादुर्भविष्यति अहं च यथासमयं प्राणायामाद्यनुप्राणनेन युष्मत्सैन्यमनुग्रहीष्यामि ऋतम्भरादयश्च देव्यः शाठ्यादिकौशलेन उपनिषद्देव्या संगतस्य भगवतः प्रबोधोदयमनुविधास्यन्ति । तदहमिदानीं विवेकसंनिधिं प्रस्थिता । त्वं पुनः किमाचरन्ती दिवसान् अतिवाहयसि ।

मैत्री ॥ अम्हे वि विण्हुभत्तीए आणाए चतस्सो बहिणिआओ विवेअसिद्धिकालणेण महप्पाणं हिअए वत्ताम । *)

॥ संस्कृतमाश्रित्य ॥ ते हि

ध्यायन्ति मां सुखिनि दुःखिनि चानुकम्पां
पुण्यक्रियेषु मुदितां कुमतावुपेक्षां ।
एवं प्रसादमुपयाति हि रागलोभ-
द्वेषादिदोषकलुषोऽप्ययमन्तरात्मा ॥ ५ ॥

तदेवं चतस्रोऽपि भगिन्यो वयं तदभ्युदयव्यापारेणैव वासरान् नयामः । कुत्रेदानीं प्रियसखी महाराजमालोकयति ।

श्रद्धा ॥ देव्यैतदेवमुक्तं । अस्ति राढाभिधानो जनपदः । तत्र भागीरथीपरिसरालंकारभूते चक्रतीर्थे मीमांसानुगतया मत्या

*) वयमपि विष्णुभक्त्याज्ञया चतस्रो भगिन्यो विवेकसिद्धिकारणेन महात्मनां हृदये वर्तामहे ।

कथंचिद्धार्यमाणप्राणो व्याकुलेनान्तरात्मना विवेक उपनि-
षद्देव्याः संगमार्थं तपस्तपस्यतीति ।

मैत्री ॥ ता गच्छदु पिअसही अहं वि सकं णिओअं अणु-
चिट्ठामि । *)

श्रद्धा ॥ एवं भवतु ।

॥ इति निष्क्रान्ते ॥

॥ विष्कम्भकः ॥

॥ ततः प्रविशति राजा प्रतीहारी च ॥

राजा ॥ आः पाप महामोहहतक सर्वथा हतस्त्वयायं महा-
जनः । तथा हि

शान्ते ऽनन्तमहिम्नि निर्मलचिदानन्दे तरङ्गावली-
निर्मुक्ते ऽमृतसागराम्भसि मनाङ् मग्नो ऽपि नाचामति ।
निःसारे मृगतृष्णिकार्णवजले श्रान्तो विमूढः पिबत्य्
आचामत्यवगाहते ऽभिरमते मज्जत्यथोन्मज्जति ॥ ६ ॥

अथ वा संसारचक्रवाहकस्य महामोहस्यावबोधो मूलं तस्य
च तत्त्वावबोधादेव निवृत्तिः । यतः

अमुष्य संसारतरोरबोध-
मूलस्य नोन्मूलविनाशनाय ।

*) तद्गच्छतु प्रियसखी अहमपि स्वकं नियोगमनुतिष्ठामि ।

विश्वेश्वराराधनबीजजातात्
तत्त्वावबोधादपरोऽभ्युपायः ॥ ७ ॥

प्रायश्च सुकृतिनां व्यवसितेऽर्थे देवा यान्ति सहायतां इति तत्त्वविदो व्याहरन्ति । तथा च देव्या विष्णुभक्त्या संदिष्ट उद्योगः कामादिविजये क्रियतामिति अहमपि भवदर्थे गृहीतपत्नेति । तत्र कामस्तावत् प्रथमो वीरो वस्तुविचारेणैव जीयते । तद्भवतु तमेव तावन्निर्जयार्थमादिशामि । वेदवति आहूयतां वस्तुविचारः ।

प्रतीहारी ॥ जं देवो आणवेदि । *)

॥ इति निष्क्रम्य वस्तुविचारेण सह प्रविशति ॥

वस्तुविचारः ॥ अहो निर्विचारसौन्दर्याभिमानवर्धिष्णुना कामहतकेन हि निहतं जगत् । अथ वा दुरात्मना महामोहेनैव । तथा हि

कान्तेत्युत्पललोचनेति विपुलश्रोणीभरेत्युन्नमत्-
पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वान् अपि
प्रत्यक्षाशुचिपुत्रिकां स्त्रियमहो मोहस्य दुश्चेष्टितं ॥ ८ ॥

अपि च यथावस्तु विचारयताममन्दमतीनामपि पिशितपङ्का-

*) यद्देव आज्ञापयति ।

वनद्धास्थिपञ्जरमयी स्वभावदुर्गन्धिर्बीभत्सवेशा नारीति नास्ति विरतिः । तदत्र विस्पष्ट एवेतरगुणाध्यासः । तथा हि

मुक्ताहारलता रणन्मणिमया हैमास्तुलाकोटयो
रागः कुङ्कुमसंभवः सुरभयः पौष्पा विचित्राः स्रजः ।
वासश्चित्रदुकूलमल्पमतिभिर्नार्यामहो कल्पितं
बाह्यान्तः परिपश्यतां तु निरयो नारीति नाम्ना कृतं ॥ ९ ॥

॥ सांकाशे ॥ अः पाप काम चाण्डाल किमनालम्बनमेवाविर्भवता व्याकुलीक्रियते जनः । तथा ह्ययमेवाभिमन्यते

बाला मामियमिच्छतीन्दुवदना सानन्दमुद्वीक्षते
नीलेन्दीवरलोचना पृथुकुचोत्पीडं परीरिप्सते ।

अरे मूढ

का त्वामिच्छति का च पश्यति पशो मांसास्थिभिर्निर्मिता
नारी वेद न किंचिदत्र स पुनः पश्यत्यमूर्तः पुमान् ॥ १० ॥

प्रतीहारी ॥ इदो एदु महाभाओ । *)

॥ इत्युभौ परिक्रामतः ॥

प्रतीहारी ॥ एसो महाराओ उवविट्ठो चिट्ठदि । ता उवसप्पदु भवं । **)

*) इत एतु महाभाग ।

**) एष महाराज उपविष्टस्तिष्ठति । तदुपसर्पतु भवान् ।

वस्तुविचारः ॥ उपसृत्य ॥ जयतु जयतु देवः । एष वस्तुविचारः प्रणमति ।

राजा ॥ इहोपविश्यतां ।

वस्तुविचारः ॥ उपविश्य ॥ देव एष ते किंकरः संप्राप्त आज्ञयानुगृह्यतां ।

राजा ॥ महामोहेन सहास्माकं संप्रवृत्तः संग्रामः । तदत्र कामस्तस्य प्रथमो वीरः तस्य च प्रतिवीरत्वयास्माभिर्भवान् निरूपितः ।

वस्तुविचारः ॥ धन्योऽस्मि येन स्वामिनाहमेवं संभावितः ।

राजा ॥ अथ कया शस्त्रविद्यया भवान् कामं जेष्यति ।

वस्तुविचारः ॥ आः पञ्चशरः कुसुमधन्वा कामो जेतव्य इत्यत्रापि शस्त्रग्रहणापेक्षा । पश्य

दृष्टान्तरमपिधाय द्वारमारात् कथंचित्
स्मरणविपरिवृत्तौ दर्शने योषितां च ।
परिणतिविरसत्वं देहबीभत्सतां वा
प्रतिमुहुरनुचिन्त्योन्मूलयिष्यामि कामं ॥ ११ ॥

राजा ॥ साधु साधु ।

वस्तुविचारः ॥ अपि च

विपुलपुलिनाः कल्लोलिन्यो नितान्तपतञ्झरी-
मसृणितशिलाः शैलाः सान्द्रद्रुमा वनराजयः ।
यदि शमगिरो वैयासिक्यो बुधैश्च समागमः
क्व पिशितवसामय्यो नार्यस्तथा क्व च मन्मथः ॥ १२ ॥

नारीति नाम प्रधानमस्त्रं कामस्य । तेन तस्यां जितायां तत्सहायाः सर्व एव विफलारम्भा भङ्गमासादयिष्यन्ति । तथा हि

चन्द्रश्चन्दनमिन्दुधामधवला गुञ्जद्द्विरेफावली-
झंकारोन्मुखरा विलासविपिनोपान्ता वसन्तोदयाः ।
मन्दध्यानघनोदयाश्च दिवसा मन्दाः कदम्बानिलाः
शृङ्गारप्रमुखाश्च कामसुहृदो नार्या जितायां जिताः ॥ १३ ॥

तदलमतिविलम्बेन । आदिशतु स्वामी ।

सोऽहं प्रकीर्णैः परितो विचारैः
शरैरिवोन्मथ्य बलं परेषां ।
सैन्यं कुरूणामिव सिन्धुराजं
गाण्डीवधन्वेव निहन्मि कामं ॥ १४ ॥

राजा ॥ सप्रमादं ॥ तत् सज्जीभवतु भवान् शत्रुविजयाय ।

वस्तुविचारः ॥ यदादिशति देवः ।

॥ इति प्रणम्य निष्क्रान्तः ॥

राजा ॥ वेदवति क्रोधस्य विजयाय क्षमैवाहूयतां ।

प्रतीहारी ॥ जं देवो आणवेदि । *)

॥ इति निष्क्रम्य क्षमया सह प्रविशति

क्षमा ॥

क्रोधान्धकारविकटभ्रुकुटीतरङ्ग-
भीमस्य सान्ध्यकिरणारुणरौद्रदृष्टेः ।
निःकम्पनिर्मलपयोधिगभीरवीरा
धीराः परस्य परिवादगिरः सहन्ते ॥ १५ ॥

॥ सश्लाघमात्मानं निर्वर्ण्य ॥

क्लमो न वाचां शिरसो न शूलं
न चित्ततापो न तनोर्विमर्दः ।
न चापि हिंसादिरनर्थयोगः
श्लाघ्या परं क्रोधजयेऽक्षमेका ॥ १६ ॥

॥ उभे परिक्रामतः ॥

प्रतीहारी ॥ एसो देवो । ता उवसप्पदु पिअसही । **)

क्षमा ॥ उपसृत्य ॥ जयतु जयतु देवः । एषा देवस्य दासी क्षमा साष्टाङ्गपातं प्रणमति ।

राजा ॥ क्षमेऽत्रोपविश्यतां ।

क्षमा ॥ उपविश्य ॥ आज्ञापयतु देवः किमर्थमाहूतो दासीजनः ।

*) यद्देव आज्ञापयति ।

**) एष देवः । तदुपसर्पतु प्रियसखी ।

राजा ॥ अस्मिन् संग्रामे दुरात्मा क्रोधस्त्वया जेतव्यः ।

क्षमा ॥ देवस्यानुग्रहान्महामोहमपि जेतुं पर्याप्तास्मि किं पुनः क्रोधं तनुचरमात्रं । तदहमचिरादेव

तं पापकारिणमकारणबाधितारं
स्वाध्यायदेवपितृयज्ञतपःक्रियाणां ।
क्रोधं स्फुलिङ्गमिव दृष्टिभिरुद्वमन्तं
कात्यायनीव महिषं विनिपातयामि ॥ १७ ॥

राजा ॥ क्षमे शृणुमस्तावत् क्रोधविजयोपायं ।

क्षमा ॥ देव विज्ञापयामि ।

क्रुद्धे स्मेरमुखावधारणमथाविष्टे प्रसादक्रमो
व्याक्रोशे कुशलोक्तिरात्मदुरितच्छेदोत्सवस्ताडने ।
धिग् जन्तोरजितात्मनोऽस्य महती दैवादुपेता विपद्
दुर्वारेति दयारसार्द्रमनसां क्रोधस्य कुत्रोदयः ॥ १८ ॥

राजा ॥ साधु साधु ।

क्षमा ॥ देव क्रोधस्य विजयादेव हिंसापारुष्यमानमात्सर्यादयोऽपि विजिता एव भविष्यन्ति ।

राजा ॥ तत् प्रतिष्ठतां भवती विजयाय ।

क्षमा ॥ यदाज्ञापयति देवः ।

॥ इति निष्क्रान्ता ॥

राजा ॥ प्रतीहारीं प्रति ॥ वेदवति आहूयतां लोभस्य जेता संतोषः ।

प्रतीहारी ॥ जं देवो आणवेदि । *)

॥ इति निष्क्रम्य संतोषेण सह प्रविशति ॥

संतोषः ॥ विचिन्त्य सानुक्रोशं ॥

फलं स्वेच्छालभ्यं प्रतिवनमखेदं क्षितिरुहां
पयः स्थाने स्थाने शिशिरमधुरं पुण्यसरितां ।
मृदुस्पर्शा शय्या सुललितलतापल्लवमयी
सहन्ते संतापं तदपि धनिनां द्वारि कृपणाः ॥ १९ ॥

॥ आकाशे ॥ अरे मूर्खलुब्ध दुरुच्छेदः खल्वयं भवतो व्यामोहः ।

तथा हि

समारम्भा भग्नाः कति कति न वारांस्तव पशो
पिपासोस्तुच्छेऽस्मिन् द्रविणमृगतृष्णार्णवजले ।
तथापि प्रत्याशा विरमति न ते मूढ शतधा
विदीर्णं यच्चेतो नियतमशनीग्रावघटितं ॥ २० ॥

इदं ते लोभान्धस्य चेष्टितं चेतसि चमत्कारमातनोति । यतः

लभ्यं लब्धमिदं च लभ्यमधिकं तन्मूललभ्यं ततो
लब्धं चापरमित्यनारतमहो मुग्धो धनं ध्यायसि ।
नैतद्वेत्सि पुनर्भवत्यमचिरादाशापिशाची बलात्
सर्वग्रासमियं ग्रसिष्यति महालोभान्धकारावृतं ॥ २१ ॥

*) यद्देव आज्ञापयति ।

अपि च ।

धनं तावल्लब्धं कथमपि तथाप्यस्य नियतं
विनाशे नाशे वा तव सति वियोगोऽस्त्युभयथा ।
अनुत्पादः श्रेयान् किमु कथय पथ्योऽथ विलयो
विनाशो लब्धस्य व्यथयतितरां न ह्यनुदयः ॥ २२ ॥

किं च ।

मृत्युर्मास्यति मूर्ध्नि शश्वदुरगी घोरा जरारूपिणी
त्वामेषा ग्रसते परिग्रहमयैर्गृध्रैर्जगद्धस्यते ।
धूत्वा बोधजलैरबोधबहुलं तल्लोभजन्यं रजः
संतोषामृतसागराम्भसि मनाङ् मग्नः सुखं जीवति ॥२३॥

प्रतीहारी ॥ एसो सामी । ता उवसप्पदु महाभाओ । *)

संतोषः ॥ तथा कृत्वा ॥ जयतु जयतु स्वामी । एष संतोषः प्रणमति ।

राजा ॥ इहोपविश्यतां ।

॥ इति स्वसंनिधावुपवेशयति ॥

संतोषः ॥ सविनयमुपविश्य ॥ एष प्रेष्यजन आज्ञाप्यतां देवेन ।

राजा ॥ विदितप्रभाव एव भवान् तदलमत्र विलम्बेन लोभं जेतुं वाराणसीं प्रति प्रतिष्ठतां ।

*) एष स्वामी । तदुपसर्पतु महाभागः ।

संतोषः ॥ यदाज्ञापयति देवः । सोऽहं

नानामुखं विजयिनं जगतां त्रयाणां
देवद्विजातिवधबन्धनलब्धवृद्धिं ।
रक्षोऽधिनाथमिव दाशरथिः प्रसह्य
निर्जित्य लोभमवशं तरसा पिनष्मि ॥ २४ ॥

॥ इति निष्क्रान्तः ॥

प्रविश्य विनीतवेशः पुरुषः ॥ देव संभृतानि विजयप्रयाणमङ्गलानि प्रत्यासन्नश्च मौहूर्तिकावेदितः प्रस्थानसमयः ।

राजा ॥ यद्येवं सेनाप्रस्थानायादिश्यन्तां सेनापतयः ।

पुरुषः ॥ यदाज्ञापयति देवः ।

॥ इति निष्क्रान्तः ॥

॥ नेपथ्ये ॥

सज्यन्तां कुम्भभित्तिच्युतमदमदिरामत्तभृङ्गाः करीन्द्रा
युज्यन्तां स्यन्दनेषु प्रसभजितमरुच्चण्डवेगास्तुरङ्गाः ।
कुन्तैर्नीलोत्पलानां वनमिव ककुभामन्तराले सृजन्तः
पादाताः संचरन्तु प्रसभमसिलसत्पाणयोऽथाश्ववाराः ॥२५॥

राजा ॥ भवतु कृतमङ्गलाः प्रतिष्ठामहे ॥ पारिपार्श्विकं प्रति ॥ सारथिरादिश्यतां सांग्रामिकं रथं सज्जीकृत्योपनयतु ।

पारिपार्श्विकः ॥ यदाज्ञापयति देवः ।

॥ इति निष्क्रान्ताः ॥

॥ ततः प्रविशति यथोक्तं रथमादाय सारथिः ॥

सारथिः ॥ देव एष सज्जीकृतो रथः । तदारोहत्वायुष्मान् ।

राजा ॥ कृतमङ्गलविधी रथारोहणं नाटयति ॥

सारथिः ॥ रथवेगं निरूपयित्वा ॥ आयुष्मन् पश्य पश्य

उद्धूतपांशुपटलानुमितप्रबन्ध-
धावत्खुराग्रचयचुम्बितभूमिभागाः ।
निर्मथ्यमानजलधिध्वनिघोरघोषं
एते रथं गगणसीम्नि वहन्ति वाहाः ॥ २६ ॥

इयं च नातिदूरे दर्शनपथमवतीर्णा त्रिभुवनपावना वाराणसी नाम नगरी ।

अमी धारायन्त्रस्खलितजलझंकारमुखरा
विभाव्यन्ते भूयः शशिकरमुषः सौधशिखराः ।
विचित्रा यत्रोच्चैः शरदमलमेघान्तविलसत्-
तडिल्लेखालक्ष्मीं वितरति पताकावलिरियं ॥ २७ ॥

एताश्च प्रतिमुकुललग्नमधुपावलीरणितमुखरा जृम्भारम्भरविगलन्मकरन्ददुर्दिनाः कुसुमसुरभयो नातिदूरे श्यामायमानघनच्छायातरवो नगरपर्यन्तोद्यानभूमयः । यत्रैते मरुतोऽपि गृहीतपाशुपतव्रतास्तापसा इव लक्ष्यन्ते । तथा हि

तोयार्द्राः सुरसरितः सिताः पराग्रै-
रर्चन्तश्च्युतकुसुमैरिवेन्दुमौलिं ।
प्रोद्गीतां मधुपरुतैः स्तुतिं पठन्तो
नृत्यन्ति प्रचललताभुजैः समीराः ॥ २८ ॥

राजा ॥ सानन्दं विलोक्य ॥

सैषान्तर्दधती तमोविघटनादानन्दमात्मप्रभं
चेतः कर्षति चन्द्रचूडवसतिर्विश्वेव मुक्तेः पदं ।
भूमेः कण्ठविलम्बिनीव कुटिला मुक्तावली जाह्नवी
यत्रेयं हसतीव फेनपटलैर्वक्रां कलामैन्दवीं ॥ २९ ॥

सारथिः ॥ परिक्रम्य ॥ आयुष्मन् पश्य पश्य इदं तत् सुरसरित्परिसरालंकारभूतं भगवतः पावनमनादेरादिकेशवस्य विष्णोरायतनं ।

राजा ॥ सहर्षं ॥ अये

एष देवः पुराविद्भिः क्षेत्रस्यात्मेति गीयते ।
अत्र देहं समुत्सृज्य पुण्यभाजो विशन्ति यं ॥ ३० ॥

सारथिः ॥ आयुष्मन् पश्य पश्य एते तावत् कामक्रोधलोभादयोऽस्मद्दर्शनमात्रादितो देशाद्दूरमतिक्रामन्ति ।

राजा ॥ एवमेतत् । तद्भवतु ॥ प्रविश्य ॥ जयतु जयतु भगवान् । स्वाभीष्टसिद्धये भगवन्तं नमस्यामः ॥ रथादवतीर्य प्रविश्यालोक्य च ॥ जयतु जयतु भगवान् । अमरचयचमूचक्रचूडामणिश्रेणिनीराजितोपान्तपादद्वयाम्भोजराजन्नखद्योतखद्योतकिर्मीरितस्वर्णपीठ स्फुरद्वैतविश्रान्तिसंतानसंतप्तवन्दारुसंसारनिद्रापहारैकदक्ष क्ष्मामण्डलोद्धारसंभारसंघट्टदंष्ट्राग्रकोटिस्फुरच्छैलचक्रक्रमाक्रान्तलोकत्रय प्रबलभुजबलोद्भूतगोवर्धनछत्रनिर्वारिताखण्डलोद्योजिताकाण्डचण्डाम्बुवाहातिवर्षत्रसद्गोकुलत्राणविस्मापिताशेषविश्व प्रभो विबुधरिपुवधूवर्गसीमन्तसिन्दूरसन्ध्यामयूखछटोन्मार्जनोद्दामधामाधिप त्रस्तदैत्येन्द्रवक्षस्तटीपाटनाकुण्ठभास्वन्नखश्रेणिपाणिद्वयस्वस्तविस्तारिरत्नार्णवामग्नलोकत्रय त्रिभुवनभयकृत्कैटभोद्दण्डकण्ठास्थिकूटस्फुटोन्मर्जितोद्दामचक्रस्फुरज्ज्योतिरुल्लासितोड्डामरोद्दण्डदोर्दण्ड खण्डेन्दुचूडप्रिय प्रौढदोर्दण्डविभ्रान्तमन्थाचलक्षुब्धदुग्धाम्बुधिप्रोत्थितश्रीभुजावल्लिसंश्लेषसंक्रान्तपीनस्तनाभोगपत्रावलीलाञ्छितोरःस्थलस्थूलमुक्ताफलोदारहारप्रभामण्डलप्रस्फुरत्कण्ठ वैकुण्ठ भक्तस्य लोकस्य संसारमोहच्छिदं देहि बोधोदयं देव तुभ्यं नमः ।

॥ निर्गमं नाटयित्वा विलोक्य च ॥ साधुरयमेवास्माकं निवासोचितो देशः । तदत्रैव स्कन्धावारं निवेशयामः ।

॥ इति निष्क्रान्तौ ॥

॥ इति ॥

॥ चतुर्थोऽङ्कः ॥

॥ अथ ॥

॥ पञ्चमोऽङ्कः ॥

॥ ततः प्रविशति श्रद्धा ॥

श्रद्धा ॥ विचिन्त्य ॥ खल्वयं सिद्धः पन्थाः । यतः

निर्दहति कुलमशेषं ज्ञातीनां वैरसंभवः क्रोधः ।
वनमिव घनपवनाहततरुवरसंघट्टसंभवो दहनः ॥ १ ॥

॥ साश्रं ॥ अहो दुर्वारो दारुणः सोदरव्यसनजन्मा शोकानलो यो विवेकजलधरशतैरपि न मन्दीक्रियते । तथा हि

ध्रुवं ध्वंसो भावी जलनिधिमहीशैलसरितां
अतो मृत्योः शीर्यत्तृणलघुषु का जन्तुषु कथा ।
तथाप्युच्चैर्बन्धुव्यसनजनितः कोऽपि विषमो
विवेकप्रोन्माथी दहति हृदयं शोकदहनः ॥ २ ॥

येन तथा क्रूरप्रकृतिकेष्वपि भ्रातृषु कामक्रोधादिषु कथावशेषतां गतेषु ।

निकृन्ततीव मर्माणि देहं शोषयतीव मे ।
दहतीवान्तरात्मानं क्रूरः शोकाग्निरुच्छिखः ॥ ३ ॥

॥ विचिन्त्य ॥ आदिष्टास्मि देव्या विष्णुभक्त्या । वत्से श्रद्धे अहमत्र हिंसाप्रायसमरदर्शनपराङ्मुखी तेन वाराणसीमुत्सृज्य शालग्रामाभिधाने भगवतः क्षेत्रे कंचित् कालमतिपालयामि त्वं तु यथावृत्तमागत्य मे निवेदयिष्यसीति । तदहं देव्याः सकाशं गत्वा सर्वमेतत्समरवृत्तान्तमावेदयामि ॥ परिक्रम्यावलोक्य च ॥ एतच्चक्रतीर्थं यत्रायं संसारसागरोत्तारतरणिकर्णधारो भगवान् हरिः स्वयं प्रतिवसति ॥ प्रणम्य ॥ इयं च महामुनिभिरुपास्यमाना भगवती विष्णुभक्तिः शान्त्या सह किमपि मन्त्रयते । यावदुपसर्पामि ।

॥ इति परिक्रामति ॥

॥ ततः प्रविशति विष्णुभक्तिः शान्तिश्च ॥

शान्तिः ॥ देवि प्रबलचिन्ताकुलहृदयामिव भगवतीमवलोकयामि ।

विष्णुभक्तिः ॥ वत्से एतस्मिन्नतिमहति सांपराये न ज्ञाने

बलवता मोहेनाभियुक्तस्य वत्सविवेकस्य कीदृशो वृत्तान्त इति दुःस्थितमिव मे हृदयं ।

शान्तिः ॥ किमत्र विचिन्त्यं । ननु भगवती चेत् कृतानुग्रहा तन्नियतमेव राज्ञो विवेकस्य विजय इति जानामि ।

विष्णुभक्तिः ॥ वत्से

यद्यप्यभ्युदयः प्रायः प्रमाणादवधार्यते ।
कामं तथापि सुहृदामनिष्टाशङ्कि मानसं ॥ ४ ॥

विशेषतश्च श्रद्धायाश्चिरमनागमनं मनसि संदेहमारोपयति ।

श्रद्धा ॥ उपसृत्य ॥ भगवति प्रणमामि ।

विष्णुभक्तिः ॥ अहो स्वागतं ।

श्रद्धा ॥ देव्याः प्रसादेन ।

शान्तिः ॥ अम्ब प्रणमामि ।

श्रद्धा ॥ पुत्रि मां परिष्वजस्व ।

शान्तिः ॥ तथा करोति ॥

श्रद्धा ॥ वत्से देव्या विष्णुभक्तेः प्रसादान्मुनिजनचेतःपदं प्राप्नुहि ।

विष्णुभक्तिः ॥ अथ तत्र किं वृत्तं ।

श्रद्धा ॥ यद्देव्याः प्रतिकूलमाचरतामुचितं ।

विष्णुभक्तिः ॥ तद् विस्तरेणावेदय ।

श्रद्धा ॥ आकर्णयतु भगवती । देव्यामादिकेशवायतनादपक्रान्तायामेव किंचिदुत्सृष्टपाटलिम्नि भगवति भास्वति विजयघोषेणाहूयमानानेकवरवीरबहलसिंहनादबधिरितदिगन्ते सततरथतुरगखुरखण्डितभूमण्डलोच्छलद्विपुलरजःपटलान्तरितकिरणमालिनि प्रबलतरकर्णतालास्फालनोच्छलत्समरकरिकुम्भसिन्दूरसन्ध्यायमानदशदिशि प्रलयजलधरध्वानभीषणे तेषामस्माकं च संनद्धे सैन्यसागरे महाराजमहामोहस्य महाराजेन नैयायिकदर्शनं दौत्येन प्रहितं गत्वा च तेनोक्तो महामोहः

विष्णोरायतनान्यपास्य सरितां कूलान्यरण्यस्थलीः
पुण्याः पुण्यकृतां मनांसि च भवान् म्लेछान् व्रजेत् सानुगः ।
नो चेत् सत्तु कृपाणदारितभवत्प्रत्यङ्गधाराजरद्-
रक्तास्फीतविदीर्णवक्त्रविवराः फेत्कारिणः फेरवाः ॥ ९ ॥

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततो देवि विकटललाटतटताण्डवितभ्रुकुटिना क्रुद्धेन महामोहेनाभिहितं । अनुभवत्वस्य दुर्नयपरिपाकस्य विवेकहतकः फलमित्यभिधाय स्वयं पाषण्डागमाः पाषण्डतर्कशास्त्रैः समं समराय प्रथमं समुद्योजिताः । अत्रान्तरे चास्माकमपि सैन्यशिरसि

वेदोपवेदाङ्गपुराणधर्म-
शास्त्रेतिहासादिभिरुच्छ्रितश्रीः ।
सरस्वती पद्मकरा शशाङ्क-
संकाशकान्तिः सहसाविरासीत् ॥ ६ ॥

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततो देवि वैष्णवशैवसौरादयो देव्याः सकाशमागताः ।

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ तदनन्तरं च

सांख्यन्यायकणादभाषितमहाभाष्यादिशास्त्रैर्वृता
स्फूर्जन्न्यायसहस्रवाक्कनिकरैरुद्द्योतयन्ती दिशः ।
मीमांसा समरोत्सुकाविरभवद्धर्मेन्दुकान्तानना
वाग्देव्याः पुरतस्त्रयीत्रिनयनां कात्यायनीवापरा ॥ ७ ॥

शान्तिः ॥ अये कथं पुनः स्वभावद्वन्द्विनामागमानां च तर्काणां च समवायः संपन्नः ।

श्रद्धा ॥ पुत्रि

समानान्वयजातानां परस्परविरोधिनां ।
परैः प्रत्यभिभूतानां प्रसूते संगतिः श्रियं ॥ ८ ॥

येन वेदप्रसूतानां तेषामन्तरविरोधेऽपि वेदसंरक्षणाय ना-

स्तिकपक्षप्रतिक्षेपणाय शास्त्राणां माहात्म्यमेव । आगमानां च तत्त्वं विचारयतामविरोध एव । तथा हि

ज्योतिः शान्तमनन्तमव्ययमजं तत्तद्गुणोन्मीलनाद्
ब्रह्मेत्यच्युत इत्युमापतिरिति प्रस्तूयतेऽनेकधा ।
तैस्तैरेव सदागमैः श्रुतिमुखैर्नानापथप्रस्थितैर्
गम्योऽसौ जगदीश्वरो जलनिधिर्वारां प्रवाहैरिव ॥ ९ ॥

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततो देवि परस्परं करितुरगरथपदातीनां निरन्तरशरनिकरधारासंपातोपदर्शितदुर्दिनानां तेषामस्माकं च योधानां तुमुलः संप्रहारः प्रावर्तत । तथा हि

वहलरुधिरतोयास्तत्र सस्रुः स्रवन्त्यो
निविडपिशितपङ्काः कङ्करङ्कावकीर्णाः ।
शरदलितविदीर्णोत्तुङ्गमातङ्गशैल-
स्खलितरयविकीर्णछत्रहंसावतंसाः ॥ १० ॥

तस्मिंश्चातिमहति दारुणे संग्रामे परापरपक्षविरोधितया पाखण्डागमैरग्रे सरीकृतं लोकायतं तत्त्वमन्योन्यसैन्यविमर्दनेनष्टं । अन्यत् पाखण्डात्मा निर्मूलतया सदागमार्णवप्रवाहेण पर्यस्ताः । सौगतास्तावत् सिन्धुगान्धारमगधान्ध्रहूणवङ्गकलिङ्गादीन् म्लेच्छप्रायान् जनपदान् प्रविष्टाः । पाखण्ड-

दिगम्बरकापालिकादयस्तु पामरबहुलेषु पाञ्चालमालवाभी-रावर्तसागरानुकूलेषु निगूढं संचरन्ति । न्यायाद्यनुगतया मीमांसयावगाढप्रहारजर्जरीकृता नास्तिकतर्कास्तेषामेवागमानामनुपदं प्रयाताः ।

विष्णुभक्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततो वस्तुविचारेण कामो हतः । क्षमया क्रोधपारुष्यहिंसादयो निपातिताः । संतोषेण लोभतृष्णादैन्यानृतवादपैशुन्यस्तेयपरिग्रहा निगृहीताः । अनसूयया मात्सर्यं जितं । परोत्कर्षसंभावनया मदो निषूदितः । परगुणाधिक्येन मानः खण्डितः ।

विष्णुभक्तिः ॥ सहर्षं ॥ साधु साधु संपन्नं । अथ महामोहस्य को वृत्तान्तः ।

श्रद्धा ॥ देवि महामोहोऽपि योगोपसर्गैः सह न ज्ञायते क्वापि निलीनस्तिष्ठतीति ।

विष्णुभक्तिः ॥ अस्ति तर्हि महान् अनर्थशेषः प्रहरणीयश्चासौ । यतः

अत्यादरपरो विद्वान् ईहमानः स्थिरां श्रियं ।
अग्नेः शेषमृणाच्छेषं शत्रोः शेषं न शेषयेत् ॥ ११ ॥

अथ मनसः को वृत्तान्तः ।

श्रद्धा ॥ देवि तेनापि पुत्रपौत्रादिव्यसनजनितशोकावेशेन जीवोत्सर्गाय व्यवसितं ।

विष्णुभक्तिः ॥ स्मितं कृत्वा ॥ यद्येवं स्यात् सर्व एव वयं कृतकृत्या भवामः पुरुषश्च परां निवृत्तिमापद्यते । किं तु कुतस्तस्य दुरात्मनो जीवत्यागः ।

श्रद्धा ॥ एवं देव्यां प्रबोधोदयाय गृहीतसंकल्पायामचिरं शरीरेण सह नैव भविष्यति ।

विष्णुभक्तिः ॥ तद्भवतु । अस्य वैराग्योत्पत्तये वैयासिकीं सरस्वतीं प्रेषयामः ।

॥ इति निष्क्रान्ताः ॥

॥ प्रवेशकः

॥ ततः प्रविशति मनः संकल्पश्च ।

मनः ॥ साश्रं ॥ हा पुत्रकाः क्व गताः स्थ । दत्त मे प्रियदर्शनं । भो भोः कुमारा रागद्वेषमदमानमात्सर्यादयः परिष्वजध्वं मां । सीदन्ति ममाङ्गानि हा न कश्चिन्मां वृद्धमनाथं संभावयति । क्व गता असूयादयः कन्यकाः आशाहिंसातृष्णादयो वा स्नुषाः । कथं ता अपि मन्दभाग्यस्य मे समकालमेव दैवहतकेनाप-हृताः ।

॥ सवैक्लव्यं ॥

विसर्पति विषाग्निवद्दहति शर्ममर्माणि मे
तनोति भृशवेदनाः कषति सर्वकायं वपुः ।
विलुम्पति विवेकितां हृदि च मोहमुन्मीलयत्य्
अहो ग्रसति जीवितं प्रसभमेव शोकज्वरः ॥ १२ ॥

॥ इति मूर्छितः पतति ॥

संकल्पः ॥ राजन् समाश्वसिहि समाश्वसिहि ।

मनः ॥ समाश्वस्य ॥ कथं देवी प्रवृत्तिरपि न मामेवमवस्थं समाश्वासयति ।

संकल्पः ॥ सास्रं ॥ देव कुतोऽद्यापि प्रवृत्तिः । यतः श्रुतकुटुम्बकव्यसनसंजातशोकानलदग्धहृदया हृदयस्फोटं विनष्टा ।

मनः ॥ हा प्रिये क्वासि देहि मे प्रियं प्रतिवचनं । ननु देवि

स्वप्नेऽपि देवि रमसे न मया विना त्वं
सुप्तापि त्वया विरहितो मृतवद्भवामि ।
दूरीकृतासि विधिदुर्ललितैस्तथापि
जीवत्यचेहि मन इत्यसवो दुरन्ताः ॥ १३ ॥

॥ इति पुनर्मूर्छति ॥

संकल्प ॥ राजन् समाश्वसिहि समाश्वसिहि ।

मनः ॥ समाश्वस्य ॥ अलमस्माकमतःपरं जीवितेन । संकल्प चितां मा रचय यावदनलप्रवेशेन शोकानलं निर्वापयामि

॥ ततः प्रविशति सरस्वती वैराग्यिकी ॥

सरस्वती ॥ प्रेषितास्मि भगवत्या विष्णुभक्त्या यथा । सखि सरस्वति गच्छापत्यव्यसनखिन्नस्य मनसः प्रबोधनाय यथा च तस्य वैराग्योत्पत्तिर्भवति तथा यतस्वेति । तद्भवतु । तत्संनिधिमेवोपसर्पामि ॥ उपसृत्य ॥ वत्स किमेवमतिविक्लवो ऽसि । ननु विदितपूर्वैव भवता भावानामनित्यता अधीतानि त्वयैतिहासिकान्युपाख्यानानि । तथा हि

भूत्वा कल्पशतायुषो ऽम्बुजभुवः सेन्द्राश्च देवासुरा
मन्वाद्या मुनयो महीं जलधयो नष्टाः पराः कोटयः ।
मोहः को ऽयमहो महान् उदयते लोकस्य शोकावहो
बन्धोः फेनसमे गते वपुषि यत् पञ्चात्मके पञ्चतां ॥१४॥

तद्भावय भावानामनित्यतां । नित्यानित्यवस्तुदर्शनो न पश्यति शोकावेगं । यतः

एकमेव यदा ब्रह्म सत्यमन्यद्विकल्पितं ।
को मोहस्तत्र कः शोक एकत्वमनुपश्यतः ॥ १५ ॥

मनः ॥ भगवति शोकावेगदूषिते मे मनसि विवेक एव नावकाशं लभते ।

सरस्वती ॥ वत्स स्नेहदोष एषः । प्रसिद्ध एवायमर्थः स्नेहः सर्वानर्थप्रभव इति । तथा हि

उत्पद्यन्ते विषवल्लिबीजविषमाः क्लेशाः प्रियाख्या नृणां
तेभ्यः स्नेहमया भवन्ति न चिराद्वज्राग्निगर्भाङ्कुराः ।
येभ्योऽमी शतशः कुकूलकृतभुग्दाहं दहन्तः शनैर्
देहं दीप्तशिखासहस्रशिखरा रोहन्ति शोकद्रुमाः ॥१६॥

मनः ॥ देवि यद्यप्येवं तथापि न शक्नोमि शोकानलदग्धः प्राणान् धारयितुं । साधु संपन्नं यदन्तकाले त्वं तावद्दृष्टासि । सरस्वती ॥ इदं च परमकृत्यं यदात्महत्याव्यवसाय इति । अपि चामीषां चापकारिणामर्थे कोऽयमत्यावेगो भवतः । पश्य तावत्

क्वचिदुपकृतिः कर्तामीभिः कृता क्रियतेऽथवा
तव न च भवन्त्येते पुंसां सुखाय परिग्रहाः ।
दधति विरहे मर्मच्छेदं तदर्थमपार्थकं
तदपि विपुलायासाः सीदन्त्यहो बत जन्तवः ॥ १७ ॥

अपि च ।

तीर्णाः पूर्णाः कति न सरितो लङ्घिताः के न शैला
नाक्रान्ता वा कति वनभुवः क्रूरसंचारघोराः ।
पापैरेतैः किमिव दुरितं कारितो नास्मि कष्टं
यद्दृष्टास्ते धनमददर्पाध्मानवक्त्रा दुराशाः ॥ १८ ॥

मनः ॥ देवि एवमेतत् । तथापि

लालितानां स्वजातानां हृदि संचरतां चिरं ।
प्राणानामिव विच्छेदो मर्मच्छेदादरुन्तुदः ॥ १९ ॥

सरस्वती ॥ वत्स ममतावासनानिबन्धनोऽयं व्यामोहः । उक्तं च

मार्जारभक्षिते दुःखं यादृशं गृहकुक्कुटे ।
न तादृङ् ममताशून्ये कलम्बिकेऽथ मूषके ॥ २० ॥

तत् सर्वानर्थबीजस्य ममत्वस्योच्छेदे यत्नः कर्तव्यः । पश्य

प्रादुर्भवन्ति वपुषः कति वा न कीटा
यान् यत्नतः खलु तनोरपसारयन्ति ।
मोहः क एष जगतो यदपत्यसंज्ञां
तेषां विधाय परिशोषयति स्वदेहं ॥ २१ ॥

मनः ॥ देवि भवत्वेवं तथापि दुरुच्छेद्यस्तु ममत्वग्रन्थिः तथा हि तावदवधारयतु भवती

निरन्तराभ्यासदृढीकृतस्य
सस्नेहसूत्रग्रथितस्य जन्तोः ।
जानासि किंचिद्भगवत्युपायं
ममत्वपाशस्य यतो विमोक्षः ॥ २२ ॥

सरस्वती ॥ वत्स भावानामनित्यताभावनमेव तावन्ममत्वोच्छेदस्य प्रथमोऽभ्युपायः । तथा हि

न कति पितरो दाराः पुत्राः पितृव्यपितामहा
महति वितते संसारेऽस्मिन् गतास्तव कोटयः ।
तदिह सुहृदां विद्युत्पातोज्ज्वलान् क्षणसंगमान्
सपदि हृदये भूयो भूयो निवेश्य सुखी भव ॥ २३ ॥

मनः ॥ भगवति तव प्रसादादपास्त एव व्यामोहः । किं तु
तव मुखशशधरदीधितिगलितैर्विमलोपदेशपीयूषैः ।
क्षालितमपि मे हृदयं मलिनं शोकोर्मिभिः क्रियते ॥ २४ ॥

तदस्यार्द्रस्य शोकप्रहारस्य भेषजमाज्ञापयतु भगवती ।

सरस्वती ॥ वत्स नूनमुपदिष्टमेवात्रमुनिभिः ।
अकाण्डपातजातानामार्द्राणां मर्मभेदिनां ।
गाढशोकप्रहाराणामचिन्तैव महौषधिः ॥ २५ ॥

मनः ॥ भगवति एवमेतत् । दुर्वारं तु चेतः । यतः
अप्येतद्वारितं चिन्तासंतानैरभिभूयते ।
मुहुर्वाताहतैर्विम्भ्रमभङ्गैरिवैन्दवं ॥ २६ ॥

सरस्वती ॥ वत्स श्रूयतां चेतसोऽयं विकारः । ततः क्वचिच्छान्ते विषये चेतो निवेशय ।

मनः ॥ तत् प्रसीदतु भवती कोऽसौ शान्तो विषयः ।

सरस्वती ॥ वत्स गुह्यमेतत् । तथाप्यार्तानामुपदेशे न दोषः ।

नित्यं स्मरन् जलदनीलमुदारहार-
केयूरकुण्डलकिरीटधरं हरिं वा ।
ग्रीष्मे सुशीतमिव वा ह्रदमस्तशोकं
ब्रह्म प्रविश्य भज निर्वृतिमात्मनीनां ॥ २७ ॥

मनः ॥ विचिन्त्य सोच्छ्वासं ॥ सर्वथा त्रातोऽस्मि भगवत्या ।

॥ इति पादयोः पतति ॥

सरस्वती ॥ वत्स प्रत्युपदेशसहिष्णु ते हृदयं जातं । मयैतदप्यपरमुच्यते ।

वशं प्राप्ते मृत्योः पितरि तनये वा सुहृदि वा
शुचालं तप्यन्ते भृशमुदरताडं जडधियः ।
असारे संसारे विरसपरिणामे तु विदुषां
वियोगो वैराग्यं द्रढयति वितन्वन् शमसुखं ॥ २८ ॥

॥ ततः प्रविशति वैराग्यं ॥

वैराग्यं ॥ विचिन्त्य ॥

अस्रान्तान्नवनीलनीरजदलोपान्तातिसूक्ष्मं पुनस्
त्वङ्मात्रान्तरितामिमं यदि वपुर्नैतत् प्रजानां पतिः ।
प्रत्यग्रान्तरदस्रमिश्रपिशितग्रासग्रहं गृध्नतो
गृध्रध्वाङ्क्षवृकान् शुनो निपततः क्रोशान् कथं वारयेत् ॥

अपि च ।

श्रियो दोलालोला विषयजरसाः प्रान्तविरसा
विपद्गेहं देहं महदपि धनं भूरिनिधनं ।
बृहच्छोको लोकः सततमबलानर्थबहुला
तथाप्यस्मिन् घोरे पथि बत रता नात्मनि रताः ॥ ३० ॥

सरस्वती ॥ वत्सैतद्वैराग्यं त्वामुपस्थितं । तदेतत् संभावय ।

मनः ॥ क्वासि पुत्रक ।

वैराग्यं ॥ उपसृत्य ॥ अहं भो अभिवादये ।

मनः ॥ वत्स जातमात्रेण त्वया त्यक्तोऽस्मि । परिष्वजस्व मां ।

वैराग्यं ॥ तथा करोति ॥

मनः ॥ वत्स त्वद्दर्शनात् प्रशान्तो मे शोकावेशः ।

वैराग्यं ॥ तात कोऽत्र शोकावेशः । यतः

पान्थानामिव वर्त्मनि क्षितिरुहां नद्यामिव भ्रश्यतां
मेघानामिव पुष्करे जलनिधौ सांयात्रिकाणामिव ।
संयोगः पितृमातृबन्धुतनयभ्रातृप्रियाणां सदा
सिद्धो दूरवियोग एव विदुषां शोकोदयः कस्तदा ॥ ३१ ॥

मनः ॥ सानन्दं ॥ देवि एवमेतत् यदाह वत्सः । सम्प्रति हि
नार्यस्ता नवयौवना मधुकरव्याहारिणस्ते द्रुमाः
प्रोन्मीलन्नवमल्लिकासुरभयो मन्दास्त एवानिलाः ।

अद्योदात्तविवेकमार्जिततमःस्तोमत्यलीकं पुनस्
तान् एतान् मृगतृष्णिकार्णवपयःप्रायान् मनः पश्यति ॥३२॥

सरस्वती ॥ वत्स यद्यप्येवं तथापि गृहिणा मुहूर्तमप्यनाश्रमधर्मिणा न भवितव्यं। तदद्यप्रभृति निवृत्तिरेव ते सधर्मचारिणी ।

मनः ॥सलज्जं॥ यदादिशति देवी ।

सरस्वती ॥ शमदमसंतोषादयश्च पुत्रास्त्वामुपचरन्तु यमनियमादयश्चामात्याः। विवेको ऽपि त्वदनुग्रहादुपनिषद्देव्या सह यौवराज्यमनुभवतु । एताश्च मैत्र्यादयश्चतस्रो भगिन्यो भगवत्या विष्णुभक्तया तव प्रसादनाय प्रहितास्ताः सप्रसादमनुमानय ।

मनः ॥ यदादिशति देवीति मूर्ध्नि निवेशिताः सर्वा एवाज्ञाः ।

॥ इति सहर्षं पादयोः प्रणमति ॥

सरस्वती ॥ यमनियमासनप्राणायामादयः सादरमायुष्मता द्रष्टव्याः। एतैरेव सहायुष्मान् साम्राज्यमधितिष्ठतु। त्वयि च स्वास्थ्यमापन्ने क्षेत्रज्ञो ऽपि स्वां प्रकृतिमापत्स्यते। यतः

त्वत्सङ्गाच्छाश्वतो ऽपि प्रभवलयजरोपप्लुतो बुद्धिवृत्तिष्व्
एको नानेव देवो रविरिव जलधेर्वीचिषु व्यस्तमूर्तिः

तूष्णीमालम्बसे चेत् कथमपि चितना वत्स संहृत्य वृत्तीर्
भात्यादर्शे प्रसन्ने रविरिव सहजानन्दसान्द्रस्तदात्मा ॥

तद्भवतु ज्ञातीनामुदकदानाय नदीमवतरामः ।

सर्वे ॥ यदाज्ञापयति देवी ।

॥ तदा निष्क्रान्ताः सर्वे ॥

॥ इति ॥

॥ पञ्चमोऽङ्कः ॥

॥ अथ ॥

॥ षष्ठोऽङ्कः ॥

॥ ततः प्रविशति शान्तिः ॥

शान्तिः ॥ आदिष्टास्मि महाराजविवेकेन यथा । वत्से विदितमेव भवत्या यथा किल

अस्तंगतेषु तनयेषु विलीनमोहे
वैराग्यभाजि मनसि प्रशमं प्रपन्ने ।
क्लेशेषु पञ्चसु गतेषु समं समीहां
तत्त्वावबोधमभितः पुरुषस्तनोति ॥ १ ॥

तद्भवती त्वरिततरं देवीमुपनिषदमनुनीय मत्सकाशमानयत्विति ॥ विलोक्य ॥ अये एषाम्बा सदर्पं किमपि मन्त्रयन्तीत एवागच्छति ।

॥ ततः प्रविशति श्रद्धा ॥

श्रद्धा ॥ अये अद्य खलु राजकुलमारोग्यमालोक्य चिरेण मे पीयूषेणेव लोचने पूर्णे ।

असतां निग्रहो यत्र सन्तः पूज्या यमादयः ।
आराध्यते जगत्स्वामी वश्यैर्देवानुजीविभिः ॥ २ ॥

शान्तिः ॥ उपसृत्य ॥ अम्ब किं मन्त्रयन्ती प्रस्थिता ।

श्रद्धा ॥ अये असतेत्यादि पठति ॥

शान्तिः ॥ अथ मनसि कीदृशी स्वामिनः पुरुषस्य प्रवृत्तिः ।

श्रद्धा ॥ यादृशी वध्यस्य ग्राह्यस्य भवति ।

शान्तिः ॥ तत् किं स्वाम्येव साम्राज्यमलंकरिष्यति ।

श्रद्धा ॥ एवमेतत् । यथात्मानमनुसंधत्तेऽतो देव एव स्वाराट् सम्राट् च भवति ।

शान्तिः ॥ अथ देवस्य मायायां कीदृशोऽनुग्रहः ।

श्रद्धा ॥ ननु निग्रह इति वक्तव्यं कथमनुग्रहः शक्यते वक्तुं । देवोऽपि हि सर्वानर्थबीजमियं माया सर्वथा निग्राह्येति मन्यते ।

शान्तिः ॥ यद्येवं का तर्हीदानीं राजकुलस्य स्थितिः ।

श्रद्धा ॥ शृणु

नित्यानित्यविचारणा प्रणयिनी वैराग्यमेकं सुहृत्
सन्मित्राणि यमादयः शमदमप्रायाः सहाया मताः ।
मैत्र्याद्याः परिचारिकाः सहचरी नित्यं मुमुक्षा बलाद्
उच्छेद्या रिपवश्च मोहममतासंकल्पसङ्गादयः ॥ ३ ॥

शान्तिः ॥ अथ धर्मस्य स्वामिनः कीदृशः प्रणयः ।

श्रद्धा ॥ पुत्रि वैराग्यसंनिकर्षात् प्रभृति नितान्तमिहामुत्रफलभोगविरस एव स्वामी । तेन

स नरकादिव पापफलाद्भयं
भजति पुण्यफलादपि नाशिनः ।
इति समुज्झितकामसमन्वयं
सुकृतकर्म कथंच न मन्यते ॥ ४ ॥

किं त्वसौ प्रत्यक्प्रवणतां स्वामिनो विचिन्त्य कृतकृत्यमिवात्मानं स मत्वा स्वयमेव धर्मः शून्यव्यापारोऽभूत् ।

शान्तिः ॥ अथ तान् उपसर्गान् गृहीत्वा महामोहो निलीय स्थितस्तेषां को वृत्तान्तः ।

श्रद्धा ॥ पुत्रि तथा दुरवस्थागतेनापि महामोहहतकेन स्वामिनः प्ररोचनाय मधुमत्या विद्यया सहोपसर्गाः प्रेषिताः ।

अयं चाभिप्रायो यद्येतेष्वासक्तः स्वामी विवेक उपनिषच्चिन्तामपि न करिष्यतीति ।

शान्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततस्तैर्गत्वा कापि स्वामिन्यैन्द्रजालिकी विद्योपदर्शिता । तथा हि

शब्दान् एष शृणोति योजनशतादाविर्भवन्त्यश्रुतास्
तास्ता वेदपुराणभारतकथास्तर्कादयो वाङ्मयाः ।
ग्रथ्नाति स्वयमिच्छया शुचिपदैः शास्त्राणि काव्यानि वा
लोकान् भ्राम्यति पश्यति स्फुटरुचो रत्नस्थलीर्मेरवीः ॥५॥

मधुमत्या च भूमिमापन्नः स्थानाभिमानिनीभिर्देवताभिरुपच्छन्द्यते । भो इहोपविश्यतां नात्र जन्म मृत्युरनुपाधिरमणीयो देश एषः । त्वामुपस्थितो विविधविलासलावण्यपुण्यमयो मङ्गलार्घव्यग्रपाणिः प्रणयपेशलो विद्याधरीजनः । तदेहि यतो

ऽत्र कनकसिकतास्थलीः स्रवन्तीः
पृथुजघनाः कमलानना घनोरूः ।
मरकतदलकोमला वनालीर्
भज निजपुण्यजितांश्च सर्वभोगान् ॥ ६ ॥

शान्तिः ॥ ततस्ततः ।

श्रद्धा ॥ पुत्रि तदाकर्ण्य मायया श्लाघ्यमेतदित्युक्तं । मनसा चानुमोदितं संकल्पेन प्रोत्साहितं स्वामी संमतिपथमिवापन्नः ।

शान्तिः ॥ सखेदं ॥ पुनरपि तामेव संसारवागुरामभिपतितः स्वामी ।

श्रद्धा ॥ न खलु न खलु ।

शान्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततः परिपार्श्ववर्तिना तर्केण तान् सर्वान् क्रोधावेशकषायितनयनमालोक्याभिहितः स्वामी । स्वामिन् किमेवमेभिर्विषयामिषग्रासगृध्नुभिरास्थानीधूर्तकैः पुनरपि तेष्वेव तथैव विषमविषयाङ्गारेषु निपात्यमानमात्मानं नावबुध्यसे । ननु भोः

भवसागरतारणाय या
न चिराद्योगतरिस्त्वयाश्रिता
अधुना परिमुच्य तां मदात्
कथमङ्गारनदीं विगाहसे ॥ ७ ॥

शान्तिः ॥ ततस्ततः ।

श्रद्धा ॥ ततस्तद्वचनमाकर्ण्य स्वस्ति विषयेभ्य इत्यवधार्यावधीरिता मधुमती ।

शान्तिः ॥ साधु साधु । अथ क्व प्रस्थितास्ति भवती ।

श्रद्धा ॥ आदिष्टाहं स्वामिना यथा । विवेकं प्रष्टुमिच्छामि तत् त्वरतां भवती । तदहं राजसंनिधिं प्रस्थिता ।

शान्तिः ॥ अहमपि महाराजेनोपनिषदमानेतुमादिष्टा । तद्भवतु स्वामिनियोगं संपादयावः ।

॥ इति निष्क्रान्ते

॥ प्रवेशकः ॥

ततः प्रविशति पुरुषः ॥

पुरुषः ॥ विचिन्त्य सहर्षं ॥ अहो माहात्म्यं देव्या विष्णुभक्तेर्यत्प्रसादान्मया

तीर्णाः क्लेशमहोर्मयः परिहृता भीमा ममत्वभ्रमाः
शान्ता मित्रकलत्रबन्धुमकरग्राहग्रहग्रस्तयः ।
क्रोधौर्वाग्निरपाकृतो विघटितास्तृष्णालताग्रन्थयः
पारं तीरमवाप्तकल्पमधुना संसारवारांनिधेः ॥ ८ ॥

ततः प्रविशति उपनिषत् शान्तिश्च ॥

उपनिषत् ॥ सखि कथं तथानिरनुक्रोशस्य स्वामिनो मुखमालोकयिष्यामि येनाहमितरजनयेव सुचिरमेकाकिनी परित्यक्ता ।

शान्तिः ॥ देवि कथं तथाविधविपत्पतितो देव उपालभ्यते ।

उपनिषत् ॥ सखि न दृष्टा त्वया मे तादृशी दशा येनैवं ब्रवीषि । शृणु

वाह्वोर्भग्ना दलितमणयः श्रेणयः कङ्कणानां
चूडारत्नग्रहनिकृतिभिर्दूषितः केशपाशः ।
कैः कैर्नाहं हतविधिबलादीहिता दुर्विदग्धैर्
दासीकर्तुं सपदि दुरितैर्दूरसंस्थे विवेके ॥ १ ॥

शान्तिः ॥ सर्वमेतन्महामोहस्य दुर्विलसितं नात्र देवस्यापराधः । तेन हि मनः कामादिद्वारेण प्रबोधयता त्वत्तो दूरीकृतो विवेकः । एतदेव कुलस्त्रीणां नैसर्गिकं शीलं यद्विपन्मग्नस्य स्वामिनः समयप्रतीक्षणमिति । तदेतदिह दर्शनप्रियालापेन संभावय देवं । सम्प्रत्यपहता विद्विषः संपूर्णास्ते मनोरथाः ।

उपनिषत् ॥ सखि सम्प्रत्यागच्छन्ती वत्सया गीतयाहं रहस्युक्ता यथा । भर्ता स्वामी च पुरुषस्त्वया यथा प्रश्नोत्तरेण संभावयितव्यस्तथा प्रबोधोत्पत्तिर्भविष्यतीति । तत् कथं गुरूणामभ्यक्तं धार्ष्ट्यं करिष्यामि ।

शान्तिः ॥ देवि अविचारणीयमेतद्वाक्यं भगवत्या गीतायाः । अयमेव स्वार्थो भगवत्या विप्रुभक्तया स्वामिनो निरुक्तः । तदेहि संभावय दर्शनेन भर्तारमादिपुरुषं च ।

उपनिषत् ॥ यथा वदति प्रियसखी ।

॥ इति परिक्रामति

॥ ततः प्रविशति राजा श्रद्धा च ॥

राजा ॥ वत्से अपि इच्छति शान्तिः प्रियामुपनिषदं ।

श्रद्धा ॥ देव गृहीतोपदेशैव शान्तिर्गता कथं तां न इच्छति ।

राजा ॥ कथमिव ।

श्रद्धा ॥ देव प्रागेव कथितमेतद्देव्या विष्णुभक्त्यासीद्यथा मन्दराभिधाने शैले विष्णोरायतने देव्यां गीतायां तर्कविद्याभयादनुप्रविष्टेति ।

राजा ॥ कथं पुनस्तर्कविद्याया भयं ।

श्रद्धा ॥ देव तमर्थं सैव प्रस्तोष्यति । तदागच्छतु देवः । एष स्वामी त्वदागमनमेव ध्यायन् विविक्ते वर्तते ।

राजा ॥ उपसृत्य ॥ स्वामिन्नभिवादये ।

पुरुषः ॥ वत्स प्रक्रमविरुद्धोऽयं समुदाचारो यतो ज्ञानवृद्धतया भवान् एवास्माकमुपदेशदानेन पितृभावमापन्नः । कुतः

पुरा हि धर्माध्वनि नष्टसंज्ञा
देवास्तमर्थं तनयान् अपृच्छन् ।
ज्ञानेन सम्यक् परिगृह्य चैतान्
हे पुत्रकाः संशृणुतेत्यवोचन् ॥ १० ॥

तद्भवान् पितृत्वेनास्मासु वर्ततामित्येष एव धर्मः ।

शान्तिः ॥ एष देवि देवेन सह स्वामी विविक्ते वर्तते । तदुपसर्पतु देवी ।

उपनिषत् ॥ उपसर्पति ॥

शान्तिः ॥ स्वामिन्नेषोपनिषद्देवी पादवन्दनायागता ।

पुरुषः ॥ न खलु न खलु । मातेयमस्माकं तत्त्वावबोधोदयेन तदेवैवास्माकं नमस्या । अथ वा

अनुग्रहविधौ देव्या मातुश्च महदन्तरं ।
माता गाढं निबध्नाति बन्धं देवी निकृन्तति ॥ ११ ॥

उपनिषत् ॥ विवेकमालोक्य नमस्कृत्य दूरे समुपविशति ॥

पुरुषः ॥ अम्ब कथ्यतां क्व भवत्या नीता एते दिवसाः ।

उपनिषत् ॥ स्वामिन् नीतान्यमूनि मठचत्वरशून्यदेवागारेषु मूर्खमुखरैः सह वासराणि ।

पुरुषः ॥ अथ ते जानन्ति किमपि भवत्यास्तत्त्वं ।

उपनिषत् ॥ न खलु । किं तु

ते स्वेच्छया मम गिरां द्रविडाङ्गनीता-
वाचामिवार्थमविचार्य विकल्पयन्ति ॥ १२ ॥

तेन केवलं तेषां परार्थग्रहणप्रयोजनमेव मद्विचारणं ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततः कदाचित्

कृष्णाजिनाग्निसमिदाज्यजुहूस्रुवादि-
पात्रैस्तथेष्टिपशुसोममुखैर्मखैश्च ।
दृष्टा मया परिवृता किल कर्मकाण्ड-
व्यादिष्टपद्धतिरथाध्वनि यज्ञविद्या ॥ १३ ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो मया चिन्तितमपि नामैषा पुस्तकभारवाहिनी मे ज्ञास्यति तत्त्वमत एव तस्याः संनिधौ कानिचिद्वासराणि नयामि ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततस्तामहमुपस्थिता तया चाहमुक्तास्मि भद्रे किं ते समीहितमिति । ततो मयोक्तं आर्ये अनाथास्मि त्वयि निवस्तुमिच्छामीति ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततस्तयोक्तं भद्रे किं ते कर्मेति ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो मयोक्तं

यस्माद्विश्वमुदेति यत्र रमते यस्मिन् पुनर्लीयते
भासा यस्य जगद्विभाति सहजानन्दोज्ज्वलं यन्महः ।

शान्तं शाश्वतमक्रियं यमपुनर्भावाय भूतेश्वरं
द्वैतध्वान्तमपास्य यान्ति कृतिनः प्रस्तौमि तं पूरुषं ॥ १४ ॥

ततस्तयोक्तं

पुमान् अकर्ता कथमीश्वरो भवेत्
क्रियाभवोच्छेदकरी न वस्तुधीः ।
कुर्वन् क्रिया एव नरो भवच्छिदः
शतं समाः शान्तमना जिजीविषेत् ॥ १५ ॥

तन्मे नातिप्रयोजनं भवत्याः परिग्रहेण । तथापि यदि कर्तारं भोक्तारं पुरुषं स्तौषि कियत्कालमत्र वस्तुमिच्छसि को दोषः ।

राजा ॥ सोपहासं ॥ अहो धूमान्धकारश्यामलितदृशो दुःप्रज्ञत्वं यज्ञविद्याया येनैवं कुतर्कोपहता ।

अयः स्वभावादचलं बलाच्चलत्य्
अचेतनं चुम्बकसंनिधाविव ।
तनोति विश्वेक्षितुरीक्षितेरिता
जगन्ति मायेश्वरतेयमीशितुः ॥ १६ ॥

तस्मात् तमोऽन्धानामेवेयमीदृशी दृष्टिः । अप्रबोधप्रभवं च संसारं कर्मभिः शमयन्ती यज्ञविद्या नूनमन्धतमसमन्धकारेणापनिनीषति ।

स्वभावलीनानि तमोमयानि
प्रकाशयेद्यो भुवनानि सप्त ।
तमेव विद्वान् अति मृत्युमेति
नान्योऽस्ति पन्था भवमुक्तिहेतुः ॥ १७ ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो यज्ञविद्यया विमृश्योक्तं । सखि त्वत्संनिकर्षाद्दुर्वासनोपहतैरस्मदन्तेवासिभिः कर्मसु श्लथादरैर्भवितव्यं तत् प्रसीदतु भवती स्वाभिलषितदेशगमनाय ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततोऽहं तामतिक्रम्य प्रस्थिता ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततः कर्मकाण्डसहचरी मीमांसा मया दृष्टा

विभज्य कर्माण्यधिकारभागी
श्रुत्यादिभिश्चानुगता प्रमाणैः ।
अङ्गैर्विचित्रैरभियोजयन्ती
प्राप्तोपदेशैरतिदेशगैश्च ॥ १८ ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततोऽहं तामपि तथैवाश्रयमभ्यर्थितवती ।

अथ तयाप्युक्तास्मि भद्रे किंकर्मासीति । ततो मया तदेवोक्तं

॥ यस्माद्विशुमित्यादि पठति ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो मीमांसया पार्श्ववर्तिनां मुखमवलोक्याभिहितं । अस्त्येवास्माकमस्या लोकान्तरफलोपभोगयोग्यपुरुषोपनयने नोपयोगः तदीयतामेषा कर्मापयुक्ता । तत्र तेषामन्तेवासिनां मध्ये केनाप्यन्तेवासिनैतदनुमोदितमेव । अपरेण तु प्रसिद्धप्रतिष्ठेन मीमांसाहृदयाधिदैवतेन कुमारिलस्वामिना प्रोक्तं देवि नेयं कर्मापयुक्तं पुरुषमुपनयति किं त्वकर्तारमभोक्तारमीश्वरं न चासावीश्वरः कर्मसूपयुज्यते । ततो ऽपरेणोक्तं । अथ किं लौकिकात् पुरुषादन्य ईश्वरो नामास्ति । ततस्तेन विहस्य पुनरुक्तं । अस्ति । तथा हि

एकः पश्यति चेष्टितानि जगतामन्यस्तु मोहान्धधीर्
एकः कर्मफलानि वांछति ददात्यन्यस्तु तान्यर्थिने ।
एकः कर्मसु शिष्यते तनुभृतां शास्तेव देवो ऽपरो
निःसङ्गः पुरुषः क्रियासु स कथं कर्तेति संभाव्यते ॥ ११ ॥

राजा ॥ सहर्षं ॥ साधु कुमारिलस्वामिन् साधुप्रज्ञो ऽस्यायुष्मन् ।

. द्वौ तौ सुपर्णौ सयुजौ सखायौ.
समानवृक्षं परिषस्वजाते ।

एकस्तयोः पिप्पलमत्ति पक्कं
अन्यस्त्वनश्नन्नभिचाकशीति ॥ २० ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततोऽहं मीमांसामभिमन्त्र्य प्रस्थिता ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो मया बहुभिः शिष्यैरुपास्यमानास्तर्कविद्या अवलोकिताः ।

काचिद्विश्वविशेषकल्पनपरा न्यायैः परा तन्वती
वादं सच्छलजातिनिग्रहमयैर्जल्पं वितण्डामपि ।
अन्या तु प्रकृतेर्विभज्य पुरुषस्योदाहरन्ती भिदां
तत्त्वानां गणनापरा महदहंकारादिसर्गक्रमैः ॥ २१ ॥

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ तथैवाहं ताः समुपस्थिता । ताभिश्चानुयुक्तया मया तदेव कर्मोदाहृतं ॥ यस्मादित्यादि पठति ॥ ततस्ताभिः सप्रकाशोपहासमुक्तं । आ घाचाले परमाणुभ्यो विश्वमुत्पद्यते । अन्यया तु सक्रोधमुक्तं । आः पापे कथमीश्वरमेवं विकारिणं कृत्वा विनाशधर्मिणमुपपादयसि ननु रे प्रधानाद्विश्वोत्पत्तिः ।

राजा ॥ अहो दुर्मतयस्तर्कविद्याः । एतदपि न जानन्ति सर्वं

प्रमेयत्वात् घटादिवत् कार्यमिति परमाणुप्रधानोपादानमप्यपेक्षणीयमेवेति । तथा हि

अम्भःशीतकरान्तरिक्षनगरस्वप्नेन्द्रजालादिवत्
कार्यं मेयमसत्यमेतदुदयध्वंसादियुक्तं जगत् ।
शुक्तौ रूप्यमिव स्रजीव भुजगः स्वात्मावबोधे हरौ
अज्ञाते प्रभवत्यथास्तमयते तत्त्वावबोधोदयात् ॥ २२ ॥

विकारशङ्का तु मुग्धवधूविकल्पविलसितमिव । तथा हि

शान्तं ज्योतिः कथमनुदितानस्तनित्यप्रकाशं
विश्वोत्पत्तौ व्रजति विकृतिं निःकलं निर्मलं च ।
शश्वन्नीलोत्पलदलरुचामम्बुवाहावलीनां
प्रादुर्भावे भवति नभसः कीदृशो वा विकारः ॥ २३ ॥

पुरुषः ॥ साधु साधु प्रीणयति मानसं ममायं प्रज्ञावतो विमर्शः ॥ उपनिषदं प्रति ॥ ततस्ततः ।

उपनिषत् ॥ ततस्ताभिः सर्वाभिरुक्तं । अहो विश्वविलयेन मुक्तिमेषा वदन्ती नास्तिकपथं प्रस्थिता निगृह्यतामिति । ततः ससंरम्भं मां निग्रहीतुं प्रधाविताः सर्वाः ।

पुरुषः ॥ सत्रासं ॥ ततस्ततः ।

उपनिषत् ॥ ततोऽहं सत्वरतरं परिक्रम्य दण्डकारण्ये प्रविष्टा । ततो मन्दरशैलोपकल्पितस्य मधुसूदनायतनस्य नातिदूरे ।

वाह्वोर्भग्ना दलितमणयः श्रेणयः कङ्कणानां
चूडारत्नग्रहनिकृतिभिर्दूषितः केशपाशः ।

इत्याद्यवस्था मम संजाता ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥ ततो देवायतनान्निर्गत्य गदापाणिभिः पुरुषैरतिनिर्दयं ताड्यमानास्ता दिगन्तमतिक्रान्ताः सर्वाः ।

राजा ॥ सहर्षं ॥ न खलु भवतीमतिक्रामतो भगवान् विश्वसाक्षी क्षमते ।

पुरुषः ॥ ततस्ततः ।

उपनिषत् ॥

छिन्ना मुक्तावलिरपहृतं स्रस्तमङ्गाद्दुकूलं
भीता गीताश्रममथ गलन्नूपुराहं प्रविष्टा ॥ २४ ॥

तत्र च वत्सया गीतया मां तत्रागतामालोक्य ससंभ्रमं मातर्मातरिति परिरभ्योपवेशितास्मि । विदितवृत्तान्तया तया च तथोक्तं । अम्ब नात्र खेदयितव्यं मनो ये खलु त्वामप्रमाणीकृत्य यथेष्टमसुरसत्वाः प्रचरिष्यन्ति तेषामीश्वर एव शास्ता । उक्तं च तेन भगवता तान् अधिकृत्य (तथा च गीता)

तान् अहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु । इति ॥ २५ ॥

पुरुषः ॥ सकौतुकं ॥ देवि त्वत्प्रसादाज्ज्ञातुमिच्छामि कोऽयमीश्वरो नामेति ।

उपनिषत् ॥ सक्रोधमिव ॥ कोऽज्ञानन्तं तमन्धमिव प्रत्युत्तरं दास्यति ।

पुरुषः ॥ सहर्षं ॥ कथमहमात्मा पुरुषः परमेश्वरः ।

उपनिषत् ॥ एवमेतत् । तथा हि

असौ त्वदन्यो न सनातनः पुमान्
भवान् न देवात् पुरुषोत्तमात् परः ।
स एव भिन्नस्त्वमनादिमायया
द्विधेव विम्वं सलिले विवस्वतः ॥ २६ ॥

पुरुषः ॥ विवेकं प्रति ॥ भगवन्नुक्तमर्थं भगवत्या न संयगवधारयामि ।

अवच्छिन्नस्य भिन्नस्य जरामरणधर्म्मिणः ।
मम ब्रवीति देवीयं सत्यानन्दचिदात्मतां ॥ २७ ॥

विवेकः ॥ पदार्थानवज्ञानाद्वाक्यार्थो नावगम्यते । अर्म्मेणोक्तं तत् सत्यमेव ।

पुरुषः ॥ तदवबोधाय भवान् उपायमाज्ञापयतु ।

विवेकः ॥

एषोऽस्मीति विविच्य नेति परितश्चित्तेन सार्द्धं कृते
तत्वानां विलये चिदात्मनि परिज्ञाते त्वमर्थे पुनः ।

श्रुत्वा तत्त्वमसीति बाधितभवध्वान्तं तदात्मप्रभं
शान्तं ज्योतिरनन्तमन्तरुदितानन्दं समुद्द्योतते ॥ २८ ॥

पुरुषः ॥ सानन्दं श्रुतमर्थं परिभावयति ॥

॥ ततः प्रविशति निदिध्यासनं ॥

निदिध्यासनं ॥ आदिष्टोऽस्मि भगवत्या विष्णुभक्त्या यथा। निगूढमस्मदभिप्रायमुपनिषद्विवेकेन सह बोधयितव्या त्वया च पुरुषे वस्तव्यमिति ॥ विलोक्य ॥ एषा देवी विवेकपुरुषाभ्यां नातिदूरे वर्तते। यावदुपसर्पामि ॥ उपसृत्योपनिषदं प्रति जनान्तिकं ॥ देव्या विष्णुभक्त्या समादिष्टं यथा संकल्पयोनयो देवता भवन्ति मया च समाधानेन विदितं यथा आपन्नसत्त्वा भवतीति तत्र क्रूरसत्त्वा विद्या नाम कन्या त्वदुदरे वर्तते प्रबोधचन्द्रोदयश्च तत्र विद्यां संकर्षणविद्यया मनसि संक्रामयिष्यति प्रबोधचन्द्रोदयं च पुरुषे समर्प्य भवत्या विवेकेन सह मत्सकाशमागन्तव्यमिति।

उपनिषत् ॥ यदादिशति देवी।

॥ इति विवेकमादाय निःक्रान्ता ॥

निदिध्यासनं ॥ पुरुषं विशति ॥

पुरुषः ॥ ध्यानं नाटयति ॥

॥ नेपथ्ये ॥ आश्चर्यमाश्चर्यं।

उद्दामद्युतिदामभिस्तडिदिव प्रद्योतयन्ती दिशः
प्रत्यक्षस्फुटदुत्कटास्थि मनसो निर्भिद्य वक्षःस्थलं ।
कन्येयं सहसा समं परिकरैर्मोहं ग्रसन्ती भजत्य्
अन्तर्धानमुपैति चैकपुरुषं श्रीमान् प्रबोधोदयः ॥ २९ ॥

॥ ततः प्रविशति प्रबोधोदयः ॥

प्रबोधोदयः ॥

किं व्याप्तं किमपोहितं किमु हृतं किं वा समुत्सारितं
स्फूतं किं नु विलायितं नु किमिदं किंचिन्न वा किंचन ।
यस्मिन्नभ्युदिते वितर्कपदवीं नैवं समारोहति
त्रैलोक्यं सहजप्रकाशदलितं सोऽहं प्रबोधोदयः ॥ ३० ॥

॥ परिक्रम्य ॥ एष पुरुषः । यावदुपसर्पामि ॥ उपसृत्य ॥ भगवन् प्रबोधचन्द्रोदयोऽभिवादयते ।

पुरुषः ॥ सह्लादं ॥ एहि वत्स परिष्वजस्व मां ।

प्रबोधोदयः ॥ तथा करोति ॥

पुरुषः ॥ सानन्दं ॥ अहो विघटितं तिमिरपटलं प्रभातं संजातं । तथा हि

मोहान्धकारमवधूय विकल्पनिद्रां
उन्मथ्य कोऽप्यजनि बोधतुषाररश्मिः ।

श्रद्धाविवेकमतिशान्तियमादि येन
विश्वात्मकं स्फुरति विष्णुरहं स एषः ॥ ३१ ॥

सर्वथा कृतकृत्योऽस्मि भगवत्या विष्णुभक्तेः प्रसादात्। सोऽहमिदानीं

संगं न केनचिदुपेत्य किमप्यपृच्छन्
गच्छन् न तर्कितफलं विदिशं दिशं वा।
शान्तो व्यपेतभयशोककषायमोहः
सायंगृहो मुनिरहं भवितास्मि सद्यः ॥ ३२ ॥

॥ ततः प्रविशति विष्णुभक्तिः ॥

विष्णुभक्तिः ॥ सहर्षमुपसृत्य ॥ चिरेण खल्वस्माकं संपन्नाः सर्वे मनोरथा येन प्रशान्तारातिं भवन्तमवलोकयामि।

पुरुषः ॥ देव्या विष्णुभक्तेः प्रसादात् किं नाम दुष्करं।

॥ इति पादयोः पतति ॥

विष्णुभक्तिः ॥ पुरुषमुत्थापयति ॥ उत्तिष्ठ वत्स। किं ते भूयः प्रियमुपकरोमि।

पुरुषः ॥ अतः परमपि किं प्रियमस्ति। यतः

प्रशान्तारातिरगमद्विवेकः कृतकृत्यतां।
नीरजास्ति सदानन्दे पदे चाहं निवेशितः ॥ ३३ ॥

तथाप्येतदस्तु ।

पर्जन्योऽस्मिन् जगति महतीं वृष्टिमिष्टां विधत्तां
राजानः क्ष्मां गलितविविधोपप्लवाः पालयन्तु ।
तद्बोन्मेषप्रविस्तृततमसस्त्वत्प्रसादान्महान्तः
संसाराब्धिं विषयममतातङ्कपङ्कं तरन्तु ॥ ३४ ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ इति ॥

॥ षष्ठोऽङ्कः ॥

॥ इति श्रीकृष्णमिश्रविरचितं प्रबोधचन्द्रोदयनाम नाटकं समाप्तं ॥

BONNAE, EX OFFICINA TYPOGRAPHICA CAROLI GEORGII.

CORRIGENDA.

P. 3. l. 10. pro सम्राज्ये lege साम्राज्ये.
» 4. » 6. » घुम्मन्त (sans. घूर्मत्) l. घुण्णन्त (sans. घूर्णत्)
» 5. » 17. » वोदयऽ l. वोदयः
» 7. » 6. » नवमल्लिकाः सुरभयो l. नवमल्लिकासुरभयो
» 10. » 5. » पितो l. पित्रो°
» — » — » तावद् l. तात°
» 22. » 1. » कल्यानं l. कल्याणं
» 23. » 15. » अस्मच्छालक° l. अस्यच्छ्यालक°
» 25. » ult. » तथात्युदा° l. तथा क्षुद्रा°
» 27. » 7. » कल्पना विनिर्मित° l. कल्पनावि°
» — » 11. » पुनः छिन्नाद् l. पुनश्छिन्नाद्
» 28. » 15. » निल्थिरहिं l. तिल्थिरहिं
» 32. » 13. » गृहीखा l. गृहीत्वा
» 39. » 1. comma post vocem परमपिश्रा delendum.
» 47. » 1. pro पामन्ताणं l. लमन्ताणं (sans. रमगतां)
» 48. » 18. » न खलु मात्र° l. न खलु नाममात्र°
» 50. » 12. » त्तणाः l. त्तणाणः
» 51. » 3. » बुद्धेनोक्तः ग्रयं l. बुद्धेनोक्तोऽयं
» 54. » 12. » श्रेष्टान् l. श्रेष्ठान्
» 57. » 8. » रण्डा l. रण्डाः
» 59. » 12. » नास्मद्° l. तेनास्मद्°
» — » 17. » शोभना et लोचना l. शोभने et लोचने
» 69. » 16. » विवृत्तिः l. निवृत्तिः
» 71. » 6. » कृतं l. कृतः
» 74. » 5. » दृष्टैः l. दृष्टेः
» 78. » 13. » सद्यन्तां l. सज्ज्यन्तां

Pag. 80. lin. 7. pro मुक्तैः l. मुक्तेः
» 84. » 15. » विष्णुभक्तैः l. विष्णुभक्तेः
» 86. » 18. » प्रत्यक्तिभूतानां l. प्रत्यग्भू°
» 87. » ult. » जयपदान् lege जनपदान्
» 91. » 14. » अन्यद्दिक्कल्पितं l. अन्याद्दिक°
» 92. » 11. » भवत्यंते l. भवन्त्येते
» 93. » 6. » कलम्त्रिके l. कलविङ्के
» 94. » 14. » वाताहृतैर् l. वाताहतैर्
» 95. » 17. » गृध्नतो l. गृह्णतो
» 97. » 17. » स्वास्थामापन्ने l. स्वास्थ्यमा°
» 100. » 12. » समन्वयं l. समन्वयः
» — » 15. स delendum.
» 103. » 5. pro संप्राद्यावः l. संपाद्°
» 106. » 12 et 13. sic vocabula separanda:

स्वामिन्

नीता — देवा —

गारेषु — वासराणि ।

secundum hemistichium vide l. 16. 17.

» 107. » 3. pro तथेटि पशु° l. तथेष्टिपशु°
» 108. » 5. » क्रियाभवो l. क्रिया भवो°
» — » 16. » अप्रबोध l. अबोध
» 109. » 13. » भागो l. भाक्ति

V+RC(१)